# वादसंग्रह

(१) कूपदृष्टान्तविशदीकरण

(२) वादमाला (२)

(३) विषयतावाद

(४) वायूष्मादेः प्रत्यक्षाप्रत्यक्षत्वविवादरहस्यम्

(५) वादमाला (३)


-: प्रणेता :-

न्यायाचार्य-न्यायविशारद
स्वपरसमयरहस्यवेदि-तर्कमहोदधि

श्रीमद् यशोविजय उपाध्याय
(वि. सं. १६६०-१७४४)


卐


-: प्रकाशक :-

भारतीयप्राच्यतत्त्वप्रकाशनसमिति-पिंडवाडा

॥ श्री महावीराय नमः ॥

न्यायाचार्य-न्यायविशारद-स्वपरसमयरहस्यवेदि-
श्रीमद् यशोविजयोपाध्यायविरचित

# * वादसंग्रह *

(१) कूपदृष्टान्तविशदीकरण

(२) वादमाला (२)

(३) विषयतावाद

(४) वायूष्मादेः प्रत्यक्षाऽप्रत्यक्षत्व-
विवादरहस्य

(५) वादमाला (३)

प्रकाशक

भारतीय प्राच्य-तत्त्व-प्रकाशन समिति

पिंडवाड़ा स्टे.–सिरोहीरोड (राज.)

प्राप्तिस्थानः-
शा. रमणलाल व्रजेचन्द
मस्कती मार्केट
अहमदाबाद

वीर सं० २५०१
विक्रम सं. २०३१

द्रव्य सहायकः-
मनालाल रिखबाजी लुनावावाला

सर्वाधिकाराः
श्रमणप्रधानश्रीजैनसङ्घस्य स्वायत्ताः

मूल्य-रू. १०-००

मुद्रक-
ज्ञानोदय प्रिन्टिंग प्रेस
पिंडवाड़ा स्टे.-सिरोहीरोड
(राजस्थान)

# प्रस्तावना

परम पूज्य तार्किक शिरोमणि उपाध्याय श्रीमद् यशोविजय महाराज की प्रतिभा के पञ्च पुष्प महनीय श्री जैन संघ की सेवामें समर्पित करते हुए आज आनन्द का अनुभव हो रहा है।

प्रस्तुत पुस्तक में अद्यावधि अप्रकाशित ४ ग्रन्थ और अपूर्ण प्रकाशित १ ग्रन्थ का समावेश किया गया है।

## ग्रन्थकार परिचय

इस वादसंग्रह के प्रणेता हैं पूज्य उपा० श्री यशोविजयजी महाराज जिनका जन्म उत्तर गुजरात में कनोडु गांव में और स्वर्गवास वि० स १७४४ में दर्भावती (डभोई) गाँव में हुआ था।

बालवय में दीक्षा ग्रहण कर इस महर्षि ने जैन ग्रन्थों का तलस्पर्शी अध्ययन किया और उनकी अप्रतिम प्रतिभा देखकर पर-समय के अध्ययन के लिये उनके गुरुदेव श्रीनयविजयजी म. उनको काशी में ले गये। वहाँ न्याय-वैशिषिक इत्यादि दर्शनों के सिद्धान्त का तलस्पर्शी अध्ययन किया और निराश बने हुए वादीओं की सभा में दुर्जय वादी को पराजय देकर जैन शासन की विजय पताका को गगन में लहराया। जीवन के अन्तिम श्वास तक बाल और विद्वद्-गण भोग्य अनेक ग्रन्थों का प्रणयन किया। अपनी प्रतिभा और शक्ति का सदुपयोग करके जैन शासन की कीर्त्ति में चार चाँद लगाये।

## १—कूपदृष्टान्तविशदीकरण (पृष्ठ-१ से २८)

प्रतिपरिचयादिः—

हालाँकि यह प्रकरण पहले जैन ग्रन्थ प्रकाशक सभा-राजनगर द्वारा प्रकाशित हुआ था लेकिन वह अपूर्ण था-इसका कारण यह

है कि जिस मूलादर्श प्रति से उसका सम्पादन हुआ था उस मूलादर्श प्रति में उस समय पूर्णतया ३ पत्र गैरहाजिर थे। यह प्रति देवशापाडा (अहमदाबाद) के प्राचीन हस्तप्रतों के भंडार में आज भी सुरक्षित है और संघ के सौभाग्य से वे ३ पत्र जो पहले नहीं थे वे भी उसमें शामिल है। उसमें कुल ६ पत्र हैं जिसमें तीन का अङ्क दो बार है । प्रति के हस्ताक्षर से अनुमान किया जा सकता है कि यह प्रति उपाध्याय यशोविजय म. के गुरुजी श्रीनयविजयजी महाराज ने लिखी होगी। हाल इसके अलावा दूसरी कोई प्रति इस प्रकरण की उपलब्ध नहीं हो रही है । इसीलिये केवल एक ही प्रति के आधार पर इस प्रकरण का सम्पादन हुआ है।

पृष्ठ ६ में प्रथम पंक्ति में 'क्षणसङ्गा' से लगा कर पृष्ठ ११ में तृतीय पंक्ति के आद्य अक्षर '[illegible]' तक पूर्व प्रकाशित में नहीं छप सका था और इस कमी के स्थान पर सम्पादक ने अनुसन्धान के लिये कौंस में अनुमान से पाठ जोड दिया था। पुनः पृष्ठ १६ पंक्ति ९ में 'षय आरम्भः' से लगाकर सम्पूर्ण ग्रन्थ पूर्व प्रकाशन में नहीं छप सका था। श्रीसंघ के सौभाग्य से यहाँ सम्पूर्ण प्रकरण का प्रकाशन हो रहा है।

## कूपदृष्टान्त नाम—

ग्रन्थकार ने मूल और टीका इन दो विभाग में ग्रन्थ का प्रणयन किया है। यद्यपि टीका के दूसरे श्लोक में श्री उपाध्यायजी इस ग्रन्थ का 'तत्त्वविवेक' अभिधान सूचित कर रहे हो ऐसा लगता है फिर भी मूल के प्रथम श्लोक में कूपदृष्टान्त विशदीकरण की प्रतिज्ञा होने से और पूर्व प्रकाशन में भी इसका यह अभिधान ख्यात होने से इस ग्रन्थ का नाम 'कूपदृष्टान्तविशदीकरण' ही रखा गया है।

## कूपदृष्टान्त का विषयः-

अपनी प्रतिज्ञा को स्पष्ट करते हुए पू. उपाध्यायजी दूसरे श्लोक में कहते हैं कि गृहस्थों से किया गया स्नान पूजादि द्रव्यस्तव करने द्वारा अपने को और अनुमोदना द्वारा स्वपर उभय को पुण्य का कारण होता है। इस प्रतिज्ञा के समर्थन में कूपखनन को बताया गया है-जैसे निर्मल जल निष्पादन द्वारा वह स्वपर उभय का इहलोक में कल्याणकारी होता है।

इस प्रतिज्ञा के खण्डन के लिये किसी ने यह आशंका की है कि "पूजा पञ्चाशक की दसवीं गाथा की व्याख्या में श्री अभयदेवसूरि महाराज ने द्रव्यस्तव में अल्पदोष भी बताया है-वह आपने क्यों नहीं बताया ?"

इस आशंका के समाधान में पू० उपाध्यायजी महाराज ने पू० अभयदेवसूरि महाराज के अभिप्राय को बताते हुऐ कहा है कि वह जो अल्पदोष बताया गया हैं वह तो भक्ति होने पर भी यदि यतनादि विधि का पालन न किया हो तभी होता है। यदि-यतनादि विधि पूर्वक स्नानपूजादि किया जाय तो द्रव्यस्तव नितान्त निष्पाप है। पू० उपाध्यायजी महाराज ने पू० हरिभद्रसूरि महाराज के 'पूजा पञ्चाशक' की ४२ वीं गाथा गत 'कथञ्चिद्' वचन की अन्यथाऽनुपपत्ति द्वारा इस का समर्थन किया है। आगे जाकर स्थान स्थान पर भगवतीसूत्र उपदेशपद और पञ्चाशक-षोडशक आदि अनेक ग्रन्थों के उद्धरण देकर और अनेक अकाट्य युक्तियों द्वारा विधियुक्त द्रव्यस्तव की निर्दोषता का समर्थन किया हैं। इसमें प्रसङ्ग से दुर्गतनारी का भी विस्तार से उदाहरण दिया गया है। प्रसङ्ग से ध्रुवबन्धादि प्रक्रिया को भी बताई गई है।

## २- वादमाला (२) (पृष्ठ २९ से ५८)

**प्रतिपरिचयादिः—**

इस ग्रन्थ के आगे '(२)' इसलिये दिया है कि पहले पू. उपाध्यायजी महाराज की एक वादमाला का प्रकाशन हो चूका है और शेष दो वादमाला जिसका प्रकाशन अद्यावधि न हुआ है उनको नम्बर (२) और (३) लगाकर यहां प्रकाशन किया गया है।

वादमाला (२) की मूलादर्शप्रति पू. उपाध्यायजी के स्वहस्ताक्षर से अङ्कित है और आज देवशा का पाडा (अहमदाबाद) के भंडार में सुरक्षित है-जिसमें ६ पत्र हैं।

**ग्रन्थविषयः—**

इसमें पूज्य उपाध्यायजी ने (१) स्वत्ववाद और (२) सन्निकर्षवाद-इन दो वादों को निबद्ध किया है।

प्रथम में स्वत्वरूप पदार्थ अतिरिक्त है या सबन्धविशेषरूप है या क्या है ? इस विषय में नैयायिक सम्प्रदाय-नव्यमत-लीलावती उपाय-पदाथतत्त्व विवेककृत्-रामभद्रसार्वभौम इत्यादि के भिन्न भिन्न मतों का निरूपण और उसका निराकरण बताया है। इसमें अपना कुछ मत पू० उपा० ने दिखाया हो ऐसा लगता नहीं है फिर भी सूक्ष्मेक्षण करने से लगता है कि अतिरिक्तस्वत्व में ही उपाध्यायजी का स्वरस हो। 'स्वत्व' के निरूपण के बाद 'स्वामित्व' का भी विस्तार से निरूपण किया है।

द्वितीय सन्निकर्षवाद में द्रव्यचाक्षुष के प्रति चक्षुसंयोगहेतुता का विचार किया गया है जिसमें भिन्न भिन्न नैयायिक वादिओ में परस्पर मत भेद-खंडन का निरूपण किया है। इस वाद में सर्वथा पर समय की मान्यता का ही निदर्शन है। उपाध्यायजी का अपना मत लगता नहीं है।

## (३) विषयतावाद (पृष्ठ-५६-७८)

प्रतिपरिचयादिः—

इस वाद की दो हस्त प्रत हमें उपलब्ध हुई।

१ खंभात जैन अमरशाला स्थित ज्ञानभंडार की—जिसको खं० संज्ञा से यहाँ व्यक्त किया है। यह प्रति पू० उपाध्यायजी के स्वहस्ताक्षरों से अलङ्कृत है।

२-अहमदाबाद देवशापाडा भंडार की प्रत-जिसको 'दे'० संज्ञा दी गई है। खं० प्रति में कुल ५ पत्र है और दे० में ४ पत्र है।

इस वाद के प्रकाशन में मुख्यतया खं० प्रति का ही आधार लिया गया है और दे० प्रति के पाठान्तर नीचे दिये गये हैं। यह वाद वादमाला के अन्तर्गत नहीं है।

## वाद का विषय

इस वाद में 'विषयता स्वरूपसम्बन्धविशेषरूप है' इस प्राचीन मत का खण्डन कर के अतिरिक्तपदार्थ रूप विषयता का मण्डन किया गया है। विषयता के दो भेद का निरूपण करने के बाद विशेष्यता-प्रकारता-अवच्छेदकता-उद्देश्यता-विधेयता-आपाद्यता इत्यादि पर पर्याप्त आलोचन किया हुआ है।

## ४-वायूष्मादेः प्रत्यक्षाऽप्रत्यक्षत्वविवादरहस्य

प्रतिपरिचयः—

इस रहस्यवाद की एक मात्र प्रति खंभात के जैन अमरशाला के भंडार से प्राप्त हुई है। जिसमें ४ पत्र है। इस प्रति में हस्ताक्षर पू० उपाध्यायजी के हैं या दूसरे के इसमें सन्देह है फिर भी प्रति का लेखन काल वही प्रतीत होता है जो पू० उपाध्यायजी का जीवन काल है।

वादविषयः—

इस वाद में मुख्यतया "वायु का स्पार्शन प्रत्यक्ष नहीं होता है" इस नैयायिक सिद्धान्त का पू० उपा० म० ने खण्डन किया है। वायु के स्पार्शनप्रत्यक्ष के विघटन के लिये भिन्न भिन्न नैयायिक आदि ने जो द्रव्यप्रत्यक्ष में उद्भूतरूप हेतुता आदि का निरूपण किया है इन सभी मतों की आलोचना कर के पू० उपा० ने 'मैं वायु को स्पर्श करता हूं' इत्यादि प्रतीति की भ्रान्तता का निराकरण करके उसके बल से वायुस्पार्शनप्रत्यक्ष का समर्थन किया है।

## ५—वादमाला (३) (पृष्ठ ६१ से २४१)

प्रतिपरिचयादिः—

पू० उपाध्यायजी म० ने ३ वादमाला का प्रणयन किया है उसमें इस वादमाला को हमने 'तृतीय' संज्ञा दी है।

इस वादमाला को पू० उपाध्यायजी ने लिखी हुई हस्तप्रत 'विमलगच्छीयमहेन्द्रविमल' के ज्ञान भंडार से हमें प्राप्त हुई—जो ज्ञान भंडार आज अहमदाबाद में एल० डी० इन्स्टीट्युट में स्थित है। इस वादमाला की प्रत में कुल ११ पत्र हैं।

विषयः—वादमाला (३) में कुल ६ वाद है जिसमें भिन्न भिन्न पदार्थों का निरूपण किया है।

१—'वस्तुलक्षण विवेचन' नामक वाद में पू० उपा० ने सामान्य-विशेषात्मकत्व को वस्तु का लक्षण बताया है। सामान्य और विशेष के स्वरूप का निदर्शन करने के बाद उस लक्षण की परीक्षा में अनेक अनुपपत्तियों का खण्डन करके और साथ साथ दीधितिकार-विद्योतन-धर्मभूषण आदि के मत का भी आलोचन करके पू० उपाध्यायजी म० ने अपने लक्षण को स्थिर किया है।

२-सामान्यवाद में जैनमतानुसार-'वस्तु के समान परिणाम' को सामान्य पदार्थ बताया है। उसके बाद नैयायिक-बौद्ध आदि के अभिमत सामान्य पदार्थ का मण्डन और खण्डन किया है। अन्त में उन्होंने बताये हुए लक्षण को आदरणीय बता कर उसकी उपपत्ति के लिये युक्तियाँ दी गई हैं और साथ साथ अन्य दार्शनिकों ने बताये हुए बाधकों का निराकरण कर दिया है।

३-विशेषवाद में नैयायिकअभिमत विशेषपदार्थ में अनेक बाधकों को बताकर जैन मतानुसार 'वस्तु के व्यावृत्ति अंश' को ही विशेष पदार्थ बताया गया है। उसके बाद उसमें बाधक युक्तियों का खण्डन करके उसका संयुक्तिक समर्थन किया गया है।

४-इन्द्रियवाद में पहले सांख्य के अभिमत वाक्-हस्त आदिके इन्द्रियत्व का बाधकों द्वारा निराकरण करके जैन मतानुसार स्पर्शन आदि पाँच में इन्द्रियत्व का समर्थन किया है। बाद में मन को भी इन्द्रिय मानने वाले नैयायिक मत का पूर्वपक्ष कर के उसका बाधक युक्तियों द्वारा निराकरण किया गया है। उसके बाद जैन मतानुसार द्रव्य-भाव रूप इन्द्रियों के भेदों का सविस्तर विवेचन किया गया है।

५-अतिरिक्तशक्तिवाद में शक्ति को भिन्न पदार्थ न मानने वाले वैशेषिक आदि के पदार्थषट्क विभाग का पहले खण्डन किया गया है। इसके बाद प्रतिबन्धक के अभाव से शक्ति को चरितार्थ करने वाले प्राचीन और नव्य नैयायिकों के मत की समीक्षा कर के स्याद्वादरत्नाकर आदि के आधार से 'शक्ति भिन्न पदार्थ है' इस सत्य का सविस्तर समर्थन किया गया है। इस वाद में प्रसङ्ग से प्रतिष्ठित और शाश्वत प्रतिमाओं की पूज्यता के प्रयोजक धर्म पर विचार किया गया है और उसमें मिमांसक और चिन्तामणिकार के मत की समालोचना भी की गई है।

६–अदृष्टवाद में शुभाशुभक्रियाजन्य पुण्य और पापरूप अदृष्ट को नहीं मानने वाले नास्तिक मत का खण्डन किया गया है। अदृष्ट की सिद्धि के लिये युक्तियां बताकर बीच में शुभाशुभ क्रिया के ध्वंस से ही अदृष्ट को चरितार्थ करने वाले उच्छृङ्खलविचारकों के मत का खण्डन किया है।

अदृष्ट सिद्ध होने के बाद उसको पौद्गलिक नहीं किन्तु आत्मा के विशेषगुण रूप मानने वाले नैयायिको के मत में अनेक बाधक युक्तियाँ बताकर अदृष्ट के पौद्गलिकत्व की सिद्धि की गई है।

अन्त में हमारी ओर से इस वादसंग्रह गत विशेषनामों की सूचि और शुद्धिपत्रक भी दिया हुआ है।

## उपकार स्मरण

१–प० पू० स्व० कर्मसिद्धान्तमहोदधि आचार्यदेवेश श्रीमद् विजय प्रेमसूरीश्वरजी म० सा०,

२–प० पू० न्यायविशारद आचार्यदेव श्रीमद् विजयभुवनभानुसूरीश्वरजी म० सा०,

३–प० पू० शान्तमूर्त्ति श्री धर्मघोष वि० म० सा०

४–और प० पू० गीतार्थ मुनि भगवन्त श्री जयघोष वि०गणिवर

ये सभी हमारे पुज्य गुरुदेवों की अनहद कृपा–जिसके प्रभाव से ये सभी प्रकरणों का प्रकाशन हो सका–मैं कभी भूल नहीं सकता।

## धन्यवाद वितरण

१–लुनावा (राज०) निवासी श्रेष्ठी मनालाल रिखबाजी जिन्होंने इस ग्रन्थसंग्रह के प्रकाशन के द्रव्य व्यय का अमूल्य लाभ लिया।

२–(a)खंभात–जैन अमरशाला के भंडार के सुश्रावक व्यवस्थापकगण–तथा (b) अहमदाबाद–देवशापाडा भंडार के सुश्रावक कार्यवाहक गण तथा (c) एल० डी० इन्स्टीट्यूट के डायरेक्टर–जिन्होंने

अपने अपने भंडार में स्थित अमूल्य हस्तप्रतों को प्रतिलिपि करने के लिये हमें समर्पित किया ।

३–भारतीय प्राच्यतत्त्व प्रकाशन समिति के सञ्चालक सुश्रावक गण–जिन के परिश्रम से नवनिर्मित कर्मसिद्धान्त के अनेक ग्रन्थों का पूर्व में प्रकाशन हो चूका है–और इस ग्रन्थसंग्रह का भी प्रकाशन हो रहा है ।

४–ज्ञानोदय प्रि० प्रेस के मेनेजर सुश्रावक फत्तेहचन्दजी और पिण्डवाडा धार्मिक पाठशाला के शिक्षक प्रुफरिडिंग सहायक सुश्रावक चम्पकलालजी जिन्हों के उत्साहपूर्ण सहयोग से इस ग्रन्थ का शुद्धतया मुद्रण हो सका ।

ये सब धन्यवाद के पात्र है ।

## शुभेच्छा

पूर्वाचार्य महर्षिओं ने मुमुक्षु साधु और श्रावक गण स्वाध्याय द्वारा अपने चित्त को एकाग्र बना कर कर्मनिर्जरा की साधना करें यह एकमात्र उद्देश्य से भिन्न भिन्न बहुधा असावद्य विषयों पर अनेक ग्रन्थों का निर्माण किया । श्री जैन संघ ने तन–मन और धन के उचित व्यय से अनेक ग्रन्थ भंडारों का निर्माण कर के उस ग्रन्थ राशि का संरक्षण किया और आज भी ये दोनों कार्य चालु है । इन ग्रन्थ भंडारों में सञ्चित इस अमूल्य वाद संग्रह का प्रकाशन हुआ है–तो यह शुभेच्छा की अधिकारी मुमुक्षु गण इसके स्वाध्यायादि सदुपयोग द्वारा सन्मार्ग की उपासना कर के मिथ्या कदाग्रहों के विष का वमन कर के अपने शाश्वत कल्याण की ओर आगे कूच करें ।

सं० २०३१<br>
जैननगर उपाश्रय<br>
पालडी–अहमदाबाद

—जयसुन्दरविजय

# ❀ विषयसूचि ❀


| विषयः | पृष्ठ |
|---|---|
| १ कूपदृष्टान्तविशदीकरणम् | १ |
| २ मङ्गल-प्रतिज्ञा-प्रथमगाथा | १ |
| ३ द्रव्यस्तवस्य स्वपरोपकार-जनकत्वं-द्वितीयगाथा | २ |
| ४ ईषद्दुष्टत्वकथनाभिप्राये तृतीयगाथा | ४ |
| ५ कथञ्चिद्वचनयोजना | ५ |
| ६ यतनादिसत्त्वे द्रव्यस्तवे दोषाभावसमर्थनम् | ६ |
| ७ दुर्गतनारीज्ञातम् | ९ |
| ८ नयभेदेन शुद्धाशुद्धयोग-निरूपणम् | १३ |
| ९ अविधियुतपूजायाः दुष्ट-त्वविचारः | १४ |
| १० द्रव्यस्तवे आरम्भे सपापत्वे स्थूलसूक्ष्मानुपपत्ती | १६ |
| ११ आरम्भोऽप्यनारम्भः | १७ |
| १२ ध्रुवबन्धिपापहेतुत्वकथ-नानौचित्यम् | १९ |
| १३ ध्रुवबन्धादिप्रक्रिया | २० |
| १४ कूपदृष्टान्तमूत्रम् | २८ |
| १५ वादमाला (२) | २९ |
| १६ स्वत्ववादः | २९ |
| १७ सन्निकर्षवादः | ४३ |
| १८ विषयतावादः | ५९ |
| १९ विषयताद्वैविध्यम् | ६१ |
| २० विशेष्यताद्वैविध्यम् | ६२ |
| २१ उद्देश्यताविचारः | ६६ |
| २२ आपाद्यताविचारः | ७४ |
| २३ वायूष्मादेः प्रत्यक्षाऽप्रत्य-क्षत्वविवादरहस्यम् | ७९ |
| २४ वायुस्पार्शनसाक्षात्कार-समर्थनम् | ७९ |
| २५ वादमाला (३) | ९१ |
| २६ वस्तुलक्षणविवेचनम् | ९१ |
| २७ सामान्यवादः | ९७ |
| २८ विशेषवादः | १०९ |
| २९ वागादीनामिन्द्रियत्वनि-राकरणवादः | ११२ |
| ३० अतिरिक्तशक्तिवादः | १२० |
| ३१ अदृष्टसिद्धिवादः | १३३ |
| ३२ वादसङ्ग्रहगतविशेषनाम सूचिः | १४२ |
| ३३ शुद्धिपत्रकम् | १४४ |

वीतरागाय नमः

महोपाध्याय-श्रीमद्‌यशोविजयगणिसुदेशितं

# ॥ कूपदृष्टान्त विशदीकरण-प्रकरणम् ॥

ऐन्द्रश्रीर्यत्पदाब्जे विलुठति सततं राजहंसीव यस्य,
ध्यानं मुक्तेर्निदानं प्रभवति च यतः सर्वविद्याविनोदः ।
श्रीमन्तं वर्धमानं त्रिभुवन-भवनाभोग-सौभाग्य-लीला-
विस्फूर्जत्केवलश्रीपरिचयरसिकं तं जिनेन्द्रं भजामः ॥१॥
सिद्धान्तसुधास्वादी, परिचितचिन्तामणिर्नयोल्लासी ।
तत्त्वविवेकं कुरुते न्यायाचार्यो यशोविजयः ॥२॥

तत्रेयमिष्टदेवतानमस्कारपूर्वकं प्रतिज्ञागर्भा प्रथमगाथा-

**नमिऊण महावीरं, तियसिंद-णमंसियं महाभागं ।**
**विसईकरेमि सम्मं, दव्वथए कूवदिट्ठंतं ॥१॥**

व्याख्या-नत्वा महावीरं त्रिदशेन्द्रैर्नमस्कृतं, महाभागं=महानुभावं, महती आभा=केवलज्ञानशोभा तां गच्छति यः स तथा तमिति वा । विशदीकरोमि=निश्चितप्रामाण्यकज्ञानविषयतया प्रदर्शयामि । सम्यक्=असम्भावना-विपरीतभावनानिरासेन । द्रव्यस्तवे, स्वपरोपकारजनकत्वान्निर्दोषतया साध्ये इति शेषः । कूपदृष्टान्तं=अवटदृष्टान्तं, 'धूमवत्त्वाद्वह्निमत्तया साध्ये

पर्वते महानसं दृष्टान्त' इतिवदयं प्रयोगः । अत्र च भगवत-श्चत्वारो मूलातिशयाः प्रतिपादिताः । तथाहि-महावीरमित्यनेन "विदारयति यत्कर्म, तपसा च विराजते । तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥१॥" इति निरुक्तात्सकला-पायमूलभूतकर्मविदारणक्षमतपोवीर्यविराजमानत्वाभिधानादपा-यापगमातिशयः १, त्रिदशेन्द्रनमस्कृतमित्यनेन पूजातिशयः २, महाभागमित्यनेन ज्ञानातिशयः प्रतिपादितः ३, वचना-तिशयश्च सामर्थ्यगम्य इति ४ ॥१॥

प्रतिज्ञातमेवाह—

**सपरोवयारजणगं, जणाण जह कूवखणणमाइट्ठं ॥**
**अकसिणपवत्तगाणं तह दव्वथओ वि विण्णेओ ॥२॥**

व्याख्या—यथा जनानां कूपखननं निर्मलजलोत्पादनद्वारा स्वपरोपकारजनकमादिष्टम्, एवं अकृत्स्नप्रवर्त्तकानां=कृत्स्न-संयमेऽप्रवृत्तिमतां गृहिणां द्रव्यस्तवोऽपि स्नानपूजादिकः करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं विज्ञेयः । दृष्टान्ते उपकारो द्रव्यात्मा, दार्ष्टान्तिके च भावात्मेतिभावः ॥२॥

नन्वियं योजनाऽभयदेवसूरिणैव(चतुर्थ) **पञ्चाशकवृत्तौ** दूषिताऽन्यथायोजना च कृता । तथाहि—卐"न्हाणाइवि जय-णाए, आरंभवओ गुणाय णियमेणं । सुहभावहेउओ खलु विण्णेयं कूवणाएणं ॥१०॥" स्नानाद्यपि=देहशौचप्रभृतिकमपि आस्तां

卐 इत आरभ्य द्वितीयस्वस्तिकान्तः पञ्चाशकवृत्तिपाठः ।

पूजार्चादि, आदिशब्दाद्विलेपनादिग्रहः, गुणायेति योगः, यतनया=रक्षयितुं शक्यजीवरक्षणरूपया । तत्किं साधोरपीत्याशङ्क्याह-आरम्भवतः=स्वजनधनगेहादिनिमित्तं कृष्यादिकर्मभिः पृथिव्यादिजीवोपमर्दयुक्तस्य गृहिण इत्यर्थः । न पुनः साधोः,तस्य सर्वसावद्ययोगविरतत्वाद्भावस्तवारूढत्वाच्च । भावस्तवारूढस्य हि स्नानादिपूर्वकद्रव्यस्तवोऽनादेय एव, भावस्तवार्थमेव तस्याश्रयणीयत्वात्तस्य च स्वत एव सिद्धत्वात् । इमं चार्थं प्रकरणान्तरे स्वयमेव वक्ष्यतीति । गुणाय=पुण्यबन्धलक्षणोपकाराय, नियमेन=अवश्यम्भावेन । अथ कथं स्वरूपेण सदोषमप्यारम्भिणो गुणायेत्याह -'सुहभावहेउओ' त्ति लुप्तभावप्रत्ययत्वेन निर्देशस्य, शुभभावहेतुत्वात्=प्रशस्तभावनिबन्धनत्वाज्जिनपूजार्थस्नानादेः, अनुभवन्ति च केचित्स्नानपूर्वकं जिनार्चनं विदधानाः शुभभावमिति । खलुर्वाक्यालङ्कारे, विज्ञेयं=ज्ञातव्यम् । अथ गुणकरत्वमस्य शुभभावहेतुत्वात्कथमिव ज्ञेयमित्याह-कूपज्ञातेन=अवटोदाहरणेन । इह चैवं साधनप्रयोगः 'गुणकरमधिकारिणः किञ्चित्सदोषमपि स्नानादि, विशिष्टशुभभावहेतुत्वाद्, यद् विशिष्टशुभभावहेतुभूतं तद् गुणकरं दृष्टं यथा कूपखननं, विशिष्टशुभभावहेतुश्च यतनया स्नानादि,ततो गुणकरमिति' । कूपखननपक्षे शुभभावः तृष्णादिव्युदासेनाऽऽनन्दाद्यवाप्तिरिति । इदमुक्तं भवति, यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्तावनन्तरोक्तदोषा-

नपोह्य स्वोपकाराय परोपकाराय च भवत्येवं स्नानादिकमप्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेन विशिष्टाशुभकर्मनिर्जरणपुण्यबन्धकारणं भवतीति ।

इह केचिन्मन्यन्ते— पूजार्थस्नानादिकरणकालेऽपि निर्मलजलकल्पशुभाध्यवसायस्य विद्यमानत्वेन कर्दमलेपादिकल्पपापाभावाद्विषममिदमुदाहरणम्, ततः किलेदमित्थं योजनीयं यथा कूपखननं स्वपरोपकाराय भवत्येवं स्नानपूजादिकं करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं स्यादिति । नचैतदागमानुपाति, यतो धर्मार्थप्रवृत्तावप्यारम्भजनितस्याल्पस्य पापस्येष्टत्वात्, कथमन्यथा भगवत्यामुक्तं "तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे भंते ! किं कज्जइ ? गोयमा ! अप्पे पावे कम्मे बहुतराया से णिज्जरा कज्जइ" । तथा ग्लानप्रतिचरणानन्तरं पञ्चकल्याणकप्रायश्चित्तप्रतिपत्तिरपि कथं स्यात् ? इत्यलं प्रसङ्गेनेति गाथार्थ इति" 卐 ॥२॥

तदेतन्निह्नुवतां कूपदृष्टान्तविशदीकरणं काकपक्षविशदीकरणवदुपहासपात्रतामभिव्यनक्ति, स्वसम्मताभियुक्तवचनविरुद्धत्वादित्याशङ्कायां नाभियुक्तवचनविरोधो बोधोन्मुखानामवभासते, तस्य भिन्नतात्पर्यकत्वादित्याशयवानाह—

**इसिं दुट्ठत्ते जं, एयस्स नवंगिवित्तिकारेणं ।**
**संजोयणं कयं तं, विहिविरहे भत्तिमहिकिच्च ॥३॥**

व्याख्या—ईषद्दुष्टत्वे=अल्पपापबहुनिर्जराकारणत्वे, यद् एतस्य-कूपदृष्टान्तस्य, नवाङ्गीवृत्तिकारेण **श्रीअभयदेव-सूरिणा** पञ्चाशकाष्टकवृत्त्यादौ (संयोजनं कृतं), तद्विधिविरहे=यतनादिवैकल्ये, भक्तिमात्रमधिकृत्य। विधिभक्त्यादिसाकल्ये तु स्वल्पमपि पापं वक्तुमशक्यमेवेति भावः ॥३॥

कथमयमाशयः सूरेर्ज्ञात इति चेत् ?, तत्राह—

**इहरा 'कहंचि' वयणं, कायवहे कह णु होज्ज पूयाए।**
**न य तारिसो तवस्सी, जंपइ पुव्वावरविरुद्धं ॥४॥**

व्याख्या—इतरथा सूरेरुक्ताशयाभावे, पूजायां कायवधे 'कथञ्चिद्'वचनं कथं नु भवेत् ? न कथञ्चिदित्यर्थः। न च तादृशस्तपस्वी पूर्वापरविरुद्धं वचनं जल्पति। तस्मादीषद्दोषदुष्टं जिनपूजादिकं विधिविरहभक्तिकालीनमेव ग्राह्यमित्याशय एव युक्तः।

अयं भावः—पूजापञ्चाशके जिनार्चने कायवधेन प्रति-क्रुष्टेन दुष्टत्वात्कथं परिशुद्धत्वमित्याशङ्कायाम् "भण्णइ जिण-पूजाए, कायवहो जइवि होइ उ कहंचि। तहवि तई परिसुद्धा, गिहीण कूवाहरणजोगा ॥४२॥" इति **श्रीहरिभद्रसूरिभिस्स-**माहितम्। तत्र च 'यतनाविशेषेण प्रवर्त्तमानस्य सर्वथापि न भव-ती' ति दर्शनार्थं कथञ्चिद्ग्रहणमित्यभयदेवसूरिभिर्व्याख्यातम्, तेन विधिविरह एव कायवधः पर्यवस्यति। "प्रमादयोगेन

१ पूजापञ्चाशके ४२ गाथायां हरिभद्रसूरिवचनमिदम्।

प्राणव्यपरोपणं हिंसे'' ति (७·८) तत्त्वार्थोक्तहिंसालक्षणसद्भावात् हिंसारूपस्यैव कायवधस्यात्र प्रतिषेध्यत्वात् । जलपुष्पोपनयनादिरूपस्य च पूजाभ्यन्तरीभूतस्य ''देहादिनिमित्तं पि हु जे कायवहंमि तह पयट्टन्ति । जिणपूआकायवहंमि तेसिमपवत्तणं मोहो''(पू. पञ्चा. ४५) । इत्यादिना उपेत्यकरणस्याप्यनुज्ञानात्, अप्रवृत्तिनिन्दार्थवादस्य विध्याक्षेपकत्वात् । विधिस्पष्टे च निषेधानवकाशात् । यदि च विधिसामग्र्येऽपि पुष्पजलोपहारादिरूपहिंसादोषोऽत्र परिगण्येत, तदा तस्य पूजानान्तरीयकत्वेन ''कायवहो जइवि होइ उ कहंचि'' त्ति नावक्ष्यदाचार्यः, किन्तु ''कायवहो होइ जइवि नियमेण''मित्येवाऽवक्ष्यत् । अपि च पदार्थ-वाक्यार्थ-महावाक्यार्थ-ऐदंपर्यार्थविचारणायां हिंसासामान्यस्य निषेधस्य अविधिनिषेधपरताया एव व्यवस्थितत्वात् विधिसामग्र्ये न हिंसादोषः, अन्यथा चैत्यगृह-लोचकरणादौ तत्सम्भवो दुर्निवार इत्यादिसूक्ष्ममीक्षितमुपदेशपदादौ ।

एतेन ''कहन्नं भन्ते जीवा अप्पाउत्ताए कम्मं पगरेंति ? पाणे अइवइत्ता, मुसं वइत्ता, तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभित्ता एवं खलु जीवा अप्पाउयत्ताए कम्मं पगरन्ति'' इत्यत्र अध्यवसायविशेषादेतत्त्रयं जघन्यायुःफलमिति व्याख्याय (तम्) ।

अन्ये तु यो जीवो जिनसाधुगुणपक्षपातितया तत्पूजार्थं पृथिव्याद्यारम्भेण स्वभाण्डासत्योत्कर्षणादिना आधाकर्म्मादिकरणेन च प्राणातिपातादिषु वर्त्तते तस्य वधादिविरतिनिरवद्यदाननिमित्तायुष्कापेक्षयेयमल्पायुष्कताऽवसेया, अविशेषणत्वेऽपि सूत्रस्य प्राणा तपातादिविशेषस्य अवश्यं वाच्यत्वात्, अन्यथैतस्तृतीयसूत्रे प्राणातिपातादितः अशुभदीर्घायुष्कतावचनानुपपत्तेः । न हि सामान्यहेतोः कार्यवैषम्यं युज्यते । अपि च अल्पतरपापबहुतरनिर्जराहेतुताया अशुद्धदाने अभिधास्यमानत्वाद् नैवेयं क्षुल्लकभवग्रहणरूपा अल्पायुष्कता । न हि स्वल्पपापबहुनिर्जरानिबन्धनस्यानुष्ठानस्य क्षुल्लकभवग्रहणनिमित्तता सम्भाव्यते जिनपूजाद्यनुष्ठानस्याऽपि तथात्वप्रसङ्गादिति व्याख्यानेऽपि विधिवैकल्यवत्येव जिनपूजा ग्राह्येति द्रष्टव्यम् । अशुद्धदानादिदृष्टान्तैः क्रियमाणाया जिनपूजाया विधिशुद्धाया ग्रहणानौचित्यात् । "काऊण जिणायणेहिं मण्डियं सयलमेइणीवट्टं दाणाइचउक्केण वि सुट्ठु वि गच्छिज्ज अच्चुअं न परओ" त्ति **महानिसीथे** सामान्यतो जिनपूजाया दानादिचतुष्कतुल्यफलकत्वोपदेशेन विशेषे विशेषस्यैव औपम्यौचित्यात् ।

किञ्च—"संविग्गभावियाणं लुद्धयदिट्ठंतभावियाणं च मुत्तूण खित्तकालं भावं च कहंति सुद्ध ंछं" [बृहत्कल्पभाष्ये गा. १६०७] त्येतत्पर्यालोचनया लुब्धकदृष्टान्तभावितानामागमा-

र्थाऽव्युत्पन्नानामेव अशुद्धदानसम्भवस्तादृशानामेव च जिनपूजासम्भवोऽपि विधिवैकल्यवानेव सम्भवतीति ।

यत्तु-'गुणवते पात्राय(या)ऽप्रासुकादिद्रव्यदाने चारित्रकायोपष्टम्भान्निर्जरा, व्यवहारतो जीवघातेन चारित्रबाधनाच्च पापं कर्म्म, तत्र स्वहेतुसामर्थ्या(त्या)पेक्षया बहुतरा(निर्जरा) निर्जरापेक्षया च अल्पतरं पापं भवति तच्च कारण एव, यत उक्तं-"संथरणंमि असुद्धं दुन्न वि गिह्णंतदं(?दिं)तयाणऽहियं । आउरदिट्ठंतेणं तं चेव हियं असंथरणे" [निशीथभाष्य गा. १६५०] त्ति-तद्गीतार्थान्यतरपदवैकल्य एव युज्यते, तत्साकल्ये स्वल्पस्यापि पापस्याऽसम्भवात्, व्यवहारतो बाधकस्याबाधकत्वात् । स्वहेतुसामर्थ्यस्य द्रव्यभावाभ्यामुपपत्तेः । अयमेवातिदेशो विधिशुद्धजिनपूजायां द्रष्टव्यः ।

अन्यैस्त्वकारणेऽपि गुणवत्पात्रायाप्रासुकादिदाने परिणामवशात् बहुतरा निर्जरा अल्पतरं च पापकर्म्मेति च प्रतिपादितम्, परिणामप्रामाण्यात् । "संथरणमी०"त्यादौ अशुद्धं द्वयोरपि दातृगृहीत्रोरहितायेति च व्यवहारतः संयमविराधकत्वात् । दायकस्य लुब्धकदृष्टान्तभावितत्वेनाव्युत्पन्नत्वेन च देवगतौ शुभाल्पाऽऽयुष्कतानिमित्तत्वादिति योजितम् । अयमतिदेशोऽव्युत्त्पु(त्प)न्नीयपूजायां दृष्टव्य इति ॥४॥

तदिदमखिलम्मनसिकृत्याह-

**सम्भावणे विसद्दो दिट्ठंतोऽनणुगुणो पयंसेइ ।**
**सामण्णाणुमईए सूरी पुण अंसओ बाहं ॥५॥**

व्याख्या-सदोषमपि स्नानादि(दी)त्यत्रापिशब्दः सम्भावने, तेन (न) सर्वं सदोषमेव, यतनादिसत्त्वे भावोत्कर्षे दोषाभावात् । दृष्टान्तोऽशुद्धदानरूपः शुद्धजिनपूजायामननुगुणोऽननुकूलः । सूरिः=अभयदेवसूरिः पुनः, सामान्यानुमतौ=स्नानत्वपूजात्वाद्यवच्छेदेन निर्दोषत्वानुमितौ "न चैतदाऽऽगमानुपाती" त्यादिना अंशतो बाधं प्रदर्शयति । विधिविरहितायाः पूजायाः कर्दमोपलेपादितुल्योऽल्पदोषो दुष्टत्वात् । भवति चांशतो बाधप्रतिसन्धानेऽवच्छेदकावच्छेदेनाऽनुमितिप्रतिबन्धः । सामानाधिकरण्येनानुमितौ तु नायमपि दोष इति विभावनीयं सुधीभिः ॥५॥

ननु परिमाण(णाम)प्रामाण्ये विधिवैगुण्येऽपि को दोष इत्याशङ्क्याह-

**दुग्गयनारीणाया जइवि पमाणीकया हवइ भत्ती ।**
**तहवि अजयणाजणिआ हिंसा अन्नाणओ होई ॥६॥**

(व्या०) दुर्गतनारीज्ञाताद् यद्यपि प्रमाणीकृता भवति भक्तिः, तथापि अयतनाजनिता हिंसाऽज्ञानतो भवति, 'प्रमादानाभोगाभ्यां प्राणभूतानि हिनस्ती'ति वचनात् । तथा च तत्र आचार्योक्तितः कूपदृष्टान्त उपतिष्ठत एव । अत्युत्पन्नायतनाजनितस्य दोषस्योत्तरशुभभावदृष्ट्यैव शोधयितुं शक्यत्वात् । भक्त्यनुष्ठानमपि अविधिदोषं निरनुबन्धीकृत्य

परम्परया मुक्तिजनकमिति केचित् ब्रुवते। हरिभद्राचार्यास्तु * "अभ्युदयफले चाद्ये निश्रेयससाधने तथा चरमे" इत्याहुः। आद्ये=प्रीतिभक्त्यनुष्ठाने, चरमे=वचनाऽसङ्गानुष्ठाने।

दुर्गतनारीज्ञातं चैवं—श्रीमन्महावीरवर्द्धमानस्वामी इक्ष्वाकुकुलनन्दनः प्रसिद्धसिद्धार्थपार्थिवपुत्रः पुत्रीयितनिखिलभुवनजनो जनितजनमनश्चमत्कारगुणग्रामो ग्रामाकरनगरपृथुं पृथिवीं विहरन्नन्यदा कदाचित्काकन्दीनामिकायां पुरि समाजगाम। तत्र चाऽमरचरविसरविरचितसमवसरणमध्यमवर्तिनि भगवति धर्मदेशनां विदधति नानाविधयानवाहनममारूढप्रौढपत्तिपरिगते सिन्धुरस्कन्धमधिष्ठिते छत्रच्छन्ननभःस्थले मागधोद्गीतगुणगणे भेरीभाङ्कारभरिताम्बरतले नरपतौ तथा तद्विधवरवैश्यादिकपुरजने तथा गन्धधूपपटलप्रभृतिपूजापदार्थव्यग्रकरकिङ्करीनिकरपरिगते विविधवसनाभरणरमणीयतरशरीरे नगरनारीनिकरे भगवतो वन्दनार्थं व्रजति सति एकया वृद्धदरिद्रयोषिता जलेन्धनाद्यर्थं बहिर्निर्गतया कश्चिन्नरः पृष्टः क्वाऽयं लोक एकमुखस्त्वरितं याति? तेनोक्तं जगदेकबान्धवस्य देहिनां जरामरणरोगशोकदौर्गत्यादिदुःखछिदुरस्य श्रीमन्महावीरस्य वन्दनपूजनाद्यर्थम्। ततस्तच्छ्रवणात् तस्या भगवति भक्तिरभवत्। अचिन्तयच्च, अहमपि भगवतः पूजार्थं यत्नं करोमि, केवलमहमतिदुर्गता पुण्यरहिता विहितपूजाङ्गवर्जितेति।

---

* एतदनुष्ठानानां विज्ञेये इह गतापाये॥ इति उत्तरार्द्ध दशमषोडशके गा ६।

ततोऽरण्याऽऽदृष्टानि मुधा लभ्यानि सिंदुवारकुसुमानि स्वयमेव गृहीत्वा भक्तिभरनिर्भराङ्गी'अहो ! धन्या पुण्या कृतार्था कृतलक्षणा, सुलब्धं मम जन्म, जीवितफलं चाहमवाप' इति भावनया पुलककण्टकितकाया प्रमोदजलप्लावितकपोला भगवन्तं प्रति प्रयान्ती समवसरणकाननयोरन्तराल एव वृद्धतया क्षीणायुष्कतया च झगिति पञ्चत्वमुपगता । ततो सा विहितपूजाप्रणिधानोल्लसितमानसतया देवत्वमवाप्तवती । ततस्तस्याः कडेवरमवनिपीठलोठितमवलोक्याऽनुकम्पापरीतान्तःकरणो लोको मूर्छितेयमिति मन्यमानोऽम्भसा सिषेच । ततस्तामपरिस्पन्दामवलोक्य लोको भगवन्तं पप्रच्छ, "भगवन् ! असौ वृद्धा किं मृतोत जीवतीति ?" भगवांस्तु व्याजहार यथा— "मृताऽसौ देवत्वं चावाप्ता" । ततः पर्याप्तिभावमुपागत्य प्रयुक्तावधिः पूर्वभवानुभुतमवगम्य मद्वन्दनार्थमागतः, स चायं मत्पुरोवर्ती देव इति । ततो भगवदभिहितमिदमनुश्रुत्य समस्तः ससमवसरणधरणीगतो जनः परमं विस्मयमगमत् । यथा "अहो पूजाप्रणिधानमात्रेणापि कथममरतामवाप्तासाविति" । ततो भगवान्गम्भीरां धर्मकथामकथयत्, यथा—स्तोकोऽपि शुभाध्यवसायो विशिष्टगुणपात्रविषयो महाफलो भवति । यतः "इक्कंपि उदगबिन्दु, जह पक्खित्तं महासमुद्दंमि । जाए अक्खयमेवं, पूयावि जिणेसु विन्नेया । उत्तमगुणबहुमाणो, पयमुत्तमसत्तमज्झयारंमि । उत्तमधम्मपसिद्धी, पूयाए जिण-

वरिंदाणं ॥ [पूजा पश्चा. गा. ४७-४८]" ति। ततो भगवां-स्तत्सम्बन्धिनं भाविभवव्यतिकरमकथयत् । यथा अयं दुर्गत-नारीजीवो देवसुखान्यनुभूय ततश्च्युतः सन् कनकपुरे नगरे कनकध्वजो नाम नृपो भविष्यति। स च कदाचित्प्राज्यं राज्य-सुखमनुभवन् मण्डूकं सर्पेण, सर्पं कुररेण, कुररमजगरेण, तमपि महाहिना ग्रस्यमानमवलोक्य भावयिष्यति, यथा—"एते मण्डू-कादयः परस्परं ग्रसमाना महाहेर्मुखमवशा विशन्ति, एवमेते-ऽपि जना बलवन्तो दुर्बलान्यथाबलं बाधयन्तो यमराजमुखं विशन्ति" इति भावयंश्च प्रत्येकबुद्धो भविष्यति। ततो राज्य-सम्पदमवधूयश्रमणत्वमुपगम्य देवत्वमवाप्स्यति। एवं भवपर-म्परयाऽयोध्याया नगर्याः शक्रावतारनाम्नि चैत्ये केवल-श्रियमवाप्यसेत्स्यति इति गाथार्थः ॥६॥

यतनां चात्र स्नानपूजादिगतामित्थमादिशन्ति,—"भूमी-पेहणजल-च्छाणणाइ जयणा उ होइ न्हाणादौ । एत्तो विसुद्धभावो, अणुहवसिद्धोच्चिअ बुहाणं" ॥ तथा "एसो चेव इहं विही, विसेसओ सव्वमेव जत्तेणं ॥ जह रेहंति तह सम्मं, कायव्वमणण्णचिट्ठेणं ॥ वत्थेण बंधिऊणं, णासं अहवा जहा समाहीए । वज्जेयव्वं तु तहा, देहम्मि वि कंडुयणमाइ [पूजापश्चाशके गा. ११-१९-२०]॥" इत्यादि ।

नन्वेवं विध्यंशेऽशुद्धो भक्त्यंशे च शुद्धो योगः प्राप्तः, तथा च कथं न तत एकविधकर्मबन्धः ? न च

मिश्रं कर्म शास्त्रे प्रोक्तं येन मिश्रात्ततो मिश्रं कर्म बध्येतेत्याशङ्कायामाह—

**सुद्धासुद्धो जोगो, एसो ववहारदंसणाभिमओ ।**
**णिच्छयणओ उ णिच्छई, जोगज्झवसाणमिस्सत्तं ॥७॥**

व्याख्या—एष दुर्गतनारीसदृशानां जीवानां विधिवैधुर्येऽपि भक्तिकालीनो जिनपूजायोगः अशुद्धदानादिवच्छुद्धाशुद्धः=आंशिकशुद्ध्यशुद्धिवान् व्यवहारदर्शनस्य=व्यवहारनयस्य अभिमतः । ततश्च वाग्व्यवहारमात्रसिद्धेर्नान्यत्फलम् । निश्चयनयस्तु योगा(गेन)ध्यवसायस्थानानां मिश्रत्वं नेच्छति, अशुभरूपाणां शुभरूपाणां च शास्त्रे प्रतिपादनात् तृतीयराशेरकथनादिति स्पष्टं **महाभाष्ये** ।

ननु (न च) समूहालम्बनोपयोगरूपस्याध्यवसायस्य सम्भवात्कथं तदप्रतिपादनमिति वाच्यम् , समूहालम्बनज्ञानस्य विशेषणीयत्वाद् , त्रिध्यौपयिकस्य विशिष्टोपयोगस्यैवमधिकृतत्वादिति युक्तमुत्पश्यामः । तथा चाविध्यंशे उत्कटत्वेऽशुद्ध एव, भक्त्यंशे पुनरुत्कटत्वे शुद्ध एव योग इत्येतन्मते एकस्माद्योगादेकदैक एव बन्धः, बन्धकालस्य प्रदीर्घत्वात् परिणामपरावृत्त्या च मिश्रत्वं भावनीयम् ।

एकधारारूढे तु भक्तिभावेऽविधिदोषोऽपि निरनुबन्धतयाद्रव्यरूपतामश्नुवंस्तत्र भग्न इवावतिष्ठते । एकधारारूढेऽविधि-

भावेऽप्यविधिभक्तिपर्यवसायिनि विधिपक्षादूषकतामप्यसहमाने भक्तिभावस(?स्य)तथा अविधियुतस्य विषयेऽप्यर्चनादेर्भावस्तवाहेतुत्वेन नद्रव्यस्तवत्वमिति प्रतिपादनादिति विवेचकाः ।।७।।

ननु किमित्येवमविधियुतभक्तिकर्मणो व्यवहारतो निश्चयतो वा बन्धप्रदीर्घकालापेक्षया मिश्रत्वमुच्यते, यावता द्रव्यहिंसयैव जलपुष्पादिजीवोपमर्दरूपया मिश्रत्वमुच्यताम्, उत्तरकालिकचैत्यवन्दनादिभावस्तवेन तद्दोषापनयनात्कूपदृष्टान्तोपपत्तेः ? इत्याशङ्कायामाह–

**जइ(अ)विहिजुयपूयाए, दुट्ठत्तं दव्वमित्तहिंसाए ।**
**तो आहारविहारप्पमुहं साहूण किमदुट्ठं ।।८।।**

व्याख्या–यदि(द्य)विधियुतपूजायां=विधियुतभक्तिकर्मणि, द्रव्यमात्रहिंसया दुष्टत्वं स्यात्, 'तो'त्ति=तर्हि–साधूनामाहारविहारप्रमुखं किमदुष्टमुच्यते ? तदपि दुष्टमेव वक्तुमुचितम्, तत्रापि द्रव्यहिंसादोषस्यावर्जनीयत्वात् । यतनया तत्र न दोष इति चेत् ? अत्रापि किं न तथा ! जिनपूजादौ द्रव्यहिंसाया असदारम्भप्रवृत्तिनिवृत्तिफलत्वेनाहिंसारूपत्वात् । तदुक्तम्–

"असदारंभपवत्ता, जं च गिही तेण तेसि विण्णेया । तण्णिव्वित्तिफलच्चिय, एसा परिभावणीयमिणं ।।१।।" (पू०पञ्चा० ४३) व्याख्या-असदारम्भप्रवृत्ताः=प्राण्युपमर्दनहेतुत्वेनाशोभनकृष्यादिव्यापारप्रसक्ताः, यद्यस्माद्धेतोः, चशब्दः समुच्चये,

गृहिणः=गृहस्थाः, तेन हेतुना, तेषां गृहिणां, विज्ञेया=ज्ञातव्याः, तन्निवृत्तिफलैव देहगेहादिनिमित्तजीवोपमर्दनरूपाशुभारम्भनिवृत्तिप्रयोजनैव । भवति हि जिनपूजाजनितभावविशुद्धिप्रकर्षेण चारित्रमोहनीयक्षयोपशमसद्भावात्कालेनासदारम्भेभ्यो निवृत्तिः । तथा जिनपूजाप्रवृत्तिकाले चाऽसदारम्भाणामसम्भवात् शुभभावसम्भवाच्च तन्निवृत्तिफलाऽसौ भवतीत्युच्यते । एषा=जिनपूजा, परिभावनीयं=पर्यालोचनीयम् ,इदं जिनपूजाया असदारम्भनिवर्तनफलत्वं भर्त्राद्भिरपि, येनावबुध्य तथैव प्रतिपद्यते, इति गाथार्थः" इति पञ्चाशकवृत्तौ ।

* 'यतनातो न च हिंसा, यस्मादेषैव तन्निवृत्तिफला ।
तदधिकनिवृत्तिभावाद्विहितमतोऽदुष्टमेतदिति ॥१६॥"[षष्ठषोडशके]

अत एवाऽऽपेक्षिकाल्पायुष्कताधिकारे "नन्वेवं प्राणातिपातमृषावादावप्रासुकदानं च कर्तव्यतामापन्नमिति चेत्? आपद्यतां नाम भूमिकाविशेषापेक्षया, को दोषः? अत एव यतिधर्माऽशक्तानां द्रव्यस्तवद्वारेण प्राणातिपातादौ प्रवृत्तिः प्रवचने प्रोक्ते ति भगवतीवृत्तावुक्तम् । अत्र यतिधर्माशक्तत्वम् असदारम्भप्रवृत्तत्वम् अधिकारिविशेषणं द्रष्टव्यम्। कूपज्ञातान्यथानुपपत्त्या पूजादिकाले द्रव्यहिंसाजनितं पापमवर्जनीयमेव, आज्ञायोगादाहारविहारादिकं साधूनां न दुष्टमिति चेत्? अत्रापि परिमितसंसारफलकत्वार्थवादेनानुकम्पादाविवाज्ञायोगः किं न

* 'तदुक्तमि' त्यत्राप्यनुवर्त्तते ।

कल्प्यते ? उक्तं हि-संसारप्रतनुताकारणत्वं द्रव्यस्तवस्य, तत्र दानादिचतुष्कतुल्यफलकत्वोपवर्णनमप्यत्रोपष्टम्भकमेव ॥८॥

अथ 'द्रव्यस्तवे यावानारम्भस्तावत्पापमि' त्यत्र स्थूलानुपपत्तिमाह—

**जावइओ आरंभो, तावइयं दूषणंति गणणाए ।**
**अप्पत्तं कह जुज्जइ, अप्पपि विसं च मारेइ ॥९॥**

व्याख्या-द्रव्यस्तवे यावानारम्भस्तावद्दूषणमिति गणनायां क्रियमाणायां, ऋजुसूत्रनये प्रतिजीवं भिन्नभिन्नहिंसाऽऽश्रयणादसङ्ख्यजीवविषय आरम्भः, एकभगवद्विषया च भक्तिरिति अल्पपापबहुतरनिर्जराकारणत्वं सर्वथाऽनुपपन्नम् । आत्मरूपहिंसाऽहिंसावादिशब्दादिनयमते त्वाह-अल्पमपि विषं च हालाहलं मारयति । आध्यात्मिक आरम्भो यद्यल्पोऽपि स्यात्तदापुण्यानुबन्धिपुण्यप्राप्तिर्न स्यादेव, व्याध्याद्य(?धा)पेक्षया * कर्णजीविनामिवाल्परसस्यापि तस्य शुभकर्मविरोधित्वादिति भावः॥९॥

सूक्ष्मानुपपत्तिमाह—

**' कक्कसवेज्जमसायं बन्धइ पाणाइवायओ जीवो" ।**
**इय भगवईइ भणियं ता कह पूयाइ सो दोसो ॥१०॥**

"कर्कशवेदनीयमसातं बध्नाति प्राणातिपाततो जीवः" इति भणितं भगवत्यां तत्कथं पूजायां=भगवच्चरणार्चायां स प्राणातिपाताख्यो दोषः अल्पोऽपि हि ? तस्मिन् सति

* कर्णजीवी=नाविकः ।

कर्कशवेदनीयं कर्म बध्येताऽसातवेदनीयं च, इष्यते च भगवत्-पूजया कर्कशवेदनीयकर्माऽबन्धः स्वल्पसातवेदनीयबन्धश्चेति विपरीतमापन्नमायुष्मतः ॥१०॥

तस्मादयमारम्भोऽप्यनारम्भ एव श्रद्धेय इत्याह—

**आरम्भो वि हु एसो हंदि अणारम्भओत्ति णायव्वो।**
**वहविरईए भणिअं जमकक्कसवेयणिज्जं तु ॥११॥**

आरम्भोऽप्येष द्रव्यस्तवभावी, हंदीत्यामन्त्रणे, अनारम्भ इति ज्ञातव्यः, असदारम्भनिवृत्त्यंशप्राधान्यात् । यद्=यस्मादकर्कशवेदनीयकर्म वधविरत्यैव बध्यत इति भणितं भगवत्याम् । उपलक्षणमिदं सातवेदनीयबन्धस्य ।

अत्रालापका—' अत्थि णं भन्ते ! जीवाणं कक्कसवेयणिज्जा कम्मा कज्जंति ? हंता अत्थि । कहण्णं भंते ! जीवाणं कक्कसवेयणिज्जा कम्मा कज्जंति ? गोयमा ! पाणाइवाएणं जाव मिच्छादंसणसल्लेणं, एवं खलु गो० जीवाणं कक्कसवेयणिज्जा कम्मा कज्जंति । अत्थि णं भंते ! णेरइयाणं कक्कस० एवं चेव, एवं जाव वेमाणिआणं । अत्थि णं भंते ! जीवाणं अकक्कसवेयणिज्जा कम्मा कज्जंति ? हंता अत्थि । कहण्णं भंते ! जीवाणं अकक्कसवेयणिज्जा कम्मा कज्जंति ? गो० पाणाइवायवेरमणेणं जाव परिग्गहवेरमणेणं, कोहविवेगेणं जाव मिच्छादंसणसल्लविवेगेणं । एवं खलु गोयमा ! जीवाणं अक-

क्कसवेयणिज्जं कम्मं कज्जइ। अत्थि णं भंते ! णेरइआणं अकक्कस-वेयणिज्जा कम्मा कज्जंति ? णो इणठ्ठे समट्ठे । एवं जाव वेमाणियाणं णवरं मणुस्साणं जहा जीवाणं । अत्थि णं भंते ! जीवाणं सातवेदणिज्जा कम्मा कज्जंति ? हंता अत्थि कहण्णं भंते ! जीवाणं सातावेदणिज्जा कम्मा कज्जंति ? गो० पाणाणुकंपयाए, भू० जी० सत्ताणुकंपयाए । बहूणं पाणाणं जाव सत्ताणं अदुक्खणयाए, असोअणयाए, अजूरणयाए, अतिप्पणयाए अपीडणयाए अपरियावणयाए एवं खलु गो०जीवाणं सातावेदणिज्जा कम्मा कज्जंति । एवं णेरइआण वि। एवं जाव वेमाणिआणं । अत्थि णं भंते ! जीवाणं अस्सायावेदणिज्जा कम्मा कज्जंति ? हंता अत्थि । कहण्णं भंते ! जीवाणं अस्सा-यावेअणिज्जा कम्मा कज्जंति ? गो० परदुक्खणयाए, परसो-अणयाए, परजूरणयाए, परतिप्पणयाए, परपरितावणयाए, बहूणं पाणाणं जाव सत्ताणं दुक्खणयाए जाव परितावणयाए एवं खलु गो० जीवाणं अस्सायावेअणिज्जा कम्मा कज्जंति । एवं णेरइआण वि जाव वेमाणियाणं ।।"

कर्कशरौद्रदुखैर्वेद्यते यानि तानि कर्कशवेदनीयानि । स्कन्दकाऽऽचार्यसाधूनामिव । अकर्कशेन सुखेन वेद्यन्ते यानि तान्यकर्कशवेदनीयानि भरतादीनामिव । दुःखस्य करणं दुःखनं तद् (न) विद्यते यस्य तद्भावोऽदुःखनता तया । एतदेव प्रपञ्च्यते-असोयणयाए त्ति दैन्यानुत्पादेन, अजूरण-

याए–शरीरापचयकारि-शोकानुत्पादनेन, अतिप्पणयाए त्ति अश्रुलालादिक्षरणकारिशोकानुत्पादनेनः अपिट्टणयाएत्ति यष्ट्यादिपीडनपरिहारेण, अपरितावणयाए-शरीरपीडानुत्पादनेनेति वृत्तिः ॥

**वस्तुनो** अनिवर्त्तनीयाशुभानुबन्धं कर्कशवेदनीयम्, अतादृशमकर्कशवेदनीयम्। वैमानिकादिषु तन्निषेधश्च प्रौढिवादः विशिष्टविरतिपरिणामजनिताऽशुभानुबन्धापनयापेक्षया। अन्यथा मिथ्यादर्शनशल्यविरमणस्याऽपि तत्र नैष्फल्यापत्तेः; सर्वसंवरस्य च शैलेश्यामेव सम्भवादिति द्रष्टव्यम्।

**एतेन** "देवेष्वकर्कशवेदनीयकर्मकरणनिषेधादेव द्रव्यस्तवस्य न तद्धेतुत्वमिति" दुर्वादिमतमपास्तं, ज्ञेया सकामायमिनामि' (योगशास्त्रे) त्यादिवदीदृशप्रौढिवादानामुत्कृष्टनिषेधपरत्वादन्यथा तदीयभगवद्वन्दनगुणोत्कीर्त्तनादीनामप्यतादृशत्वाऽऽपत्तेरिति विभावनीयं सुधीभिः ॥११॥

ननु द्रव्यस्तवे भक्तिजन्यसातावेद्यबन्धेन विरुध्यमसातबन्धो मा भूत्, पृथिव्याद्युपमर्दात् ज्ञानावरणीयादिबन्धहेतुत्वादेव तस्य हिंसात्वमक्षतमित्याशङ्कायामाह–

**धुवबन्धिपावहेउत्तणं ण दव्वत्थयंमि हिंसाए।**
**धुवबन्धा जमसञ्ञा, तत्ते इयरेयरासयया ॥१२॥**

ध्रुवबन्धिपापस्य ज्ञानावरणादिप्रकृतिकदम्बकरूपस्य हेतुत्वं न द्रव्यस्तवीयहिंसायां वक्तुं युक्तम्। यद्=यस्मात् ध्रुव-

बन्धा असाध्याः । प्रक्रमाद् द्रव्यस्तवभाविहिंसायाः सामान्यहेतुत्वसद्भावे ह्यवश्यंसम्भविबन्धाः । अत एव यत्र गुणस्थाने तासां व्यवच्छेदस्ततोऽर्वाक् सततबन्ध एवेति सादिसान्तादिभङ्गग्रन्थे व्यवस्थितम् ।

**अथा**ऽसातप्रकृतित्वावच्छिन्न इव पापप्रकृतित्वावच्छिन्नेऽपि हिंसाया हेतुत्वस्य शास्त्रे व्यवस्थितत्वात् "यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेष" इति न्यायात् द्रव्यस्तवस्थलीयहिंसाया ज्ञानावरणीयादिप्रकृतिविशेषे हेतुत्वम् , भक्तिरागोपनीयमानप्रकृतिविशेषेषु बहुभागपाताच्च तत्राऽल्पतरभागोपनिपातेनाल्पत्वमिति चेत् ? तत्राह—तत्त्वे=द्रव्यस्थलीयहिंसायाः ध्रुवबन्धिपापप्रकृतिविशेषहेतुत्वे इतरेतराश्रयता=अन्योन्याश्रयदोषः । द्रव्यस्तवीयद्रव्यहिंसाया भाव[स्तव]हिंसात्वसिद्धौ उक्तहेतुत्वसिद्धिः, तत्सिद्धौ च भावहिंसात्वमिति । द्रव्यहिंसा त्वाऽऽसयोगिकेवलिनमवर्जनीया । एवंविधे चार्थसमाजसिद्धे चार्थे नियतोक्तहेतुत्वाश्रयणे पौषधादावतिप्रसङ्गस्तदाप्यल्पज्ञानावरणीयादिबन्धानुपरमादिति दिक् ॥

**अत्रेयं ध्रुवबन्धादिप्रक्रिया**-निजहेतुसद्भावे यासामवश्यं भावी बन्धस्ताः ध्रुवबन्धिन्यस्ताश्च वर्णचतुष्कं, तैजसं, कार्मणमगुरुलघु, निर्माणोपघातभयकुत्सामिथ्यात्वं, कषायाः

ज्ञानावरणपञ्चकं, दर्शनावरणनवकं, विघ्नपञ्चकमिति सप्तचत्वारिंशत् ।

यासां च निजहेतुसद्भावेऽपि नावश्यंभावी बन्धस्ता अध्रुवबन्धिन्यस्ताश्चौदारिकवैक्रियाहारकशरीराणि, तदुपाङ्गानि ३, संहननषट्कं, संस्थानषट्कं, गतिचतुष्कं, खगतिद्विकमानुपूर्वीचतुष्टयं, जिननामोच्छ्वासनामोद्योतनामाऽऽतपनाम पराघातनाम, त्रसदशकं, स्थावरदशकं, गोत्रद्विकं, वेदनीयद्विकं, हास्यादियुगलद्वयं, जातिपञ्चकं, वेदत्रयमायुश्चतुष्टयमिति त्रिसप्ततिः ।। एतासां निजहेतुसद्भावेऽप्यवश्यंबन्धाऽभावात् ।

तथाहि—पराघातोच्छ्वासनाम्नोः पर्याप्तनाम्नैव सह बन्धो नाऽपर्याप्तनाम्नाऽतोऽध्रुवबन्धित्वम् । आतपं पुनरेकेन्द्रियप्रायोग्यप्रकृतिसहचरितमेव बध्यते नान्यदा । उद्योतं तु तिर्यग्गतिप्रायोग्यबन्धिनैव सह । आहारकद्विकजिननाम्नी अपि यथाक्रमं संयमसम्यक्त्वप्रत्ययेनैव बध्येते नान्यदेत्यध्रुवबन्धित्वम् । शेषशरीरादिषट्षष्टिप्रकृतीनां सविपक्षत्वान्निजहेतुसद्भावेऽपि नाऽवश्यं बन्ध इति तथात्वं सुप्रतीतम् ।

तत्र ध्रुवबन्धिनीषु भङ्गत्रयम्, अनाद्यनन्तो बन्धः, अनादिसान्तः, सादिसान्तश्च । तत्र प्रथमभङ्गकः सर्वासामपि तासामभव्याश्रितः, तद्बन्धस्यानाद्यनन्तत्वादिति । द्वितीयभङ्गकस्तु ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकलक्ष-

णानां चतुर्दशप्रकृतीनाम् , अनादिकालात् संतानभावे प्रवृत्तस्य बन्धस्य सूक्ष्मसम्परायचरमसमये यदा व्यवच्छेदः तदा। आसामेव चतुर्दशप्रकृतीनामुपशान्तमोहे यदाऽबन्धकत्वमासाद्याऽऽयुःक्षयेणाद्धाक्षयेण वा प्रतिपतितः सन् पुनर्बन्धेन सादिबन्धं विधाय भूयोऽपि सूक्ष्मसम्परायचरमसमये यदा बन्धविच्छेदं विधत्ते तदा तृतीयः। संज्वलनकषायचतुष्कस्य तु सदैव प्रवृत्तबन्धभावस्य यदाऽनिवृत्तिबादरादिर्बन्धविच्छेदं विधत्ते तदा द्वितीयः। ततः प्रतिपतितस्य पुनर्बन्धेन संज्वलनबन्धं सादिं कृत्वा कालान्तरेऽनिवृत्तिबादरादिभावप्राप्तौ तद्बन्धविच्छेदसमये तृतीयः। निद्राप्रचलातैजसकार्मणवर्णचतुष्काऽगुरुलघूपघातनिर्माणभयजुगुप्सास्वरूपाणां त्रयोदशप्रकृतीनामनादिकालादनादिबन्धं विधाय यदाऽपूर्वकरणाद्धायां यथास्थानं बन्धोपरमं करोति तदा द्वितीयो भङ्गः। यदा तु ततः प्रतिपतितस्य पुनर्बन्धेन सादित्वमासादयन् बन्धः कालान्तरेऽपूर्वकरणमारूढस्य निवर्त्तते तदा तृतीयः। चतुर्णां प्रत्याख्यानावरणानां बन्धो देशविरतगुणस्थानकं यावदनादिस्ततः प्रमत्तादौ बन्धोपरमात् सान्त इति द्वितीयः। प्रतिपतितबन्धापेक्षया तृतीयः। अप्रत्याख्यानावरणानां त्वविरतसम्यग्दृष्टिं यावदनादिबन्धं कृत्वा देशविरतादावबन्धकत्वसमये द्वितीयः। प्रतिपातापेक्षया तृतीयः। मिथ्यात्वस्त्यानर्द्धित्रिकानन्तानुबन्धिनां तु मिथ्यादृष्टिरनादिबन्धको यदा

सम्यक्त्वाऽवाप्तौ बन्धोपरमं करोति तदा द्वितीयो भङ्गः। पुनर्मिथ्यात्वे गत्वा तान् बद्ध्वा यदा भूयोपि सम्यक्त्वलाभेन बध्नाति तदा तृतीयः। इत्येवं ध्रुवबन्धिनीनां भङ्गत्रयम्। साद्यनन्तभङ्गकस्तु विरोधादेवानुद्भाव्यः। अध्रुवबन्धिनीनां त्वध्रुवबन्धित्वादेव सादिसान्तलक्षण एक एव भङ्गो लभ्यते। अधिकमस्मत्कृतकर्मप्रकृतिवृत्त्यादेरवसेयम्॥

प्रणिधानप्रधाने तु चैत्यवन्दनेन तदपनीयते। अत एव प्रणिधानाद्याशयराहित्यात् द्रव्यक्रियारूपत्वेन पूजाया द्रव्यस्तवत्वं इत्यत्राह—"दव्वथओ पुप्फाईण उ पणिहाणाइ विरहओ चेव, पणिहाणाई अन्ते भिण्णं पूव्विं तु सामण्णं। दव्वथउ पुप्फाई, सन्तगुणकित्तणा भावे" इति निर्युक्तिवचनाद्द्रव्येण पुष्पादिना स्तवो द्रव्यस्तव इति व्युत्पत्तेर्जिनपूजाया द्रव्यस्तवत्वमुच्यते। गुणवत्तया ज्ञानजनकः शब्द इत्यत्र वर्णध्वनिसाधारणं ताल्वोष्ठपुटादिजन्यव्यापारत्वं शब्दत्वमिति जन्यान्तपरिहारेण व्यापारमात्रस्यैव ग्रहणौचित्यात्। आलङ्कारिकमते चेष्टादिव्यापारस्य व्यञ्जकस्य ग्रहणावश्यकत्वेनोक्तपरिहारस्यावश्यकत्वाच्च। न तु प्रणिधानादिविरहादेव द्रव्यस्तवत्वं, तथा सति तुच्छत्वेनाऽप्राधान्यरूपद्रव्यपदार्थत्वप्रसङ्गात्।

तदुक्तं षोडशके—"प्रणिधि-प्रवृत्ति-विघ्नजय-सिद्धि-विनियोग-भेदतः प्रायः। धर्मज्ञैराख्यातः, शुभाशयः

पञ्चधात्र विधौ ॥१॥ प्रणिधानं तत् समये, स्थितिमत्तदधः कृपानुगं चैव । निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं च ।२॥ तत्रैव तु प्रवृत्तिः शुभसारोपायसङ्गतात्यंतम् । अधिकृतयत्नातिशयादौत्सुक्यविवर्जिता चैव ॥३॥ विघ्नजय-स्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः । मार्गे इह कण्टक-ज्वर-मोहजयसमः प्रवृत्तिफलः॥४॥सिद्धिस्तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया । अधिके विनयादियुता, हीने च दयादिगुणसारा ॥५॥ सिद्धेश्चोत्तरकार्यं, विनियोगोऽवन्ध्यमेतदेतस्मिन् । सत्यन्वयसम्पत्त्या, सुन्दरमिति तत्परं यावत् ॥६॥ आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽनुमन्तव्याः । भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा"॥७॥ इति। न च सर्वापि जिनपूजाऽप्राधान्येनैव द्रव्यरूपा, अपूर्वत्वप्रतिसन्धानविस्मयभवभयादिवृद्धिभावाऽभावाभ्यां द्रव्यभावेतरविशेषस्य तत्र तत्र प्रतिपादनात् ॥

यत्तु प्रणिधानादि अन्ते=चैत्यवन्दनान्ते प्रोक्तं, तद्भिन्नं=विशिष्टतरं, पूर्वं तु सामान्यं, सर्वक्रियासामान्ये भावत्वाऽऽपादकमिति भावः ।

कथमन्ते प्रणिधानादि भिन्नमिति चेदत्राहुः—"एयस्स समत्तीए कुसलं पणिहाणमो उ कायव्वं । एत्तो पवित्तिविग्घजयसिद्धि तहय त्थिरीकरणं-"(पू. पञ्चा. २१) एतस्य चैत्यवंदनस्य समाप्तौ कुशलं शुभं, प्रणिधानं=प्रार्थनागतमेकाग्र्यम्, उ इति निपातः पादपूरणे, कर्त्तव्यं=विधेयं,यस्मादितः प्रवृत्तिः=सद्धर्म-

व्यापारेषु प्रवर्त्तनं, जातमनोरथानां यथाशक्ति तदुपाये प्रवृत्तेः। विघ्नजयो मोक्षपथप्रवृत्तिप्रत्यूहस्य जघन्यमध्यमोत्कृष्टस्याऽशुभभावरूपस्य प्रणिधानजनितशुभभावान्तरेणाभिभवात्। तथा सिद्धिर्विघ्नजयात् प्रस्तुतधर्मव्यापाराणां निष्पत्तिः। तथैव च स्थिरीकरणं=स्वगतपरमधर्मव्यापाराणां स्थिरत्वाधानं, परयोजनाध्यवसायेनाऽनुबन्धाऽविच्छेद इति यावत्।

"एत्तो च्चिय ण णियाणं, पणिहाणं बोहिपत्थणासरिसं। सुहभावहेउभावा णेयं इहरा पवित्ती य ॥" (पू. पञ्चा० ३०) इत एव=कुशलप्रवृत्त्यादिहेतुत्वादेव, बोधिप्रार्थनाऽऽरोग्यबोधिलाभसमाधिवरप्रार्थना। इतरथा निदानत्वेऽप्रवृत्तिरन्त्यप्रणिधाने स्यात्, सा चाऽनिष्टा। "एवं तु इट्ठसिद्धी दव्वपवित्ती उ अण्णहा णियमा। तम्हा अविरूद्धमिणं णेयमवत्थंतरे उचिए॥" (पू० पञ्चा० ३१) एवं पुनः प्रणिधानप्रवृत्ताविष्टसिद्धिः, प्रणिधानयुक्तचैत्यवन्दनस्य भावानुष्ठानत्वेन सकलकल्याणकारित्वात्। द्रव्यप्रवृत्तिस्त्वन्यथा=प्रणिधानं विना नियमात्, तस्माद्धेतोरेतत्प्रणिधानमविरुद्धम्, अवस्थान्तर अप्राप्तप्रार्थनीयगुणावस्थायां, तच्च 'जयवीअराए'त्यादि। न चेदं निदानं, मोक्षाङ्गप्रार्थनात्वात् बोधिप्रार्थनावत्। तीर्थकरत्वप्रार्थना चौदयिकभावांशे निदानं, छत्रचामरादिविभूतिप्रार्थनाया भवप्रार्थनारूपत्वात्, न तु क्षायिकभावांशे, तत्र तीर्थकरत्वोपलक्षितकेवलज्ञानादेरेव काम्यत्वात्तस्य च साक्षान्मोक्षांगत्वात्।

आह च "मोक्खंगपत्थणा इय न नियाणं तदुचियस्स विण्णेयं । सुत्ताणुमईओ जह बोहीए पत्थणा माणं ।" (पू० प० ३६) इय=एषा "जयवीयराए"त्यादिका, तदुचितस्य=प्रणिधानोचितस्य, प्रमत्तसंयतान्तस्य गुणस्थानिन इत्यर्थः । सूत्रानुमतेः, साभिष्वङ्गस्य तस्य निरभिष्वङ्गताहेतुत्वेन सूत्रे प्रणिधानाऽभिधानात् , यथा बोधेः प्रार्थना मानं=निदानत्वाऽभावसाधकमनुमानं, दृष्टान्तावयवेऽनुमानत्वोक्तिरूपत्वात् । "एवं च दसाईसु तित्थयरंमि वि णियाणपडिसेहो । जुत्तो भवपडिबद्धं साभिस्संगं तयं जेणं ॥' (पू. पञ्चा० ३७) भवप्रतिबद्धं 'भवभ्रमणले(तो)प्यहं तीर्थकरो भूयासमि'ति विकल्पेन संसारप्रार्थनानुप्रविष्टं साभिष्वंगं रागोपेतं, 'तयं' ति तकत्तीर्थकरत्वम् ।

**वस्तुतः** औदयिकभावप्रकारत्वाऽवच्छिन्नतीर्थकरभवनेच्छाया एव निदानं(त्वं), तेन तीव्रसंवेगवतः 'कतिपयभवभ्रमणतोऽप्यहं सिद्धो भूयासमि'त्यस्येवोक्तसङ्कल्पस्य न निदानत्वमित्युक्तावपि न क्षतिः । तीर्थकरत्वविभुतेरप्यकाम्यत्वमधिकृत्योक्तमन्यैरपि "देवागमनभोयानचामरादिविभूतयःमायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महानि" ॥ ति (आ. मि. १) जं पुण णिरभिस्संगं धम्मा एसो अणेगसत्तहिओ । णिरूवमसुहसंजणओ अउव्वचिंतामणीकप्पो॥ १ ॥तो एयाणुट्ठाणं हियमणु-(ह) वहयं पहाणभावस्स । तेसि पविात्तसरूवं अत्थावत्तीइ तम-

दुट्ठं ॥२॥ (पू० पश्चा० ३८-३९) यत्पुनस्तीर्थंकरत्वप्रार्थनं निरभिष्वंगं तददुष्टमिति सम्बन्धः ॥ यथा धर्मात्कुशालानुष्ठानादेष तीर्थंकरो भवतीति गम्यम् । किंभूतः ? अनेकसत्त्वहितः निरुपमसुखसंजननः, अपूर्विचन्तामणिकल्पः । तत्तस्मादेतत्तीर्थंकरानुष्ठानं धर्मदेशनादि-हितं पथ्यमनुपहतमप्रतिघातं, इतिर्गम्यः । इति प्रधान (ग)भावस्य एवंभूतसुन्दराध्यवसायस्य, तस्मिन् धर्मदेशनादौ जिनानुष्ठाने प्रवृत्तिस्वरूपं=प्रवर्त्तनस्वभावं, अर्थाऽऽपत्त्या न्यायतः, साभिष्वंगस्य तीथकरत्वप्रार्थनस्य दुष्टत्वान्यथानुपपत्त्या निरभिष्वंगं तददुष्टमिति न्यायप्राप्तम् । न च वैयधिकरण्यं, पुत्रस्य ब्राह्मणत्वाऽन्यथानुपपपत्त्या पित्रोर्ब्राह्मणत्वं न्याय्यमितिवदुपपत्तिरिति भावः ।

उभयभावोपरागविनिर्मुक्ततीर्थंकरत्वप्रार्थना किं रूपेति चेत् ? औदयिकभावप्रार्थनाविशिष्टा निदानं, क्षायिकभावप्रार्थनाविशिष्टा चाऽनिदानम् । वैशिष्ट्यं सामानाधिकरण्य-तत्तद्व्यवधानाभावकूटसम्बन्धाभ्याम् । समूहालम्बनेच्छायां तु मानाभावो, भावे वाऽऽस्तां निदानत्वाऽनिदानत्वे अव्याप्यवृत्तिजाती, इत्यादि प्रमाणार्णवसंप्लवव्यसनिनां गोचरः पन्थाः ।

तदेवमन्ते स्तवफलप्रार्थनारूपं प्रणिधानं भिन्नं, पूर्वं तु क्रियमाणस्तवोपयोगरूपं भिन्नमित्यनुपयोगरूपत्वेन द्रव्यस्तवे नाऽवद्याशङ्का विधेयेति स्थितम् ॥

॥ सम्पूर्णम् ॥

## कूपदृष्टान्तविशदीकरण मूलम् ।

नमिऊण महावीरं, तियसिंदणमंसियं महाभागं ।
विसईकरेमि सम्मं दव्वथए कूवदिट्ठंतं ॥ १ ॥
सपरोवयारजणगं, जणाण ज हकूवखणणमाइट्ठं ।
अकसिणपवत्तगाणं, तह दव्वथओ वि विण्णेओ ॥ २ ॥
इंसि दुट्ठत्ते ज, एयस्स नवगिवित्तिकारेणं ।
संजोयणं कयं तं, विहिविरहे भत्तिमहिकिच्च ॥ ३ ॥
इहरा कहंचि' वयण, कायवहे कह णु होज्ज पूयाए ।
न य तारिसो तवस्सी, जंपइ पुव्वावरविरुद्धं ॥ ४ ॥
सम्भावणे विसट्टो दिट्ठंतोऽनणुगुणो पयंसेइ ।
सामण्णाणुमईए सूरी पुण अंसओ बाहं ॥ ५ ॥
दुगयनारीणाया जइवि पमाणीकया हवइ भत्ती ।
तहवि अजयणाजणिआ हिंसा अन्नाणओ होइ ॥ ६ ॥
सुद्धासुद्धो जोगो, एसो ववहारदंसणाभिमओ ।
णिच्छयणओ उ णिच्छई, जोगज्झवसाणमिस्सत्तं ॥ ७ ॥
जइ(अ)विहिजुयपूयाए, दुट्ठत्त दव्वमित्तहिंसाए ।
तो आहारविहारप्पमुहं साहूण किमदुट्ठं ॥ ८ ॥
जावइओ आरंभो तावइयं दूषणंति गणणाए ।
अप्पत्तं कह जुज्जइ, अप्पंपि विसं च मारेइ ॥ ९ ॥
"कक्कसवेज्जमसायं बन्धइ पाणाइवायओ जीवो" ।
इय भगवईइ भणियं ता कह पूयाइ सो दोसो ॥ १० ॥
आरम्भो दि हु एसो हंदि अणारम्भओत्ति णायव्वो ।
बहविरईए भणिअं जमकक्कसवेयणिज्जं तु ॥ ११ ॥
धुवबन्धिपावहेउत्तण ण दव्वत्थयंमि हिंसाए ।
धुवबन्धा जमसज्झा, तत्ते इयरेयरासयया ॥ १२ ॥

---

न्यायाचार्य—मुनिपुङ्गवश्रीमद्यशोविजयोपाध्यायोपदीकृता

# ० वादमाला (२) ०

ऐन्द्रश्रेणिनतं नत्वा सर्वज्ञं तत्त्वदेशिनं ।
बालानामुपकाराय वादमाला निबद्ध्यते ॥१॥

तथा प्राचां गुम्फो विशदरचनाऽऽढ्योपि न यथा,
नवीनानां पन्थाः प्रथयति मुदं निर्मलधियाम् ।
अपि स्नेहोदारास्तरलतरुणीनामिव दृशां,
विकारा वृद्धानामपि किमिह यूनां मदकृते ॥२॥

वादमालामिमां बालाः कुरुध्वं कण्ठभूषणं ।
यया सभायां शोभा स्यान्नवीनैस्तर्कमौक्तिकैः ॥३॥

## तत्रादौ स्वत्ववादः ।

स्वत्वमतिरिक्तं, प्रतिग्रहादिजन्यस्य यथेष्टविनियोगजनकस्य व्यापारविशेषस्य धननिष्ठस्य स्वामिनिरूप्यस्य कल्पनादिति केचित् । तन्न, चौर्याद्यनन्तरं यथेष्टविनियोगात्तत्रापि स्वत्वकल्पनापत्तेः।स्वरूपसतः स(स्व)त्वस्य यथेष्टविनियोगहेतुत्वे मयेदमर्जितमिति ज्ञानाभावेऽपि यथेष्टविनियोगापत्तेः । तादृशज्ञानविशेषितस्य तस्य तद्धेतुत्वे लाघवादावश्यकत्वाच्च तादृशज्ञानस्यैव तद्धेतुत्वे स्वत्वाऽसिद्धेः । न च स्वत्वज्ञानमेव तद्धेतुर्विनियोगरूपायाः प्रवृत्तेरिष्टसाधनताधीजन्यतया तन्निरपेक्षत्वात् । न च स्वत्वविशिष्टस्यैवेष्टसाधनत्वं, स्वत्वास्पदाऽना-

स्पदयोर्विनियोगे फले विशेषाभावात् , न हि परकीयान्नभक्षणे बुभुक्षा न प्रशाम्यतीति ।

**न च** यथेष्टविनियोगत्वं प्रवृत्तिगतो जातिविशेषस्तदवच्छिन्ने स्वत्वज्ञानमवश्यं हेतुरिति **वाच्यम्**, तादृशजातौ मानाभावादनिष्टशङ्काजनितभयाभावादेव यथेष्टत्वोपपत्तेः । भावेऽपि तत्रावश्यकत्वेन स्वार्जितत्वादिज्ञानस्यैव हेतुत्वाच्च । न च "प्रतिग्रहादिक्रिया प्रतिग्रहीत्रादिसम्बन्धजनिका कर्मकर्तृनिरूप्यत्वाद्गमनवदि"त्यनुमानं तयोः स्वत्वाख्ये सम्बन्धे मानम् , कर्मकर्तृभावेन सिद्धसाधनात् , । न च ग्रामं गच्छतीत्यत्र संयोगवत्साक्षात्सम्बन्धः साध्यः; ग्रामं त्यजतीत्यादावनैकान्तिकत्वात् । न हि तत्र त्यागक्रियया कर्तृकर्मणोः कश्चित्साक्षात्सम्बन्धो जन्यते । नापि स्वंस्वमित्यनुगतप्रत्यय एव स्वत्वे मानम् , तदसिद्धेरननुगतस्यैव तद्विषयत्वात् । न चानुगतव्यवहारमात्रात्तत्सिद्धिः, शब्दानुगमेन विषयानुगमस्य कल्पयितुमशक्यत्वादन्यथा सिंहादेष्वपि हरिर्हरिरित्यनुगतव्यवहारादतिरिक्तो हरित्वपदार्थः कल्पनीयः स्यादिति **नैयायिकसम्प्रदायः** ॥

**नव्यास्तु** स्वत्वं न यथेष्टविनियोगविषयत्वं, तादृशविनियोगोपायविषयत्वं वा । विषयताया धनस्वरूपत्वे पूर्वं क्रयादेरुत्तरं च विक्रयादेः स्वत्वाऽप्रच्यवप्रसङ्गात् । क्रयादिस्वरूपत्वे च तदपगमेऽपि स्वत्वाभावप्रसङ्गात् । न च यद्व्यति-

रेकेण यथेष्टविनियोगाऽसम्भवनिश्चयः शास्त्राविरुद्धतदुपायविषयत्वरूपं यथेष्टविनियोगयोग्यत्वं स्वत्वम् , तदुपायानां क्रयप्रतिग्रहादीनां क्रियात्वेनास्थिरत्वेऽपि तद्विषयत्वं स्थिरमेव ज्ञाननिवृत्ताविव तद्विषयत्वम् । न चैवं यत्क्रीत्वा विक्रीतं, गृहीत्वा दत्तं, तत्रापि तद्विषयतासत्त्वाद्विक्रेत्रादिस्वत्वव्यवहारप्रसङ्गो, न हि क्रयाद्युपायविषयत्वमात्रं योग्यता किन्तु स्वव्यतिरेकप्रयुक्तयथेष्टविनियोगाऽसम्भवनिश्चयसहकृतं, तत्र च न पूर्वक्रयव्यतिरेकप्रयुक्तो विनियोगाऽसम्भवः किन्तु विक्रयप्रयुक्त इति क्रयजनिता योग्यता विक्रयादेकस्य निवर्त्ततेऽन्या त्वन्यस्योत्पद्यत इति प्रतियोगितावच्छेदकविशेषिताऽभावभेदवत्तत्तद्व्यतिरेकप्रयुक्तत्वविशेषितविनियोगाऽ—सम्भवनिश्चयभेदेन योग्यताभेदाभ्युपगमे दोषाभावादिति **लीलावत्युपाय**लिखितेऽप्यास्थाबन्धः कर्त्तुं युक्तः । शास्त्राविरुद्धत्वविशेषणादाने चौर्यादिना गृहीतेऽपि स्वत्वप्रसङ्गात्तद्दाने च शास्त्रस्यैव "परस्वं नाददीते"त्यादिरूपस्य स्वत्वाप्रतीतावप्रतीतेः । तस्मात्**परस्वं नाददीते**त्यादिकं शास्त्रमेवातिरिक्तस्वत्वे प्रमाणमित्याहुः ।

तच्च स्वत्वं प्रतिग्रहोपादान-क्रयण-पित्रादिमरणैर्जन्यते । दानादिभिश्च नाश्यते, कारणानामेकशक्तिमत्त्वात्कार्याणां वैजात्याद्वा कार्यकारणभावनिर्वाह इति **पदार्थतत्त्वविवेककृतः** । अत्र स्वत्वत्वावच्छिन्नं प्रति कारणतावच्छेदकतया प्रतिग्रहादि-

ष्वेका, स्वत्वनाशत्वावच्छिन्नम्प्रति कारणतावच्छेदकतया विक्रयादिष्वपरा शक्तिस्तृणादीनामिव वह्नौ सिद्ध्यति ।

स्वत्वत्वञ्च जातिरखण्डोपाधिर्वा । स्वत्वनाशे च जातेरसत्त्वेऽप्यखण्डोपाधिरेव जन्यतावच्छेदकः । वाकारोऽस्वरससूचनाय, स च बहुतरजातिकल्पनामपेक्ष्यैकस्याः शक्तेरेव कल्पनायां लाघवादिति **रामभद्रसार्वभौमाः** । प्रतिग्रहादीनामेकशक्तिमत्त्वेन स्वत्वमात्रेऽविशेषेण हेतुत्वे संकल्पभेदेन प्रतिग्रहादेः साधारण्येनाऽसाधारण्येन च स्वत्वोत्पत्तिः, उपादानादेस्त्वसाधारण्येनैवेति व्यवस्थित्यनिर्वाहात्स्वामिनिष्ठतया विजातीयस्वत्वे प्रतिग्रहादीनां संकल्पविशेषादिसम्बन्धेन विशिष्य हेतुत्वे त्वाद्यकल्पाऽस्वरस एव युक्त इति **ध्येयम्** ।

**यदि च** चैत्रीयस्वत्वत्वावच्छिन्ने चैत्रीयप्रतिग्रहादीनामेकशक्तिमत्त्वेनैकशक्तिमत्सम्बन्धेन विषयनिष्ठतया हेतुत्वं पुरुषापेक्षया विषयानां बहुत्वेनावच्छेदककोटौ तन्निःक्षेपायोगात् ; प्रतिग्रहे चैत्रीयत्वञ्च चैत्रोद्देश्यकसंकल्पपूर्वकत्वं, तावदुद्देश्यकसंकल्पपूर्वकप्रतिग्रहाच्च तावत्स्वामिकस्वत्वसम्भव इति कार्यवैजात्यस्याऽनानुभविकत्वात्तदवच्छिन्ने विशिष्य हेतुत्वमयुक्तमिति **सूक्ष्ममीक्ष्यते**,तदा सार्वभौमोक्तमेव सम्यक् ।

**यत्तु** क्वचिद्विक्रयप्रागभावविशिष्टः क्रयविनाशः, क्वचिच्च दानादिप्रागभावविशिष्टः प्रतिग्रहादिध्वंस एव स्वत्वं,

प्रतिग्रहादेःपूर्वं प्रतिग्रहादिध्वंसविरहादाऽऽदानाद्यनन्तरं च तत्-प्रागभावविरहान्न स्वत्वव्यवहारो, विक्रयादिप्रागभावविशिष्टस्य क्रयध्वंसस्य, क्रयध्वंसविशिष्टस्य विक्रयप्रागभावस्य च विनिगमकाभावेन तथात्वादाद्यमादाय स्वत्वमुत्पन्नमित्यस्य द्वितीयमादाय च 'स्वत्वं नष्टमि'त्यस्य प्रत्ययस्य सङ्गतिः, अतिरिक्तस्वत्ववादिना स्वत्वत्वमप्यतिरिक्तमुपेयमित्यावश्यकत्वादास्तामुपदर्शितेषु ध्वंसादिषु स्वत्वकल्पनापीति सार्वभौमैः सम्प्रदायमतं समाहितम्, तच्चिन्त्यं, यदेवान्यस्मै दत्तं, कालान्तरे तेन दीयमानमात्मना प्रतिगृहीतं पुनश्चान्यस्मै दत्तं, तत्र प्राथमिकदानानन्तरं पुनः प्रतिग्रहादर्वागप्यग्रिमदानप्रागभावविशिष्टताऽप्रच्यवेन स्वत्वव्यवहारप्रसङ्गात् । दानध्वंसाऽसमकालीनत्वेन दानप्रागभावविशेषणे चान्तरा प्रतिग्रहकृतस्वत्वोच्छेदप्रसङ्गात् । न च स्वप्रयोज्यदानप्रागभावोपादानात् प्रतिग्रहांतरप्रयुक्तदानप्रागभावमादायाऽदोष इति वाच्यम्, तथापि यत् प्रतिगृहीतमदत्तमेव नंक्ष्यति तत्र स्वप्रयोज्यदानप्रागभावाऽसिद्धेः । तत्र शुद्धः प्रतिग्रहध्वंस एव स्वत्वं, शुद्धे ह्यतिप्रसक्ते विशेषणमुपादीयते । निर्विशेषणे च तत्र ध्वस्तस्वत्वव्यवहारोऽपि नास्त्येवेति चेत् ? न, आश्रयनाशेऽपि तन्नाशानुपपत्तेः ।

किञ्च क्लृप्तध्वंसादिष्वेवातिरिक्तस्वत्वत्वकल्पनेन स्वत्वापलापे क्लृप्ताधिकरणेष्वेवाऽभावत्वमात्रकल्पनेनाभावस्याप्य-

पलापप्रसङ्ग इति यत्किञ्चिदेतत् । तस्मात्ततत्प्रतिग्रहादिजन्यं, तत्तत्दानदिनाश्यं स्वत्वमतिरिक्तमेव । एतच्च वृत्तिनियामकविशेषणताविशेषण स्वर्णादिद्रव्यनिष्टं, 'स्वर्णे स्वत्वमि'ति प्रत्ययात्। निरूपकत्वाख्यविशेषणताविशेषेण च स्वामिनिष्ठम् , 'अत्रास्य पुरुषस्य स्वत्वमि'ति प्रत्ययात् । **न चैवम**'स्मिन् पुरुषे एतद्द्रव्यस्वामित्वमि'त्यादिधीः कथं स्यात् ? निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वादन्यथैतस्मिन् पुरुषे एतद्द्रव्यस्वत्वमितिप्रत्ययस्यापि प्रसङ्गादिति **चेत्** ? अत्र **वदन्ति** निरूपकतासम्बन्धेन स्वत्वमेव न स्वामित्वम् , अपि त्वयमस्य स्वामीत्यादिप्रतीतिसिद्धं तदपि पदार्थान्तरम् । तच्च वृत्तिनियामकविशेषणताविशेषेण स्वामिनिष्टं, निरूपकत्वाख्यविशेषणताविशेषेण च धननिष्ठमिति न दोषः ।

**केचित्तु** स्वत्वमेव स्वामित्वम् , न तु पदार्थान्तरं, निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वेऽपि तन्निरूपकत्वस्य स्वरूपसम्बन्धेन वर्त्तमानत्वादेवात्र पुरुषेऽस्य द्रव्यस्य स्वामित्वमिति प्रत्ययोपपत्तेरित्याहुः। **तदसत्** , विनिगमकाभावात् , स्वामित्वमेव पदार्थान्तरं तन्निरूपकत्वमेव स्वत्वमिति व्यत्ययस्यापि सुवचत्वात् , । स्वत्वस्वामित्वयोः स्वामित्वस्वत्वनिरूपकतात्मकत्वे स्वस्वामिपदशक्यतावच्छेदकगौरवाद्विभिन्नतदुभयपदार्थकल्पनाया एवौचित्यादिति ।

**अथैवं** स्वत्वस्वामित्वयोर्भिन्नपदार्थत्वे चैत्रस्य धनमित्यादौ स्वत्वं वा षष्ठ्यर्थः स्वामित्वं वेत्यत्र विनिगमनाविरहः । **न च** स्वामित्वस्य षष्ठ्यर्थत्वे चैत्रस्य धनमितिवद्धनस्य चैत्र इत्यपि प्रत्ययः स्याच्चैत्रस्य धननिरूपितस्वामित्वाश्रयत्वादिति **वाच्यम्**, स्वत्वस्य षष्ठ्यर्थत्वेऽपि तादृशप्रत्ययस्य दुर्वारत्वाद्धननिष्ठस्वत्वनिरूपकत्वाच्चैत्रस्य । षष्ठ्यर्थस्वत्वस्य निरूपितत्वसम्बन्धेनैव प्रकृत्यर्थे विशेष्यतयाऽऽश्रयतासम्बन्धेनैव चानुयोगिनि विशेषणतयान्वयो न तु सम्बन्धान्तरेणेति व्युत्पत्तिकल्पने च स्वामित्वस्य षष्ठ्यर्थत्वेऽपि षष्ठ्यर्थस्वामित्वस्य निष्ठतासम्बन्धेनैव प्रकृत्यर्थे विशेष्यतया निरूपकतासम्बन्धेनैव चानुयोगिनि विशेषणतयान्वयो न तु सम्बन्धान्तरेणेति व्युत्पत्तेरपि सुवचत्वादिति **चेत्**?, स्वामित्वस्य षष्ठ्यर्थत्वे चैत्रीये धनेऽपि नेदं चैत्रस्येति व्यवहारापत्तेः, स्वामित्वस्य चैत्रवृत्तितया तदभावस्य सुतरां धने सत्त्वात् ।

**अथ** तत्र तत्संसर्गाभावबोधे तत्र तत्पदोपस्थापितस्य प्रतियोगिनः तादात्म्यातिरिक्तसम्बन्धेनान्वयबोधस्तन्त्रम्, नत्वाधाराधेयभावेन । येन च सम्बन्धेन यत्पदोपस्थापितस्य प्रतियोगिनोऽन्वयस्तत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्, अन्यथा स्वत्वस्यापि संयोगादिनाऽभावस्य सार्वत्रिकत्वेन तवाऽप्यतिप्रसङ्गात् । तथा च प्रकृते निरूपकतासम्ब-

न्धावच्छिन्नप्रतियोगिताकचैत्रनिष्ठस्वामित्वाभावस्य धनादाव-भावान्नातिप्रसङ्ग इति **चेत्** ? **न**, तस्य वृत्त्यनियामकतयाऽत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् ।

**ननु** वृत्त्यनियामकसम्बन्धस्य कथं न प्रतियोगिताव-च्छेदकत्वम् ? येन सम्बन्धेन यत्र प्रतियोगिग्रहे तेन सम्बन्धेन तत्र तदभावग्रहस्तस्यैव तदभावप्रतियोगितावच्छेदकत्वात् । येन सम्बन्धेन प्रतियोगिमति तदभावो नास्ति स एव प्रति-योगितावच्छेदक इत्युपगमे संयोगेन रूपाद्यभावादेरप्यसिद्ध्या-पत्तेरिति **चेत्** ? **न**, संयोगादिना घटाभावादिप्रत्ययवन्निरूपक-तया स्वामित्वाद्यभावप्रत्ययविरहाद्वृत्त्यनियामकसम्बन्धमात्र-स्याभावप्रतियोगितानवच्छेदकत्वकल्पनात् । **यदि च** 'भूतलं न घट' इत्यादौ तादात्म्यावच्छिन्नप्रतियोगिताकत्वमानुभविकं, तत्र तादात्म्यसंसर्गाविशेषितप्रतियोगितया घटविशिष्टाभावभाना-भ्युपगमे 'घटो न घट' इत्यस्यापि प्रसंगात् , घटे घटात्यन्ता-भावसत्त्वात् , धर्मात्यन्ताभावस्य धर्मिभेदत्वेऽपि तादात्म्या-वच्छिन्नधर्मिनिष्ठप्रतियोगिताकत्वाभावाद् नातिप्रसङ्ग इति **विभाव्यते**, तदापि वृत्त्यनियामकसम्बन्धमात्रस्य संसर्गाभाव-प्रतियोगितानवच्छेदकत्वनियमो निर्बाध एव, तेन क्वचिदपि तदऽप्रत्ययात् । संयोगेन गगनाद्यभावे च गगनादिसंयोगो न प्रतियोगितावच्छेदकः, किन्तु संयोगत्वेन घटादिसंयोग एवेति न दोषः ।

**न चैवं** स्वत्वस्य षष्ठ्यर्थत्वेऽपि धनस्वामिन्यपि 'नायं धनस्ये'ति व्यवहारापत्तिः, धननिरूपितस्वामित्वस्य पुरुषवृत्तित्वेऽपि धननिष्ठस्वत्वस्य पुरुषावृत्तित्वादिति **वाच्यम्**, इष्टत्वात् । स्वामित्वस्य षष्ठ्यर्थत्वेऽपि तत्र निष्ठतासम्बन्धेनैव प्रकृत्यर्थान्वयस्य व्युत्पन्नतया तादृग्व्यवहारस्य दुर्वारत्वात् । **न च** तथापि वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वनये स्वामित्वस्य षष्ठ्यर्थत्वे न किमपि बाधकमिति **वाच्यम्**, तन्नयेऽपि प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वस्यैवाभावविरोधितया गगनादिसंयोगिनि घटादौ संयोगसम्बन्धावच्छिन्नगगनाद्यभाववच्चैत्रनिष्ठस्वामित्वनिरूपकेऽपि धने निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताकचैत्रनिष्ठस्वामित्वाभावस्य वृत्तौ बाधकाभावेन चैत्रीयेऽपि 'नेदं चैत्रस्ये'ति व्यवहारापत्तेर्दुर्वारत्वात् ।

**न चैवं** संयोगसम्बन्धावच्छिन्नगगनाद्यभाववद्विषयतासम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाद्यभावस्यापि केवलान्वयित्वं स्यात्, न स्याच्च विषयतासम्बन्धेन ज्ञानादेः केवलान्वयित्वम्, तस्याऽधिकरणत्वानियामकतया तेन सम्बन्धेन ज्ञानाद्यधिकरणत्वस्यैवाऽप्रसिद्धेरिति **वाच्यम्**, इष्टत्वात्, ज्ञानविषयत्वादेरेव केवलान्वयित्वात् ।

**यदि च** वृत्त्यनियामकसम्बन्धोऽप्यत्यन्ताभावप्रतियोगितावच्छेदकः, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसम्बन्धि-

त्वमेवाभावधीविरोधि । अत एव प्रलय एव परमाणौ, उत्पत्तिकाल एव चावयविनि संयोगसम्बन्धावच्छिन्नगगनाद्यभावो नान्यदा । न च संयोगेन गगनकुण्डादेरवृत्तित्वं तेन तदभावस्वीकारं विना दुर्वचं, यत्सम्बन्धे यत्सम्बन्धावच्छिन्नाधारतायाँ वा यदधिकरणानुयोगिकत्व--यत्प्रतियोगिकत्वोभयाभावस्तेन तत्र तदवृत्तित्वमिति विशिष्यैव निर्वचनात् । अत एव ज्ञानविषयत्वादिवद्विषयतासम्बन्धेन ज्ञानादिकमपि केवलान्वयि विषयतासम्बन्धावच्छिन्नज्ञानाद्यभावस्त्वलीकः, **इति मतमाद्रियते**, तदाऽस्तु विनिगमकाभावात् स्वत्व-स्वामित्वोभयमेव षष्ट्यर्थः । तात्पर्यग्रहस्य नियामकत्वादेव च चैत्रस्य धनमित्यादौ नियमत उभयानवगमस्यान्यतरावगमस्य चोपपत्तेः ।

इत्थं च निष्ठतया षष्ट्यर्थस्वामित्वान्वयतात्पर्ये निरूपितत्वेनैव तत्र प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वा'न्नायं धनस्ये'-त्यस्याप्यनापत्तिरिति **ध्येयम्** ।

**केचित्तु** अत्र चैत्रस्य स्वामित्वं नात्र चैत्रस्य स्वामित्वमित्यादिप्रतीत्यनुरोधान्निरूपकत्वमपि वृत्तिनियामकमेव । न चात्र स्वामित्वपदं स्वत्वपरं, सप्तम्या वा निरूपितत्वे लक्षणेति कल्पना युक्ता, गौरवात् । एतेनैवात्र स्वत्वनिरूपकत्वमेव स्वामित्वमित्येकदेशोऽपि, स्वत्वे सप्तम्यर्था-

न्वयो, नञर्थे च स्वत्वनिरूपकत्वसंसर्गाभावे चैत्रस्येत्यस्यान्वय इत्यपि प्रत्युक्तम् , 'नात्र चैत्रस्य स्वामित्वं किन्तु मैत्रस्ये'त्यत्र चैत्रनिष्ठस्वामित्वाभाव-मैत्रनिष्ठस्वामित्वयोरेकवृत्तित्वोल्लेखाच्च । न च निरूपकत्वस्य वृत्तिनियामकत्वे 'धनं स्वामी'ति बुद्धिः स्यादिति वाच्यम् , स्वामित्वप्रकारकबुद्धेरिष्टत्वात् । 'स्वामी'त्यभिलापजनिका बुद्धिः स्यादिति चेत् ? न, तादृशाभिलापे स्वामिचैत्रादिगतस्वरूपसम्बन्धेन विशिष्टबुद्धेरेव हेतुत्वात् । अन्यथा कालिकसम्बन्धोऽपि वृत्तिनियामको न स्यात् । 'कालो गौरि'त्याद्यभिलापजनकबुद्धेस्ततोऽभावात् । तस्माद् यथा कालिकसम्बन्धेन विशिष्टबुद्धे रिदानीं घट' इत्यादिरेवाभिलापस्तथा निरूपकतासम्बन्धेन स्वामित्वनिष्ठबुद्धेश्चैत्रस्य स्वामित्वमित्यादिरेवाभिलाप इति ।

किं च, चैत्रस्य न धनमि'त्यादौ 'स्वामित्वसम्बन्धेन धनाभावश्चैत्रसम्बन्धी'त्येव बोधः, धनस्य प्रतियोगित्वोल्लेखान्यथानुपपत्त्या वृत्त्यनियामकस्यापि स्वामित्वादेः सम्बन्धस्य प्रतियोगितावच्छेदकत्वाङ्गीकारात् । अत 'एवाऽधनोऽयं, धनशून्योऽयमपुत्रोऽयं 'पुत्ररहितोऽसावि'त्यादयो व्यवहाराः । न चात्र धनादिपदं तत्स्वामित्वपरं, मुख्ये बाधकाभावात् । न च स्वामित्वादिसम्बन्धेन धनत्वाद्यवच्छिन्नप्रतियोगिताकाभावान्तरकल्पनमेव बाधकम् , धनादिस्वामित्वत्वाद्यवच्छिन्नाभावानतिरिक्तत्वात् । तथापि स्वामित्वसम्बन्धावच्छिन्नधनादिनिष्ठप्र-

तियोगितान्तरकल्पने गौरवमिति चेत् ? न, प्रतियोगितायाः धनादिस्वरूपायाः क्लृप्तत्वेन गौरवाभावाद्धनादेः प्रतियोगित्वोल्लेखिप्रतीतेर्गौरवस्य प्रमाणिकत्वाच्च ।

**एतेन** स्वामित्वादिसम्बन्धेन धनाद्यभावकल्पने तद्बुद्धौ धनादिमत्तानिश्चयत्वेन प्रतिबन्धकत्वान्तरकल्पने गौरवमि**त्यपास्तम्** । स्वामित्वादेः प्रतियोगितानवच्छेदकत्वेऽपि विशेषाऽदर्शिनस्तादृशप्रतीतेस्तत्सम्बन्धेन तथा प्रतिबध्य-प्रतिबन्धकभावस्यापि क्लृप्तत्वाच्च । स्वामित्वादिसम्बन्धेन नञोऽभावबोधनेऽनुयोगिपदे षष्ट्यादेर्नियामकत्वाच्च नातिप्रसङ्गः ।

**किञ्च**, नेदं चैत्रस्येत्यत्र स्वत्वाभावबोधोपगमे षष्ठ्यर्थस्वत्वाभावबोधम्प्रति प्रथमान्तपदजन्योपस्थितेर्नियामकत्वकल्पने 'पुत्रस्य न धने पितुर्द्वेष' इत्यादिवाक्यात्पुत्रस्वत्वाभाववद्धने पितुर्द्वेष इत्यन्वयबोधप्रसङ्गवारणं सम्भवति । स्वामित्वसम्बन्धेन धनाभावबोधोपगमे तु नैतद्व्युत्पत्तिकल्पनं, तत्र धने सप्तम्या निराकाङ्क्षत्वात् । सामान्यत एवाभावत्वावच्छिन्नविशेष्यतानिरूपितप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन नामपदसमभिव्याहृतनञ्पदजन्यशाब्दबोधे प्रथमान्तपदजन्योपस्थितेः, प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतयैवाभावशाब्दबोधे तादृशनञ्पदजन्योपस्थितेर्वा नियामकत्वेनानतिप्रसङ्गादन्यथा भूतले न घटेऽप्रीतिरित्यादेर्वारणाऽसम्भवादिति लाघवमित्याहुः ।

तच्चिन्त्यम्, कारणत्वादेरिव स्वामित्वस्य निरूपकताया वृत्त्यनियामकत्वात्। 'घटे दण्डस्य कारणता न पटे' इत्यत्र दण्डनिष्ठकारणतायां घटनिरूपितत्व-पटनिरूपितत्वाभावप्रतीतिवद'त्र चैत्रस्य स्वामित्वं नापरत्रे'त्यत्र चैत्रनिष्ठस्वामित्वे एतन्निरूपितत्वापरनिरूपितत्वाभावप्रतीतिसम्भवात्। 'चैत्रस्य न धन'मित्यादेः 'स्वामित्वसम्बन्धेन धनाभावश्चैत्रसम्बन्धी'ति बोधाभ्युपगमे च 'दण्डस्य न पट' इत्यादेरपि 'कारणत्वसम्बन्धेन पटाभावो दण्डसम्बन्धी'त्यादिबोधप्रसङ्गः। "दण्डस्य पट इत्यत्र कारणतासम्बन्धेन पटवत्ताज्ञानाऽभावाद्दण्डस्य न पट इत्यत्र तेन सम्बन्धेन तदभावावगाही बोधो न कल्प्यते" इति चेत्? तर्हि चैत्रस्य धनमित्यत्रापि स्वामित्वसम्बन्धेन धनवत्ताज्ञानाभावाच्चैत्रस्य धनमित्यत्रापि न तेन तदभावावगाहिबोधकल्पनं युक्तम्।

"चैत्रस्य धनमित्यत्र स्वामित्वसम्बन्धेन धनवत्त्वमेव चैत्रे प्रतीयते, स्वामित्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतया शाब्दबोधे च षष्ठ्यन्तपदजन्यपदार्थोपस्थितेर्हेतुत्वान्नियमतः षष्ठीप्रयोगस्तादृशनियमार्थमेव षष्ठ्यनुशासनमिति चैत्रस्य न धनमित्यत्र स्वामित्वसम्बन्धेन धनाभावावगाहित्वं कल्प्यत" इति चेत्? तर्हि 'दण्डाद्घट' इत्यत्र कारणतासम्बन्धेन घटवत्त्वज्ञान एव पञ्चमीप्रयोगस्तन्त्रमिति दण्डान्न पट इत्यत्र तेन तदभावप्रत्ययोऽपि दुर्वारः।

किंच 'चैत्रस्य धनं न तु मैत्रस्य, मैत्रस्य धनं न तु चैत्रस्ये'त्यादौ एकस्वत्वापरस्वत्वाभावयोरेकधनविशेष्यकत्वानुभवान्न धनस्य प्रतियोगित्वोल्लेखोद्भावनेन स्वामित्वसम्बन्धेन तदभावकल्पनं युक्तम् । अधनोऽयमित्यादिव्यवहारेण स्वामित्वसम्बन्धावच्छिन्नाभावकल्पने चाऽनाथोऽयं भृत्य इत्यादिव्यवहारेण स्वत्वसम्बन्धावच्छिन्नाभावस्यापि कल्पनप्रसङ्गः, तथा च चैत्रस्य न धनमित्यत्र स्वामित्वसम्बन्धेन धनाभावश्चैत्रे, स्वत्वसम्बन्धेन चैत्राभावो वा धने भासत इति विनिगमनाविरहो दुरुद्धर एव । तस्मात्प्रागुक्तदिशा स्वत्वस्य षष्ठ्यर्थत्व एव सर्वं सुन्दरम् ।

'पुत्रस्य न धने पितुर्द्वेष' इति प्रयोगवारणाय च विशिष्य नियमान्तरकल्पनं तु प्रमाणिकत्वाददुष्टम् । चैत्रो न पचतीत्यादेः' 'पाककृत्यभाववान् चैत्र' इत्यादिबोधवारणाय प्रत्ययार्थाभावप्रकारकबोधसामान्य एव प्रथमान्तपदजन्योपस्थितेर्हेतुत्वाच्चेति दिक् ।

**इदं** तु बोध्यं, सम्बन्धत्वस्याऽखण्डोपाधित्वे तदेव षष्ठ्याः शक्यतावच्छेदकं, स्वत्वादौ तु लक्षणैवेति । **नव्यास्तु** स्वत्वं स्वामित्वञ्चैक एव पदार्थः । स च विलक्षणविशेषणतयाऽ'त्र स्वत्वमिदं स्वामि'त्यादिव्यवहारकारी, विलक्षणविशेषणतया चाऽ'त्र स्वामित्वं पतित्वं वे'त्यादिव्यवहारकारी, तदुभयभेदेऽपि तयोरवश्यं पुरुषधननिष्ठविशेषणताभेदाभ्युपगमादित्याहुः ॥ संपूर्णः स्वत्ववादः ।

न्यायाचार्य-मुनिपुङ्गव-श्रीमद्यशोविजयोपाध्यायकृतवादमालान्तर्गतः

# ❀ सन्निकर्षवादः ❀

**अथ सन्निकर्षः** ॥ तत्र द्रव्यचाक्षुषे चक्षुःसंयोगो हेतुः, उद्भूतरूपश्च तत्सहकारीति न चक्षुःसंयुक्तपिशाचादेश्चाक्षुषापत्तिः । उद्भूतरूपस्य च संग्राहकत्वलाघवादात्मान्यद्रव्यप्रत्यक्षत्वं मूर्त्तप्रत्यक्षत्वं वा कार्यतावच्छेदकं, तेन वाय्वादेरप्रत्यक्षत्वमेव । द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति च महत्त्वत्वेन हेतुतेति परमाणोर्न साक्षात्कारः, न वा द्रव्यमानसजनकात्ममनःसंयोगसत्त्वात् मनसोऽपि मानसापत्तिः । मनःप्रतियोगिकविजातीयसंयोगस्य द्रव्यमानसहेतुत्वे तु गौरवमिति बोध्यम् ।

**न च** तमःस्थितघटादेरपि चाक्षुषप्रसङ्गः, तत्र तदा चक्षुःसंयोगस्य महत्त्वोद्भूतरूपयोश्च सत्त्वात्, न च तदानीं चक्षुःसंयोगे मानाभावः, द्रव्यवृत्त्यभावचाक्षुषहेतुचक्षुःसंयुक्तविशेषणतानुरोधेन तत्स्वीकारावश्यकत्वादिति **वाच्यम्**, महदुद्भूतानभिभूतरूपवदालोकसंयोगस्यापि द्रव्यचाक्षुषत्वावच्छिन्नं प्रति हेतुत्वात् । परमाणुरूपेण तप्तजलस्थेन सुवर्णरूपेण च तेजसा व्यभिचारवारणाय महदादिविशेषणानि । न चालोकचाक्षुष एव व्यभिचारस्तत्राप्यालोकगगनसंयोगसत्त्वात् ।

सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येवोक्तालोकसंयोगस्य हेतुत्वमित्यन्ये । प्रभासंयोगत्वेनैव हेतुत्वं(तु), प्रभात्वं तु जातिविशेष इति तु **नव्याः** । **यद्यप्येवं** बिडालादिचाक्षुषे व्यभिचारः, मानुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रति हेतुत्वोक्तावप्यञ्जनादिना तमसि पश्यतां चाक्षुषे व्यभिचारः । **तथापि** येषां न कदाप्यञ्जनादिना प्रत्यक्षं, तत्पुरुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव निरूक्तालोकसंयोगस्य हेतुत्वम्, येषां तु कदाचिदञ्जनादिनापि प्रत्यक्षं तत्पुरुषीयद्रव्यचाक्षुषे तत्पुरुषीयाञ्जनसंयोगाभावविशिष्टालोकसंयोगाभावाभावत्वेन हेतुत्वम् । बिडालादिचाक्षुषे तु बिडालादिचक्षुःसंयोगत्वेनैवेति न दोष इति **मथुरानाथप्रभृतयः** ॥

अत्रालोकसंयोगाभावे तत्पुरुषीयाञ्जनसंयोगाभाववैशिष्ट्यं स्वाश्रयचक्षुःसंयोगाधिकरणवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकतत्पुरुषीयाञ्जनसंयोगाभावस्य विशेषणताविशेषरूपं ग्राह्यं, तेन नाञ्जनसंयोगकालेऽप्यालोकसंयोगाभावे तदभावसत्त्वादतिप्रसङ्गः, न वा विनिगमनाविरहः । समवायसम्बन्धावच्छिन्नप्रतियोगिताकाञ्जनसंयोगाभावस्य स्वाश्रयचक्षुःसंयोगाधिकरणवृत्तित्वसम्बन्धेन वैशिष्ट्यं तु प्रदेशान्तरे तत्सत्त्वेऽपि तदभावसत्त्वान्निवेशनाऽनर्हम् । उक्तसम्बन्धावच्छिन्नतदभावस्तु नाऽव्याप्यवृत्तिरिति न तन्निवेशेऽप्येष दोष इति बोध्यम् ॥

चैत्रीयत्वाद्यनिवेशेन चक्षुःसंयोगस्य चाक्षुषहेतुत्वे त्वङ्मनसंयोगालोकसंयोगयोः स्वस्वाव्यवहितोत्तरनरचाक्षुषत्वावच्छिन्न एव हेतुत्वं द्रष्टव्यम् । अथैवमप्येकावच्छेदेनालोकसंयोगवत्यपरावच्छेदेन चक्षुसंयोगे चाक्षुषापत्तिरिति चेत् ? न, चक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेन हेतुत्वात् ।

अत्र मथुरानाथप्रभृतयः—आलोकसंयोगावच्छिन्नत्वं न तत्सामानाधिकरण्यं, भिन्नावच्छेदेनोभयसंयोगेऽतिप्रसङ्गात्, नापि स्वरूपसम्बन्धविशेषो, मानाभावात्, अन्यथा भूतलनिष्ठघटपटसंयोगयोरपि मिथोवच्छेद्यावच्छेदकभावापत्तेः । न च चक्षुःसंयोगे द्रव्यचाक्षुषकारणतावच्छेदकतयैवालोकसंयोगावच्छिन्नत्वसिद्धिः, तदवच्छेदकतया तत्र धर्मान्तरसिद्धावपि तदवच्छिन्नत्वासिद्धेः । न चालोकसंयोगावच्छेदकदेशावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वम्, विनिगमनाविरहेण चक्षुःसंयोगावच्छेदकावच्छिन्नलोकसंयोगस्यापि हेतुत्वात्, कारणतावच्छेदकस्य प्राक् सत्त्वापेक्षणाद्वा नालोकविगमेऽपि चाक्षुषापत्तिरित्युक्तावपि निस्तारः, यत्रैकस्यैव पटस्यार्द्धे तमसि, अर्द्धे चालोके तत्र तमोऽवच्छेदेन चक्षुःसंयोगेऽपि प्रत्यक्षापत्तेः, आलोकसंयोगावच्छेदकीभूतदीर्घतन्तुव्यक्त्यवच्छेदेन तत्र चक्षुःसंयोगाऽप्रतिघातात् । न चालोकसंयोगावच्छेदकावच्छिन्नावच्छेदकताकचक्षुःसंयोगत्वेन हेतुत्वोक्तावपि निस्तारस्तादृशदीर्घांशुव्यक्तिस्थले व्यभिचारानुद्धारात् । तस्मा-

द्विलक्षणचक्षुःसंयोगत्वेनैव द्रव्यचाक्षुषहेतुत्वम् । तच्च वैलक्षण्यं फलबलकल्प्यमिति तमसि विलक्षणचक्षुःसंयोगाभावादेव न चाक्षुषमित्याहुः ।

**तच्चिन्त्यम्**, आलोकसंयोगावच्छेदकभागानवच्छिन्नालोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वे दोषाभावात् । दीर्घतन्तुव्यक्तेरपि तमःस्थभागस्यालोकसंयोगानवच्छेदकत्वात्, अन्यथेयं तन्तुव्यक्तिरियती तमसीयती चालोक इतिव्यवहारानुपपत्तेः । विलक्षणचक्षुःसंयोगाभ्युपगमेनोक्तदोषोद्धारे च विनश्यदवस्थालोकसंयोगदशायां चक्षुःसंयोगोत्पत्त्यालोकसंयोगनाशदशायां घटप्रत्यक्षापत्तिः । **न च** पूर्वक्षणे चक्षुरात्मकाश्रयनाशपूर्वं तदानीं चक्षुःसंयोगनाशोपगमान्न दोष इति **वाच्यं**, अनन्तचक्षुरादिनाशकल्पने गौरवाद्विनश्यदवस्थालोकक्षणोत्पत्तिकचक्षुषस्तदानीं नाशायोगाच्च । **न च** तत्पुरुषीयद्रव्यचाक्षुषे तत्पुरुषीयविलक्षणचक्षुःसंयोगत्वेन विलक्षणालोकसंयोगत्वेन च पृथग्घेतुत्वान्न दोष इति **वाच्यम्**, चैत्रादिचाक्षुषजनकतावच्छेदकचक्षुःसंयोगालोकसंयोगनिष्ठानन्तवैजात्यकल्पनापेक्षयाऽस्मदुक्तरीत्या हेतुत्वस्यैव युक्तत्वात् ।

**यदपि** तैरुच्यते-द्रव्यचाक्षुषे न शुद्धचक्षुःसंयोगत्वेन हेतुत्वं, अस्थूलावयवावच्छेदेन चक्षुःसंयोगे चाक्षुषापत्तेः । नापि स्थूलावयवावच्छिन्नचक्षुःसंयोगत्वेन, त्रुटिचाक्षुषे व्यभिचा-

रात्तदवयवस्यास्थूलत्वात् । न च स्थूलावयवसमवेतचाक्षुषत्वस्य कार्यतावच्छेदकत्वादयमदोषः, यत्र कपाले परमाण्ववच्छेदेन चक्षुःसंयोगाद् घटेऽपि तदवच्छिन्नकपालावच्छेदेनैव सः, तत्कपालात्मकस्थूलावयवावच्छिन्नचक्षुःसंयोगस्य घटे सत्त्वात्तदानीं तच्चाक्षुषाऽऽपत्त्यनुद्धारात् । न च निरवच्छिन्नस्थूलावयवनिष्ठावच्छेदकताकचक्षुःसंयोगहेतुत्वान्न दोषः, शर्कराद्यवच्छिन्नकपालावच्छेदेन चक्षुःसंयोगेऽपि घटाऽप्रत्यक्षतापत्तेः, इति विजातीयचक्षुःसंयोगत्वेन चाक्षुषहेतुतयैव तदुपपत्तिरिति ।

**तदपि** न रमणीयम्, स्थूलावयवसमवेतचाक्षुषत्वावच्छिन्नेऽस्थूलावयवानवच्छिन्नस्थूलावयवाऽवच्छिन्नचक्षुःसंयोगस्य हेतुत्वेनैतद्दोषोद्धारात् । त्रुटिचाक्षुषे त्वालोकसंयोगवद्धातायनावच्छिन्नचक्षुःसंयोगस्यावश्यं पृथग्घेतुत्वेनानुपपत्त्यभावात् । **यदपि** स्वगोलकादेरग्रहणं विलक्षणचक्षुःसंयोगाभावादेवोपपादयितुं शक्यमित्युद्भाव्यते. **तदपि** तुच्छम् अग्रावच्छिन्नचक्षुःसंयोगस्य ग्राहकत्वादेव स्वगोलकादेरग्रहणस्य **प्रकारान्तरो**पपादनात् । युक्तञ्चैतद् अन्यथा यच्चक्षुःक्रियया घटादौ गोलके चैकदा नाना संयोगो जनितः, तत्क्रियाजन्यतावच्छेदकवैजात्यशालिसंयोगवद्गोलकप्रत्यक्षस्य दुर्निवारत्वात् ।

**यदपि** 'दर्पणे मुखमि'ति चाक्षुषं दर्पणादिस्वच्छद्रव्यप्रतिहतस्य चक्षुषः स्वमुखादौ विलक्षणसंयोगोत्पादाभ्युपगम एव सूपपदम्, कार्योन्नेयधर्माणां यथाकार्यमुन्नयनादित्युद्-

घोष्यते । तदप्याऽऽपातरमणीयम् , तत्र मुखविशेष्यकचाक्षुषस्यानभ्युपगमाद्दर्पणविशेष्यकमुखप्रकारकबोधस्यैवाभ्युपगमात्तदुत्तरं 'दर्पणे मुखमि'ति मुखविशेष्यकमानसभ्रमस्यापि सम्भवात् । न चैवं दोषकल्पनायां गौरवम् , आदर्शवृत्तित्वांशे भ्रमजनकदोषकल्पनायाः परस्याप्यावश्यकत्वात् । किञ्चैकत्र दर्पणे दशमुखप्रतिबिम्बस्थले तव शतमुखचक्षुःसंयोगकल्पनं मम तु दशदर्पणनयनसंयोगकल्पनमेवेति लाघवम् । अपि च तव बहुविधानां मुखचक्षुःसंयोगगतविलक्षणजातीनां, तदवच्छिन्नजनकतावच्छेदिकानां क्रियागतजातीनां, तदवच्छिन्नजनकतावच्छेदकाभिघातगतजातीनां च कल्पने गौरवमिति दिक् ।

यदि चालोकसंयोगस्याप्यस्थूलावयवावच्छेदेन तदवच्छिन्नस्थूलावयवावच्छेदेन च सत्त्वे न प्रत्यक्षमिति स्थूलावयवसमवेतचाक्षुषत्वावच्छिन्ने आलोकसंयोगानवच्छेदकभागानवच्छिन्नालोकसंयोगावच्छेदकास्थूलावयवानवच्छिन्न--स्थूलावयवावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वे गौरवाद्द्रव्यचाक्षुषत्वावच्छिन्ने विलक्षणालोकसंयोगत्वेन विलक्षणचक्षुःसंयोगत्वेन च हेतुत्वमेव युक्तं लाघवात् , वैजात्यानन्त्य-तदवच्छिन्नहेतुत्वादिकल्पनागौरवस्य च फलमुखत्वादिति विभाव्यते--तदाऽस्तु चक्षुःसंयोगगतं वैजात्यम् , तच्च कर्मजन्यतावच्छेदकजातिव्याप्यम् । चक्षुर्व्यापारं विना कुत्रापि चाक्षुषानुपपत्तेः, पूर्वोत्पन्नचक्षुःकर्मणा कपालनाशकाले यत्र चक्षुर्घटसंयोगस्तत्र-

त्यघटचाक्षुषे संयोगजचक्षुःसंयोगस्य स्फुटव्यभिचाराच्च । तथा च न कर्मजन्यताद्यवच्छेदिकया सांकर्यम् ।

वस्तुतः कर्मसंयोगजन्यतावच्छेदिका नानैव जातयः । कार्यतावच्छेदकानामननुगतत्वेऽपि क्षत्यभावात् । एवं च चाक्षुषोपधायकचक्षुःसंयोगगतं कर्मसंयोगप्रयोज्यं जातिद्वयं द्रव्यचाक्षुषप्रयोजकजातेर्व्याप्यमेवेति क्व सांकर्यम् । एतेन यत्र चक्षुःकर्मणा कपालचक्षुःसंयोगजननकाले घटोत्पादोऽनन्तरं च कपालचक्षुःसंयोगाद् घटचक्षुःसंयोगचक्षुःक्रियानाशौ तत्रोत्तरकाले घटप्रत्यक्षानुपपत्तिः, कर्मजन्यचक्षुःसंयोगस्य घटे विरहादित्यपास्तम् ।

न चै(न्वे)वं द्रव्यचाक्षुषे उद्भूतरूपस्य हेतुत्वं न स्यात्, पिशाचादौ विलक्षणचक्षुःसंयोगविरहादेव चाक्षुषानुपपत्तेः । चक्षुषि च चक्षुःप्रतियोगिकविलक्षणसंयोगाभावादेव दोषाभावाद्धेत्वन्तरकल्पनापेक्षया क्लृप्तकारणे चक्षुःप्रतियोगिकत्वमात्रनिवेशस्यैव लघुत्वेनौचित्यात् । घटादेः स्पार्शनदशायां चाक्षुषापत्त्या चक्षुःप्रतियोगिकत्वेन चाक्षुषहेतुत्वध्रौव्याच्च । परमाण्वाद्यवच्छेदेन त्वक्संयोगादपि घटादिस्पार्शनप्रसङ्गेन त्वक्संयोगादेर्द्रव्यस्पार्शनजनकत्वस्यापि तादृशवैजात्येनैवावच्छेदात् । न च प्रभायाश्चाक्षुषत्वानुरोधेन द्रव्यस्पार्शनजनकतावच्छेदकं वैजात्यं द्रव्यचाक्षुषजनकतावच्छेदकवैजात्याद्भिन्नमेव युक्तं न तु तदेवेति वाच्यम्,

तादृशवैजात्यान्तरकल्पने गौरवात् । वायोरस्पार्शनत्ववत् प्रभाया अचाक्षुषत्वेऽपि बाधकाभावात् । भिन्नस्यापि तस्येतरव्याप्यत्वेन घटादौ चाक्षुषजनकस्यैव संयोगस्य स्पार्शनजनकत्वेनोक्तदोषानुद्धाराच्च । किञ्चैकस्य विलक्षणचक्षुःसंयोगदशायामन्यस्य चाक्षुषापत्त्या तत्पुरुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयचक्षुःप्रतियोगिकविलक्षणसंयोगत्वेन गुरुणापि हेतुत्वमावश्यकम् । वस्तुतः समवेतत्वेनेव स्वप्रतियोगिकत्वेन चक्षुर्विशिष्टत्वमेव निविशत इति क्व गौरवमिति चेत् ?

न, द्रव्यवृत्त्यभावचाक्षुषं प्रत्यपि तादृशचक्षुःसंयोगवद्विशेषणतैव प्रत्यासत्तिर्वाच्याऽन्यथाऽन्धकारेऽपि चक्षुःसंयुक्तवाय्वादिविशेषणतया वाय्वादौ रूपाद्यभावग्रहप्रसङ्गात् । इत्थं चालोकसंयोगदशायां वाय्वादौ रूपाद्यभावग्रहवेलायां वाय्वादिचाक्षुषापत्तेरुद्भूतरूपहेतुतयैव वारयितुं शक्यत्वात् । न च चक्षुःसंयुक्तविशेषणतायां द्रव्यचाक्षुषप्रयोजकवैजात्यं न निविशते; किन्त्वालोकसंयोगावच्छिन्नत्वमेवेति वाच्यम्, तन्निवेशे गौरवस्यैव वैजात्यनिवेशकत्वात् । न चाभावचाक्षुषजनकतावच्छेदकं वैजात्यान्तरमेव कल्पनीयम्, तत्कल्पनापेक्षयोद्भूतरूपहेतुत्वस्यैव युक्तत्वात् । अन्यथा स्ववृत्त्यभावविषयकघटादिचाक्षुषस्थले घटादावनन्तचक्षुःसंयोगकल्पनापत्तेः, फलमुखगौरवस्यापि क्वचिद्दोषत्वात् । एवं परमाण्वादौ महत्त्वाभाव-

प्रत्यक्षजनकचक्षुःसंयुक्तविशेषणतानुरोधेन विलक्षणसंयोगसम्बन्धौव्ये महत्त्वस्यापि पृथग्घेतुत्वमावश्यकम् ।

यदि च द्रव्यचाक्षुषप्रयोजकजातेर्व्यापिकमेवाऽभावचाक्षुषप्रयोजकवैजात्यं, अतो न घटादावभावप्रत्यक्षानुरोधेन चक्षुःसंयोगान्तरकल्पना । वाय्वादौ तादृशचक्षुःसंयोगसत्त्वेऽपि द्रव्यचाक्षुषप्रयोजकजात्याश्रयस्याऽसत्त्वान्न तत् प्रत्यक्षमिति **विभाव्यते**, तदा रूपस्याऽहेतुत्वेऽपि न क्षतिः ।

**अथ** द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य प्रत्यासत्तित्वात्तयैव प्रत्यासत्त्या घटादिप्रत्यक्षसम्भवाच्चक्षुःसंयोगत्वेन हेतुत्वे मानाभावः । तत्र कपालचक्षुःसंयोगानन्तरं घटस्योत्पत्तिक्षणे द्वितीयक्षणे वा तत्प्रत्यक्षस्येव ममापि कपालविनाशदशायां घटचक्षुःसंयोगोत्पत्त्या घटप्रत्यक्षस्याऽनुपगमे क्षत्यभावात् । **न** चात्मप्रत्यक्षानुरोधेन द्रव्यसाक्षात्कारत्वावच्छिन्ने इन्द्रियसंयोगत्वेन हेतुत्वाच्चक्षुःसंयोगादेरपि द्रव्यचाक्षुषहेतुत्वमुपपद्यत इति चिन्तामणिकृदुक्तं **युक्तम्**, इन्द्रियत्वस्यैकस्याभावाद्विशिष्यकार्यकारणभावविश्रामे द्रव्यमानसत्वावच्छिन्नं प्रत्यात्ममनःसंयोगत्वेन हेतुत्वेऽपि द्रव्यचाक्षुषत्वावच्छिन्ने चक्षुःसंयोगत्वेन हेतुत्वस्य निर्युक्तिकत्वात् । न चैवं पिशाचतद्रूपादेः प्रत्यक्षत्वप्रसङ्गः, द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति स्वाश्रयसमवेतसम्बन्धेनोद्भूतरूपत्वे-

नापि हेतुत्वात् । इत्थं च द्व्यणुकसिद्धिरप्यावश्यकी, तदसत्त्वे त्रसरेण्वप्रत्यक्षतापत्तेः । महत्त्वं च समवायेन द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रत्येव, द्रव्यान्यतत्समवेतसाक्षात्कारत्वावच्छिन्नं प्रति च स्वाश्रयसमवेतत्वप्रत्यासत्त्या हेतुस्तेन न द्व्यणुकस्य तदीयरूपादेर्वा साक्षात्कार इति चेत् ?

उच्यते-द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायत्वेन हेतुतया न निर्वाहः । परमाणु--द्व्यणुक-पिशाचादिसन्निकर्षादपि द्रव्यत्वसत्तापृथिवीत्वादिचाक्षुषत्वापत्तेः, घटादिगतमहत्त्वोद्भूतरूपयोरपि तत्र स्वाश्रयसमवेतत्वप्रत्यासत्त्या सत्त्वात् । महत्त्वोद्भूतरूपयोः प्रत्यासत्तिमध्ये निवेशे च त्रुटेरचाक्षुषत्वाऽऽपत्तेः । द्रव्यान्यद्रव्यसमवेतत्वस्य कार्यदिशि प्रवेशे त्रुटिचाक्षुषानुरोधेनैव द्रव्यचाक्षुषे चक्षुःसंयोगहेतुतावश्यकत्वात् । न च त्रुटिचाक्षुषत्वावच्छिन्नं प्रत्येव तद्धेतुत्वं, द्रव्यत्वापेक्षया त्रुटित्वस्य गुरुत्वात् । घटाद्यनन्तव्यक्तीनां कार्यतावच्छेदककोटिनिवेशे गौरवान्निश्चिताऽव्यभिचारकं त्रुटिचाक्षुषत्वमेव कार्यतावच्छेदकमिति पुनरुक्तानाः ।

परमाण्वाद्यवच्छेदेन घटादिसन्निकर्षेऽपि तद्गतरूपाद्यग्रहाद् द्रव्यसमवेतचाक्षुषप्रयोजकचक्षुःसंयोगगतवैजात्यस्वीकारेणैव परमाण्वादिघटितसन्निकर्षेण द्रव्यत्वाद्यग्रहोपप-

त्तावपि तादृशविजातीयसंयोगस्य द्व्यणुके स्वीकारे तद्गतरूपादिप्रत्यक्षापत्तिस्तत्र तदस्वीकारे च त्रुटेरचाक्षुत्वापत्तिरिति त्रुटिचाक्षुषानुरोधेन द्रव्यचाक्षुषे चक्षुःसंयोगस्य हेतुत्वमावश्यकमिति बोध्यम् । एतेन विजातीयैकत्वनिवेशोऽपि व्याख्यातः ।

यत्तु गुरुत्वत्वस्य तद्व्याप्यतोलकत्वादेः स्पर्शत्वरसत्वादेश्चाक्षुषत्ववारणाय तादात्म्येन तत्तद्व्यक्तित्वेन चाक्षुषप्रतिबन्धकत्वकल्पनामपेक्ष्य जातिचाक्षुषत्वावच्छिन्नं प्रत्याश्रयचाक्षुषस्य हेतुत्वमेव कल्प्यते लाघवात् । तथा च परमाण्वादिमात्रसन्निकर्षदशायामाश्रयचाक्षुषाभावादेव द्रव्यत्वाद्यचाक्षुषत्वोपपत्तेर्द्रव्यसमवेतचाक्षुषं प्रत्येव संयुक्तसमवायत्वेन हेतुत्वं निराबाधम् । न चैकजात्याश्रयचाक्षुषादपरजातिप्रत्यक्षापत्तिः, विषयतया जातिचाक्षुषं प्रति स्वाश्रयसमवेतत्वसम्बन्धेनाश्रयचाक्षुषस्य हेतुत्वात् । न च यत्र घटनाशदशायां घटस्य चाक्षुषप्रत्यक्षं, तदुत्तरं च पिशाचेन चक्षुःसंयोगस्तत्र द्रव्यत्वचाक्षुषप्रसङ्गः, आश्रयचाक्षुषसन्निकर्षयोः सत्त्वादिति **वाच्यम्**, इष्टत्वादिति **मतम्; तदनिरूपणीयः** । विनापि घटचाक्षुषं घटघटत्वयोरेकदा निर्विकल्पकचाक्षुषोत्पत्त्या व्यभिचारात् ।

न च जातिचाक्षुषत्वमाश्रयचाक्षुषजन्यतावच्छेदकं, किन्तु गुणकर्मजातिसाधारण्येन लाघवाद्द्रव्यभिन्नसमवेतचाक्षुषत्वमेव । घटत्वस्येव घटीयरूपादेरपि घटनिर्विकल्पकोत्तरमेव चाक्षुषोपगमेऽपि क्षत्यभावात्पिशाचक्रियारूपादीना-

मप्याश्रयचाक्षुषविरहादचाक्षुषत्वसंभवात् । तथा च द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतुत्वमायाति न तु संयुक्तसमवायस्य प्रत्यासत्तित्वमपीति न किञ्चिदेतदिति दिक् ।

स्वतन्त्रास्तु द्रव्यचाक्षुषं प्रत्येव चक्षुःसंयोगत्वेन हेतुत्वं न तु द्रव्यसमवेतचाक्षुषादौ चक्षुःसंयुक्तसमवायत्वादिना, गौरवात् । गुरुत्वत्वरसत्वगन्धत्वादिचाक्षुषवारणाय द्रव्यान्यसमवेतचाक्षुषत्वावच्छिन्नं प्रत्याश्रयचाक्षुषत्वेन हेतुत्वावश्यकतया तत एवातिप्रसङ्गात्तत्तज्जातित्वेन प्रतिबन्धकत्वपर्यवसितस्याऽयोग्यत्वस्य कल्पने गौरवात् । अत एव सत्यपि सन्निकर्षे निखातवंशादिपरिमाणगतवैजात्यस्य द्विहस्तत्वादेरग्रहः । परिमाणप्रत्यक्षं प्रत्यावरकद्रव्यसंयोगस्य विरोधितयाश्रयप्रत्यक्षविरहात् । न च तत्र परिमाणं गृह्यत एव, तद्गतवैजात्यं तु न गृह्यते, तद्ग्रह एवावरकसंयोगस्य विरोधित्वादिति वाच्यम्, एकत्रावरकसंयोगसत्त्वेऽप्यन्यत्र द्विहस्तवंशसन्निकर्षेण तादृशवैजात्यस्य प्रत्यक्षतया तद्ग्रहं प्रत्यावरकसंयोगस्य विरोधित्वासम्भवात् । न चैवमपि घटपरमाण्वोर्घटाकाशयोर्वा संयोगस्य प्रत्यक्षं, परैरप्ययोग्यतया तस्य वारणीयत्वाद्द्रव्यान्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति महत्त्वविशिष्टरूपत्वावच्छिन्नाभावस्याखण्डस्य स्वाश्रयसमवेतत्वेन प्रतिबन्धकत्वेन तन्निरासम्भवाच्च । एवञ्च सत्यपि चक्षुःसन्निकर्षे प्रथमं घटस्यैव प्रत्यक्षं न तु घटत्वादेः, हेतुभूताश्रयचाक्षुषस्य प्रागसत्त्वात् । अनन्तरं

घटत्वादिजातिरूपादिगुणानां, तदुत्तरं रूपत्वादेश्चाक्षुषं, पूर्वपूर्वाश्रयचाक्षुषात्मकहेतुसम्पत्तेरित्यवश्यं निर्विकल्पकसिद्धिरपि, सामग्रीविरहेण प्रागेव विशिष्टबुद्ध्यसम्भवात् । न च यत्र घटचक्षुःसंयोगनाशदशायामेव घटस्य चाक्षुषं, तत्रेन्द्रियसन्निकर्षविगमोत्तरमपि क्रमेण तदीयरूपरूपत्वलौकिकचाक्षुषापत्तिः, कारणीभूताश्रयचाक्षुषस्य पूर्वपूर्वं सत्त्वादिति **वाच्यम्**, द्रव्यचाक्षुषे चक्षुःसंयोगस्य कार्यसहवृत्तितया हेतुत्वेन तत्र घटस्यैव प्रत्यक्षानुपपत्तेरुक्तक्रमेण प्रत्यक्षस्वीकारेऽपि क्षत्यभावाच्चेत्याहुः ।

**परे तु** द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति नाश्रयचाक्षुषत्वेन हेतुता, तथा सति चक्षुःसंयोगस्येव महत्त्वस्यापि द्रव्यचाक्षुषं प्रति हेतुत्वकल्पनापत्तेः अन्यथा परमाण्वादेश्चाक्षुषत्वप्रसङ्गाद् , द्रव्यान्यद्रव्यसमवेतत्वयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कार्यकारणभावद्वयापत्तेश्च, किन्तु द्व्यणुकान्यवृत्तिगोचरचाक्षुषत्वावच्छिन्नं प्रति द्व्यणुकान्यवृत्तिवृत्तिविषयतया, चाक्षुषत्वावच्छिन्नं प्रत्येव वाऽऽश्रयचाक्षुषत्वेन हेतुत्वम् । तथा च द्व्यणुकस्यापि द्व्यणुकान्यसमवेतत्वादाश्रयचाक्षुषविरहादेवाप्रत्यक्षत्वसम्भवान्न महत्त्वापेक्षा । एवं च द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यपि चक्षुःसंयुक्तसमवायत्वेनैव हेतुत्वं, न तु चक्षुःसंयोगत्वेन, परमाणोश्चाक्षुषत्वप्रसङ्गादि**त्याहुः** ।

**ननु** घटाद्येकैकचक्षुःसंयोगदशायां घटपटयोः संयोगस्य द्वित्वस्य च प्रत्यक्षवारणार्थमवश्यं व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयसन्निकर्षो हेतुर्वाच्यः, तथा च तत्तद्द्रव्यविषयकतत्तत्समवेतचाक्षुषत्वावच्छिन्ने तत्तद्द्रव्यचक्षुःसंयोगत्वेनैव हेतुत्वं पर्यवसन्नमन्यस्य दुर्वचत्वाच्च । तथा च तत एवासन्निकृष्टद्रव्याप्रत्यक्षतोपपत्तौ द्रव्यचाक्षुषं प्रति चक्षुःसंयोगस्य हेतुत्वे मानाभावः । न च तत्तद्द्रव्यविषयकेत्यधिकं, विनापि तत्कपालचक्षुःसंयोगं कपालान्तरचक्षुःसंयोगदशायां तत्कपालसमवेतद्रव्यत्वादिजातिघटयोःप्रत्यक्षोत्पादेन तद्व्यभिचारवारकत्वात् । **न च** तथापि तत्तद्द्रव्यचक्षुःसंयोगहेतुतया कपालविषयघटचाक्षुषोपपत्तावपि तदविषयकतदुपपादनार्थं द्रव्यचाक्षुषे चक्षुःसंयोगत्वेन हेतुत्वमावश्यकमिति **वाच्यम्**, कपालादिविषयकस्यैव घटचाक्षुषस्योपगमात् । अत एवोक्तहेतुं विना तदविषयकतदापत्तिर(न ?)युक्ता तस्याप्रसिद्धत्वेनाऽनापाद्यत्वात् । न चैवं घटाकाशसंयोगादिप्रत्यक्षापत्तिः, गुरुत्वादेरिव तस्यायोग्यतयैवाप्रत्यक्षत्वसम्भवात् । यदि चातत्त्वतत्वेन योग्यत्वस्य प्रतिबन्धकत्वविश्रामे गौरवं, तदाऽस्तु द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वावच्छिन्ने स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषाभावस्यानुगतप्रतिबन्धकत्वादेव तदप्रत्यक्षत्वम् । न चैवं द्रव्यप्रत्यक्षे महत्त्वस्य द्रव्यचाक्षुषे च रूपस्य हेतुत्वं न स्याद्, इष्टत्वाद् । परमाणुपिशाचाद्यन्तर्भावेन तत्समवेतचाक्षुषत्वावच्छिन्नं प्रति

तच्चक्षुःसंयोगत्वेन हेतुत्वस्याक्लृप्तत्वात्तदऽप्रत्यक्षतोपपत्तेरिति चेत् ?

**अत्र वदन्ति** तत्तद्द्रव्यीयसंख्याचाक्षुषत्वमेव तत्तद्द्रव्यचक्षुःसंयोगत्वावच्छिन्नजन्यतावच्छेदकम्, न तु तत्तद्द्रव्यविषयकतत्समवेतचाक्षुषत्वं, गौरवात् । एकावच्छेदेन चक्षुःसंयोगेऽप्यन्यदेशावच्छिन्नसंयोगविभागयोः साक्षात्कारापत्त्या तदवच्छिन्नवृत्तिकचाक्षुषत्वावच्छिन्नं प्रति तदवच्छिन्नचक्षुःसंयोगत्वेन हेतुतायाः स्वातन्त्र्येणाऽऽवश्यकत्वात् । अस्तु वा तत्तद्घटीयगुणचाक्षुषत्वावच्छिन्नं प्रत्येव प्रत्येकं तत्तद्घटचक्षुःसंयोगत्वादिना हेतुत्वं, निरुक्तकार्यतावच्छेदकतयैव द्वित्वद्वि(१ादि)पृथक्त्वादिषु गुणत्वसिद्धेः । तथा च द्रव्यचाक्षुषे चक्षुःसंयोगस्य हेतुत्वमावश्यकमन्यथा विप्रकृष्टस्यापि घटादेश्चाक्षुषत्वप्रसङ्गात् । एवञ्च परमाणुपिशाचप्रत्यक्षवारणाय रूपमहत्त्वयोरपि हेतुत्वमिति ।

**तच्चिन्त्यं** तदवच्छिन्नवृत्तिकचाक्षुषे तदवच्छिन्नचक्षुःसंयोगस्य पृथग्घेतुत्वे गौरवात् । अवच्छेदकतासमवायान्यतरसम्बन्धेन तत्तद्द्रव्यवृत्तितत्तद्द्रव्यविषयकचाक्षुषत्वावच्छिन्नं प्रति तत्तद्द्रव्यचक्षुःसंयोगत्वेन हेतुत्वौचित्यात् । अवच्छेदकाविषयकसंयोगादिप्रत्यक्षोपपादनाय तदवच्छिन्नचक्षुःसंयोगत्वेन पृथग्घेतुत्वे च कपालाविषयकघटप्रत्यक्षोपपादनाय चक्षुःसंयोगत्वेन पृथग्घेतुत्वमिति तु युक्तम् ।

**यत्तु** तत्तद्द्रव्यविषयकतत्समवेतचाक्षुषत्वावच्छिन्नं प्रति तत्तद्द्रव्यचक्षुःसंयोगत्वेन हेतुत्वेऽपि यत्र द्वित्रिक्षणावस्थायिघटादिव्यक्तिषु न द्वित्वाद्युत्पत्तिः, संयोगस्तु योग्यो यावदाश्रयसन्निकर्षदशायां न जातस्तत्रैव द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतुत्वं कल्प्यते लाघवात्, न हि तत्तद्व्यक्तिचक्षुःसंयोगदशायामपि तत्समवेतस्य कस्यचिन्न प्रत्यक्षं येन तत्राप्युक्तविशेषहेतुता कल्प्येतेति,

**तत्तुच्छम्**, तथा सति द्वित्रिक्षणावस्थायिघटादीनां रूपसंख्याप्रत्यक्षानुरोधेन द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायत्वेन हेतुत्वावश्यकत्वे चक्षुःसंयोगहेतुताऽसिद्धेरिति **दिक्**। अत्र द्रव्यचाक्षुषे चक्षुःसंयोगस्य कार्यतावच्छेदकः सम्बन्धो न विषयत्वमात्रम्, "चैत्रस्यायं पुत्र" इत्यादिचाक्षुषे चैत्राद्यंशे व्यभिचारात्, किन्तु लौकिकत्वाख्योऽविषयताविशेषः, अवच्छेदकधर्मविधयेवाऽवच्छेदकसम्बन्धविधयापि पदार्थसिद्धेः ।। [इति सन्निकर्षवादः]

॥ इति वादमाला ॥

न्यायाचार्य—महोपाध्यायश्रीमद्यशोविजयगणिविनिर्मितः

# ॥ विषयतावादः ॥

॥ ऐँ नमः ॥ [1]विषयता स्वरूपसंबन्धविशेषो ज्ञानादीनां विषये, न त्वतिरिक्ता मानाभावादिति प्राञ्चः । तदसत् । तथाहि—विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञानानंतरं 'घटप्रकारकज्ञानवानहमि'त्यादिप्रतीतिवद् 'भूतलप्रकारकज्ञानवानहमि'त्यादि[2]प्रतीतिप्रसङ्गः, घटनिष्ठप्रकारत्वा[3]ख्यतज्ज्ञानरूपविषयताया एव भूतलवृत्तित्वात् । एवं 'घटपटावि'त्यादिसमूहालम्बनधियो भ्रमत्वापत्तिः[4] । पटनिष्ठतज्ज्ञानरूपविशेष्यतायाः ※ तज्ज्ञानरूपघटत्वप्रकारतानिरूपितघटविशेष्यताऽभिन्नत्वेन※तादृशज्ञानस्य घटत्वप्रकारतानिरूपित[5]पटविशेष्यताशालित्वात् ।

विषयस्वरूपत्वे च घटभूतलसंयोगा इत्याद्याकारकसमूहालम्बनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तेः । न च विशिष्टज्ञाने संबन्धसंबन्धोऽपि भासते न समूहालम्बने इत्यत एव तयोर्वैल-

---

१–'विषयता च' इति दे० प्रतौ । २–'प्रत्ययप्रसङ्गात्' इति दे० ३–'प्रकारत्वाख्ये' इति दे० । ४–'०पत्तिश्च' इति दे० । ※※ चिह्नद्वयान्तर्गतपाठस्थाने'घटनिष्ठघटत्वप्रकारतानिरूपिता तज्ज्ञानरूपविशेष्यत्वाभिन्नतया' इति पाठः दे० । ५–'पटनिष्ठ०' इति दे० ।

क्षणयमुपपत्स्यते इति **वाच्यम्**, संबन्धसम्बन्धमादायापि समूहालम्बनसंभवात् । तस्माद् ज्ञानविषयाभ्यामतिरिक्तमेव विषयत्वमित्यनन्यगत्या स्वीकरणीयम् । तच्चाश्रयतया विषये ज्ञाने च निरूपकतासंबंधेन वर्त्तत इति ।

एतेन विषयित्वमपि व्याख्यातम् । **न च** विषयताप्रतियोगित्वमेव विषयित्वमस्तु, किं तस्यातिरिक्तत्वस्वीकारेण ? इति **वाच्यम्**, विषयित्वमेवातिरिक्तं तत्प्रतियोगित्वमेव विषयत्वमित्यस्यापि वक्तुं शक्यत्वात् तस्माद् विनिगमनाविरहेणोभयमेवातिरिक्तम् । विषयत्वादिकं तु विषयभेदेन भिद्यतेऽन्यथा 'घटवद्भूतलमि'त्यादि[1]ज्ञानीयघटभूतलादिविषयतानां 'घटापटावि'त्यादि[2]ज्ञानीयघटपटादिविषयतानां चाभेदप्रसङ्गेन पूर्वोक्तानुपपत्तितादवस्थ्यात् । न तु ज्ञानव्यक्तिभेदेनापि तद्भेदो, मानाभावात् ।

तच्च द्विविधम्, किंचिद् विषयत्वाऽनिरूपितं तन्निरूपितं च । तत्र निर्विकल्पकनिरूपितविषयता विषयत्वानिरूपिता निर्विकल्पकीयघटत्वादिविषयताया घटादिविषयतानिरूपितत्वे मानाभावाद् । विशिष्टबुद्धिविषयता च विषयत्वांतरनिरूपिता, प्रकारताविशेष्यतासंसर्गतारूपाणां तासां परस्परं निरूप्यनिरूपकभावसत्त्वात् । अन्यथा 'घटवद् भूतलम् पर्वतो वह्निमानि'

---

१-'दिजातीय'० इति दे० । २-'०दिविजातीय' इति दे० ।

त्याकारकज्ञानविषयतातः 'घटवान् पर्वतो वह्निमद् भूतलमि'-त्याकारकज्ञानविषयताया अवैलक्षण्यप्रसङ्गात् । मन्मते प्रथमे घटप्रकारकत्वभूतलविशेष्यकत्वयोर्वह्निप्रकारत्वपर्वतविशेष्यत्व--योश्च परस्परं निरूप्यनिरूपकभावः, द्वितीये च वह्निप्रकारकत्वभूतलविशेष्यत्वयोर्घटप्रकारत्वपर्वतविशेष्यत्वयोरिति वैलक्षण्योपपत्तिः ।

एवं च, 'घटवद् भूतलम् घटवान् पर्वत' इत्याकारकसमूहालम्बने घटादिरूपैकैकप्रकारनिष्ठप्रकारताया अपि भूतलपर्वतादिविशेष्यभेदेन, 'घटवद् भूतलं पटवच्चे'त्यादिसमूहालम्बने च भूतलाद्येकैकनिष्ठविशेष्यताया अपि घटपटादिप्रकारभेदेन भेदो बोध्यः । उभयविशेष्यतानिरूपितत्वस्यैकप्रकारतायां उभयप्रकारतानिरूपितत्वस्य चैकविशेष्यतायां स्वीकारे तादृशसमूहालम्बनादावतिरिक्तविषयताकल्पनप्रसङ्गात् । मन्मते 'घटवद् भूतलमि'त्याद्याकारकप्रत्येकज्ञानी[1]यप्रत्येकविशेष्यतानिरूपितप्रकारताभ्यां प्रत्येकप्रकारतानिरूपितविशेष्यताभ्यामेवोपपत्तेः । समूहालंबने प्रकारताभेदेन विशेष्यत्वाभेदे 'घटवद् भूतलं पटवच्चे त्यादिसमूहालम्बना'देकत्र द्वयमि'ति रीत्या एकधर्मिणि नानाधर्मवैशिष्ट्यावगाहि 'घटवद् भूतलं पटवदि' त्यादिज्ञानस्य वैलक्षण्यप्रसङ्गः । मम तु समूहालम्बने प्रकार-

---

१-'व्यनिरूपिताप्रत्येकविशेष्यतानिरूपितप्रकारताभ्यां' इति दे.।

भेदेन विशेष्यताभेदो न त्वेकत्र द्वयमिति रीत्या तादृशबोधः इति समूहालम्बनतस्तस्य वैलक्षण्योपपत्तिरिति ।

विशेष्यत्वं प्रकारत्वं च द्विविधम्, किञ्चिद्धर्मावच्छिन्नं निरवच्छिन्नं च । तत्र किंचिद्धर्मावच्छिन्नविशेष्यता भूतलत्वाद्येकविशेषणविशिष्टे घटादिरूपाऽपरधर्मवैशिष्ट्यावगाहिज्ञाने, तत्र घटादिप्रकारतानिरूपितभूतलविशेष्यताया भूतलत्वावच्छिन्नत्वात् । अन्यथा केवलमेकत्र द्वयमिति रीत्योभयवैशिष्ट्यावगाहिनो 'भूतलं घटवदि'ति ज्ञानात्तस्य वैलक्षण्यानुपपत्तेः । किंचिद्धर्मावच्छिन्नप्रकारता च वैशिष्टनिरूपितवैशिष्ट्यावगाहि 'घटवदि'त्याकारकज्ञाने, तत्र घटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वात् । अन्यथा केवलं 'विशेष्ये विशेषणम् तत्र च विशेषणान्तरमि'त्येवंरीत्या [1]घटत्वाद्यवगाहिनस्तथाविधज्ञानाद् विशिष्टवैशिष्ट्यबोधस्य वैलक्षण्यानुपपत्तिः, प्रपञ्चितं चेदमाधिकमन्यत्र ।

तदंशे विशेषणतापन्नस्यैव तन्निष्ठविषयतावच्छेदकत्वमिति तु बोध्यम् । तद्धर्मावच्छिन्नविषयता च [2]न तद्धर्मप्रकारतानिरूपिता, तस्यास्तथात्वे मानाभावात् । न चैवं 'भूतलं घटवदि'त्यादिज्ञानानां भूतलत्वादिप्रकारतानिरूपितविशेष्यताशालित्वानुपपत्तिरिति वाच्यम्, केवल'मेकत्र द्वयमि'ति रीत्या

१--'घटपटत्वाद्य०' इति दे० । २--'न' इति नास्ति दे० ।

भूतलत्वघटवैशिष्ट्यावगाहिज्ञानीय भूतलत्वादिनिष्ठानवच्छिन्न-प्रकारतानिरूपितविशेष्यतानियामकसामग्र्या अपि तादृशविशिष्टवैशिष्ट्यबोधकाले सत्त्वात् तस्य तादृशविशिष्टविषयताशालित्वस्यावश्यकत्वात्तत एव तथात्वोपपत्तेः।

वस्तुतस्तु, विशिष्टवैशिष्ट्यबोधविचारे निरवच्छिन्नविषयत्वादीनां [2]विशिष्टवैशिष्ट्यबोसाधारण्यस्य खण्डितत्वात्तादृशविशेष्यताशून्यबोधस्य भूतलत्वादिप्रकारतानिरूपितविशेष्यताशालित्वोपपत्तये भूतलत्वाद्यवच्छिन्नविशेष्यताया एव तत्प्रकारतानिरूपितत्वं स्वीकरणीयम्।

अथैवं तादृशज्ञानस्य भूतलत्वप्रकारतानिरूपितभूतलत्वाद्यवच्छिन्नविशेष्यताशालित्वाद् भूतलत्वादिविशिष्टे भूतलत्वादिवैशिष्ट्यावगाहिनो 'भूतलं भूतलमि'त्याकारकज्ञानाद् 'भूतलं घटवदि'त्याकारकज्ञानस्य वैलक्षण्यानुपपत्त्या [3]तादृशज्ञानाद् भूतलत्वविशिष्टे भूतलत्ववैशिष्ट्यावगाहिस्मरणापत्तिरिति चेत्? न, 'घटवद्भूतलमि'त्याद्याकारकज्ञानीयभूतलविशेष्यताया भूतलत्वप्रकारतानिरूप्यत्वेऽपि तस्या भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन न तन्निरूप्यत्वम्, किंतु भूतलविशेष्यतात्वेन। 'भूतलं भूतलमि'त्यादौ च भूतलत्वावच्छिन्नत्व-

---

१–'भूतलत्वाद्यनवच्छिन्नभूतलत्वादिप्र०' इति दे०। २–'अखिलविशिष्ट०' इति दे०। ३–'तादृशज्ञानानन्तर' इति दे०।

विशिष्टविशेष्यतात्वेनैव भूतलप्रकारतानिरूपितत्वमित्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः ।

अवच्छेदकत्वमपि द्विविधम्–अवच्छिन्नं, निरवच्छिन्नं च । तत्रावच्छिन्नमवच्छेदकं जातिमद् भूतलं घटवदित्यादौ, तत्र भूतलत्वा[1]दिनिष्ठविशेष्यतावच्छेदकताया जातित्वाद्यवच्छिन्नत्वात् । भूतलं घटवदित्यादौ च भूतलत्वादिनिष्ठविशेष्यतावच्छेदकत्वादकं निरवच्छिन्नमिति । एवमवच्छेदकतानिरूपितावच्छेदकत्वादिकमपि व्याख्यातम् । अवच्छेदकतावच्छेदकं त्ववच्छेदकांशे विशेषणतापन्नमेवेति बोध्यम् ।

विषयतावद्विषयादिभेदेनानुगतानां विषयतानामनुगमकं विषयतात्वमप्यधिकमाख्येयम् , अन्यथा घटो ज्ञानविषयः [2]पटो ज्ञानविषय इत्याकारिकाया अनुगतप्रतीतेरनुपपत्तेः । घटत्वविशिष्टबुद्धित्वावच्छिन्नं प्रति घटत्वादिविषयकज्ञानत्वादिना हेतुत्वानुपपत्तेः, घटत्वाद्येकैकवृत्तिविषयतानामेव प्रकारताविशेष्यत्वादिभेदेन नानाविधतया कारणतावच्छेदकाननुगमेन व्यभिचारप्रसङ्गात् ।

एवं [3]विशेष्यतात्व-तत्तदवांतरावच्छेदकत्व-प्रकारता[4]त्वादिकमप्यनुगतप्रतीतिबलादतिरिक्तमुपगंतव्यम् । अत एव

---

१ 'दिनिष्ठविशेष्यताया' इति खं० प्रतौ । २ 'घटो' इति दे० । ३ 'विषयतात्व०' इति दे० । ४ 'तात्वविशेष्यतात्वादि०' इति दे० ।

पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्याद्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमादिप्रकारताशालिज्ञानत्वादिनानुगतहेतुत्वकल्पनमुपपद्यते । अन्यथा तत्तद्धूमादिभेदभिन्नानां प्रकारतात्वादीनां अननुगमेन तदनुपपत्तेः । प्रकारतात्वविशेष्यतात्वादिकं न मिथो विरुद्धम्, 'घटवद् भूतलमि'त्यादिज्ञाने घटत्वादिप्रकारतानिरूपितघटादिनिष्ठविशेष्यताया एव भूतलादिनिष्ठविशेष्यतानिरूपितप्रकारतारूपतया तत्र विशेष्यतात्वप्रकारतात्वयोः समावेशात् । तत्र तादृशप्रकारताविशेष्यतयोर्भेदे 'घटवद् भूतलं [1]द्रव्यं,' 'द्रव्यवद् भूतलं घटश्चे'ति ज्ञानयोर्वैलक्षण्यानुपपत्तेः । उभयत्रैव घटत्वप्रकारतानिरूपिताया घटविशेष्यताया घटप्रकारतानिरूपितभूतलविशेष्यतायाश्च सत्त्वात् । मन्मते प्रथमे घटत्वप्रकारतानिरूपितघटविशेष्यता भूतलनिष्ठविशेष्यतानिरूपितप्रकारत्वाभिन्ना द्रव्यत्वप्रकारतानिरूपितविशेष्यता च तद्भिन्ना । द्वितीये च द्रव्यत्वप्रकारतानिरूपितघटविशेष्यता भूतलविशेष्यतानिरूपितप्रकारताभिन्ना, घटत्वप्रकारतानिरूपितविशेष्यता च तद्भिन्नेति वैलक्षण्योपपत्तेः ।

एवं 'रक्तदण्डवान् पुरुष' इत्यादिज्ञाने रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतैव ([2]युक्ता) पुरुषविशेष्यता-

१ 'द्रव्यं' इति नास्ति दे. । २.दे. प्रतौ अधिकः पाठः ।

निरूपितप्रकारतारूपा स्वीकार्या । तद्भेदे 'रक्तो दण्डो, दण्डवान् पुरुष' इत्यादिसमूहालंबनतादृशविशिष्टबुद्धेर्वैलक्षण्यानुपपत्तेः । उभयत्रैव [1]रक्तत्वप्रकारतानिरूपिता या दण्डप्रकारता तन्निरूपितविशेष्यतायाः सत्त्वादिति ।

**केचित्तु** उद्देश्यत्वविधेयत्वे अपि विषयताविशेषौ । **न च** किंचिद्धर्मावच्छिन्नविशेष्यत्वमेवोद्देश्यत्वम्, तादृशविशेष्यतानिरूपितप्रकारत्वमेव विधेयत्वमस्तु, किं तयोरतिरिक्तत्वस्वीकारेणेति **वाच्यम्**, तथा सति 'वह्निमान् पर्वतो घटवानि'त्यादिबोधस्यापि पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्न्यादिविधेयताशालित्वात् 'पर्वतो वह्निमानि'त्यनुमित्यनंतरमिव तादृशानुमित्यनंतरमपि 'पर्वते वह्निमनुमिनोमी'त्याद्यापत्तेः । मन्मते तु तादृशज्ञानव्यावृत्तायाः पर्वतादिविशेष्यतानिरूपितप्रकारताविलक्षणपर्वतादिनिष्ठोद्देश्यतानिरूपितवह्न्यादिविधेयताया एव तादृशानुव्यवसायविषयत्वाभ्युपगमादेव तादृशानुव्यवसायाऽऽपत्त्यसंभवात् ।

[3]अथ पर्वतविशेष्यकवह्निप्रकारकानुमितित्वमेव तादृशानुव्यवसायविषयः, विषयतासंबंधेन तादृशानुव्यवसायं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वेन तादात्म्य-

---

१ नास्ति दे० प्रतौ । २ रक्तत्वप्रकारतानिरूपितदण्डविशेष्यताया दण्डप्रकारतानिरूपितपुरुषविशेष्यतायाश्च सत्त्वात् इति दे० । ३ 'अथे' त्यस्य अष्टषष्टिपृष्ठे 'चेत्?' इत्यनेन सहान्वयःकार्यः ।

प्रत्यासत्त्या हेतुत्वोपगमान्न 'वह्निमान् पर्वतो घटवानि'त्याकारकानुमित्यनंतरं तथाविधानुव्यवसायापत्तिरिति किमतिरिक्तविधेयतया ?

**न च** तादृशगुरुधर्मावच्छिन्नस्य तथाविधानुव्यवसायहेतुत्वकल्पनापेक्षया पर्वतविशेष्यतानिरूपितवह्निविधेयताकानुमितित्वेन तद्हेतुत्वकल्पने लाघवादतिरिक्तविधेयता सेत्स्यतीति **वाच्यम्**, लाघवमात्रेणातिरिक्तविषयतासिद्धौ धूमपरामर्शादिजन्यतावच्छेदकतयापि विलक्षणविषयतासिद्धिप्रसङ्गात्। क्लृप्तविषयतायास्तज्जन्यतावच्छेदकत्वे 'तस्या' आलोकलिङ्गकानुमितिसाधारणतया तत्र व्यभिचारवारणायाऽव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ प्रवेशेऽतीवगौरवम् ।

**अथा**तिरिक्तविधेयतानभ्युपगमे सिद्ध्यभावजन्यतावच्छेदकं दुर्वचम् । तथाहि—'पर्वतो वह्निमानि'त्यादिसिद्ध्यभावस्य जन्यतावच्छेदकं न पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारताकानुमितित्वम्, 'वह्निमान् पर्वतो घटवानि'त्येतादृशानुमितौ व्यभिचारात् । नापि पर्वतत्वावच्छिन्नविशेष्यताकवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वम्, 'वह्निव्याप्यधूमवान् पर्वतो घटव्याप्यवांश्चे'त्याद्याकारकसमूहालंबनजन्यायां तथाविधानुमितौ व्यभिचारादिति **चेत्** ? न, वह्नित्वान्यधर्मानवच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमिति-त्वस्यैव 'पर्वतो वह्निमानि'त्येतादृशसिद्ध्यभावजन्यतावच्छेद-

कत्वस्वीकारात् । 'वह्निमान् पर्वतो घटवानि'त्याद्याकारकानुमितिविशेष्यताया वह्नित्वान्यघटत्वावच्छिन्नप्रकारतानिरूपितत्वेन व्यभिचारानवकाशात् ।

**न चैवमपि** 'वह्निमत्पर्वतवान् देश' इत्याद्याकारकानुमितौ व्यभिचारो दुर्वारस्तादृशानुमितिविशेष्यताया वह्नित्वान्यधर्मानवच्छिन्नप्रकारतानिरूपितत्वादिति **वाच्यम्**, तादृशमुख्यविशेष्यताया एव निवेशनीयत्वात्। **न चैत** दपेक्षया पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयतायास्तादृशसिद्ध्यभावजन्यतावच्छेदकत्वे लाघवात्तत्सिद्धिरिति **वाच्यम्** लाघवेनातिरिक्तविषयतासिद्धेः प्रागेव निरस्तत्वादिति **चेत्** ?

**मैवम्**, अतिरिक्तविधेयतानभ्युपगमे 'वह्निं नानुमिनोमी'ति प्रतीतेरनुमितिनिष्ठो वह्निप्रकारत्वाभावः, आत्मनिष्ठो वह्निप्रकारकानुमितित्वावच्छिन्नाभावो वा विषयो वाच्यस्तथा च 'वह्निमान् पर्वतो घटवान्, वह्निमत्पर्वतवान् देश' इत्याद्यनुमितिकाले तथाप्रतीत्यनुदयप्रसंगस्तादृशानुमितौ वह्निप्रकारत्वाभावस्यात्मनि च तथाविधानुमितित्वावच्छिन्नाभावस्यासत्त्वात् । मम तु वह्निविधेयकत्वाभावस्यानुमितौ वह्निविधेयकानुमितित्वावच्छिन्नाभावस्यात्मनि वा तादृशप्रतीतिविषयत्वोपगमान्नानुपपत्तिः ।

**न च** तदानीं भ्रमरूपैव तादृशप्रतीतिरुत्पद्यते, तत्र च विषयासत्त्वमकिंचित्करमिति **वाच्यम्**, यथाकथंचित् प्रमात्व-

स्य शक्योपपादनत्वे प्रतीतिभ्रमत्वकल्पनाया अन्याय्यत्वात् । न च वह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वावच्छिन्नाभावस्यैव तद्विषयत्वोपगमान्नानुपपत्तिः तादृशानुमितेरतथात्वादि[1](अतिरिक्तविषयतानभ्युपगमेऽपि न तथाविधप्रत्ययानुपपत्तिरित्य)ति वाच्यम्, तथा [2]सत्यपि 'वह्निव्याप्यधूमवान् पर्वतो घटव्याप्यवानिति' परामर्शजन्यानुमित्यनंतरं तथाप्रतीत्यनुपपत्तितादवस्थ्यात् । अनुमितिपरामर्शयोः कार्यकारणभावाग्रहदशायामपि तादृशप्रत्ययस्य सर्वानुभवसिद्धत्वात्तादृशाभावस्य तद्विषय(क)त्वासंभवाच्च ।

अथैवमपि विधेयत्वमेवातिरिक्तमास्ताम्, उद्देश्यत्वं तु विशेष्यत्वरूपमेवास्तु । किं च, विधेयतावद् विधेयतात्वमप्यवश्यमतिरिक्तं स्वीकरणीयम्, अन्यथा विधेयतानां तत्तद्विधेयादिभेदेन भिन्नतयाऽननुगमात्तद्घटितोपदर्शितधर्मावच्छिन्नप्रतियोगिताकस्याभावस्यैकस्यासंभवात्, तावदभावकूटस्य दुर्ज्ञेयतया तादृशप्रतीत्यनुपपत्तितादवस्थ्यात् । तथा चातिरिक्तविधेयत्वादिकल्पनमनर्थकम्, 'पर्वतो वह्निमानि'त्याद्याकारकप्रत्यक्षसाधारणवह्न्यादिप्रकारतायां विधेयतात्वस्वीकारेणैवोपपत्तेः ।

न च तादृशप्रत्यक्षादिसाधारणवह्न्यादिप्रकारतातो 'वह्निमान् पर्वतो घटवानि'त्यादिज्ञानीयप्रकारताया भेदे

---

१. ( ) कोष्टगतः पाठः दे० प्रतावधिकः । २-'सत्यपि पूर्वोक्तसमूहालम्बनजन्यतथाविधानुमित्यनन्तरं तथा०' इति दे० ।

मानाभावात् तत्र विधेयतात्वस्वीकारे तथाविधानुमितिदशायां 'वह्निं 'नानुमिनोमी'त्यनुव्यवसायानुपपत्तितादवस्थ्यमिति **वाच्यम्**, 'वह्निमान् पर्वतो घटवानि'त्यादिज्ञानीयवह्निप्रकार-ताया घटादिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानि-रूपिततया 'पर्वतो वह्निमानि'त्येतादृशज्ञानीयवह्न्यादिप्रकार-तायाश्चातथात्वेऽनयोर्भेदस्यावश्यकत्वादिति **चेत्** ?

**मैवम्**, प्रकारत्वाद्यतिरिक्तविधेयत्वादीनामनभ्युपगमे 'पर्वते वह्नि'रित्यादिवाक्यजन्यशाब्दबोधस्य वह्न्यादिविधे-यकत्वपर्वतोद्देश्यकत्वानुपपत्तिरित्यतिरिक्तविधेयत्वादिकल्पन-मावश्यकम् ।

**न च** 'पर्वतो वह्निमानि'तिवत्तत्र नास्त्येव पर्वतवह्न्यो-रुद्देश्यविधेयभावः, किंतु विशेषणविशेष्यभावापन्नयोर्वह्नि-पर्वतवृत्तित्वयोरेवेति **वाच्यम्**, शाब्दबोधस्थले प्राग्निर्दिष्टस्यै-वोद्देश्यतया चरमनिर्दिष्टपदार्थस्यैव विधेयतया तादृशवाक्य-जन्यशाब्दबोधे वह्निपर्वतवृत्तित्वयोरुद्देश्यविधेयभावाऽसंभवात्, अन्यथा 'वह्निः पर्वते' 'पर्वते वह्नि'रित्येतादृशवाक्यजन्य-शाब्दबोधयोर्विशेषणविशेष्यभावाऽवैलक्षण्येन वैलक्षण्यानुप-पत्तेः। अत एव 'गुणानां गुणत्वमि'त्यत्र गुणत्वस्यैवोद्देश्य-तावच्छेदकत्वं तस्यैव विधेयत्वमित्यभिप्रायेणोपाये उपाय-कृतोद्देश्यतावच्छेदकत्वविधेययोरैक्ये शाब्दबोधानुपपत्तिरा-ऽऽशंकिता ।

---

१-'०मनु०' इति दे० २-'वाच्यम्' इति नास्ति दे० ।

यदि च विशेषणविशेष्ययोरेवोद्देश्यविधेयभावस्तदा तत्र गुणत्वस्यो[1]द्देश्यतावच्छेदकतया गुणवृत्तित्वस्य विशेषणतया गुणत्वस्याऽतथात्वेन [2]तदसंगतमेव स्यादिति विधेयत्वादीनां प्रकारताविशेषादिरूपत्वे 'इतरव्यापकीभूताभावप्रतियोगिमती पृथिवी'त्यादिपरामर्शजन्यायाः 'पृथिव्यामितरभेद' इत्याद्याकारकायाः साध्यविशेष्यकानुमितेस्तद्विधेयकत्वानुपपत्त्या तदुत्तर'मितरभेदं नानुमिनोमी'त्याद्यनुव्यवसायाऽऽपत्तिः ।

न च तादृशज्ञानीयेतरभेदविशेष्यतायामेव विधेयतात्वोपगमान्न तादृशानुमितेरितरभेदादिविधेयकत्वानुपपत्तिरिति वाच्यम् , तथा सति 'पृथिवीव्याप्यवानितरभेद' इत्याद्याकारकपरामर्शजन्याया [3]आधारतासंबंधेन पृथिव्यादिसाध्यकतथाविधानुमितेरपीतरभेदादिविधेयकत्वोपपत्तेस्तथाविधानुमित्यो-वैलक्षण्याभावप्रसंगात् ।

अथ 'पर्वते वह्नि'रित्यादिशाब्दबोधे 'पृथिव्यामितरभेद' इत्याद्यनुमितावतिरिक्तविधेयत्वादिसिद्धावपि 'पर्वतो वह्निमान् , पृथिवीतरभेदवती'त्याद्याकारकानुमित्यादौ प्रकारतातिरिक्तविधेयत्वादौ मानाभावः, वह्न्यादिवृत्त्येकैकप्रकारत्वादिनिरूपकीभूतानंतानुमित्यादिव्यतिरिक्त[4]विधेयतासंबंधकल्पनापेक्षया तादृशप्रकारत्वादौ विधेयतात्वादिकल्पनाया

---

१–'विशेष्यताव०' इति दे० । २–तदत्यन्ताऽ०' इति० दे० । ३–'आधेयता०' इति दे० ४–'विषयता०' इति दे० ।

एवोचितत्वादिति **चेत्** ? **न**, प्रत्यक्षादिसाधारणप्रकारताया विधेयत्वांगीकारेऽनुमित्यादिस्थले वाधबुद्ध्यादीनां प्रतिबंधकतायां इच्छाधीनप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशे गौरवप्रसंगात् । मन्मते तु विधेयताया एव तादृशप्रतिबध्यतावच्छेदककोटौ निवेशनीयतया तस्याश्च प्रत्यक्षसाधारण्याऽनभ्युपगमे [1](अनाहार्यप्रत्यक्षे) व्यभिचारविरहेण प्रत्यक्षान्यत्वस्याऽनिवेशात् । **न च** परोक्षत्वजातेः प्रतिबध्यतावच्छेदकत्वोपगमेनैवाहार्यप्रत्यक्षे व्यभिचारवारणसंभवेन मयापि प्रत्यक्षान्यत्वं न निवेश्यत इति **वाच्यम्**, परोक्षत्वजातेरन्यत्र दूषितत्वात् ।

**अथ** लाघवेनातिरिक्तविषयतासिद्धेः प्रागेव निरस्तत्वात् कथमेतादृशयुक्त्या तादृशानुमित्यादावतिरिक्तविधेयता सेत्स्यतीति **चेत्** ? **न**, एतादृशयुक्त्यैतादृशविषयता न कल्प्यते, किन्तु, 'पर्वते वह्निः' 'पृथिव्यामितरभेदः' इत्याद्याकारकशाब्दानुमित्यादौ पूर्वोक्तयुक्त्या सिद्धस्य विषयताविशेषस्य 'पर्वतो वह्निमान्' 'पृथिवीतरभेदवती' त्याद्याकारकानुमित्यादावेतादृशलाघवेन संबंधः कल्प्यते इति न काचिदनुपपत्तिरिति ।

**अथ** 'पृथिव्यामितरभेद', 'इतरभेदवती पृथिवी' त्याद्याकारकानुमित्योरे[2]तादृशविधेयतास्वीकारे साध्यविशेष्यकानु-

१-अधिकोऽयं पाठः दे० प्रतौ । २-'रेकविधे०' इति दे० ।

मितौ साध्यप्रसिद्धेः प्रतिबध्यतावच्छेदकं दुर्वचम्। तथाहि—इतरभेदज्ञानस्य प्रतिबध्यतावच्छेदकं यदीतरभेदविशेष्यकानुमितित्वं तदा'इतरभेदः पृथिवीव्याप्यवानि'त्यादिपरामर्शजन्येतरभेदपक्षकानुमितौ व्यभिचारः। इतरभेदविधेयकत्वे सति तद्विशेष्यकानुमितित्वस्य प्रतिबध्यतावच्छेदकत्वेऽपि 'पृथिवीतरभेदव्याप्यवतीतरभेदः पृथिवीव्याप्यवानि'त्याद्याकारकसमूहालंबनजन्यायाः 'पृथिवीतरभेदवती पृथिव्यामितरभेद' इत्येतादृशसमूहालंबनानुमितौ व्यभिचारः, तादृशानुमितेरितरेतरभेदविधेयकत्वात् तद्विशेष्यकत्वाच्च। मन्मतेऽत्र प्रकारताभिन्नेतरभेदविधेयतैवेतरभेदज्ञानप्रतिबध्यतावच्छेदिकेति न व्यभिचारः। तादृशसमूहालंबनानुमितिनिरूपितेतरभेदविधेयतायाः प्रकारतारूपतया तदन्यत्वाभावादिति चेत् ?

न, इतरभेदविशेष्यकपरामर्शाजन्येतरभेदविशेष्यकानुमितित्वस्यैव मन्मते इतरभेदज्ञानप्रतिबध्यतावच्छेदकत्वोपगमात्। 'पृथिवीव्याप्यवानितरभेद'इत्याद्याकारकपराम[1]र्शजन्यानुमितेश्चेतरभेदविशेष्यकपरामर्शजन्यत्वेन व्यभिचारानवकाशात्। न चैतादृशगुरुधर्मस्य साध्यसिद्धिप्रतिबध्यतावच्छेदकत्वे गौरवात् 'पृथिवीतरभेदवती'त्याद्याकारकानुमितिनिरूपितप्रत्यक्षादिसाधारणेतरभेदादिप्रकारतायां विधेयतात्वकल्पनमेवोचितमिति वाच्यम्, तथा सति धर्मितावच्छेदकभेदेनानन्त-

१—'मर्शाऽजन्य' इति दे०।

बाधबुद्ध्यादिप्रतिबंधकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वनिवेशेन गौरवात्तदपेक्षया धर्मिविशेषामिश्रितसाध्यप्रसिद्धिप्रतिबंधकतायां तादृशधर्मस्य प्रतिबध्यतावच्छेदककोटिनिवेशनौचित्यादिति ।

एवमापत्तिस्थले आपाद्यत्वमपि विषयताविशेषः । आपत्तिनिरूपितप्रकारतासामान्यस्यापाद्यतारूपत्वे 'वह्निमान् पर्वतो घटवान् स्यादि'त्याद्याकारकापत्तेरपि वह्न्यादेरापाद्यतापत्तेः । 'पर्वतो वह्निमानि'त्याद्याकारकवह्न्याद्यनवच्छिन्नविशेष्यताशालिज्ञानीयविलक्षणवह्न्यादिप्रकारतायास्तत्त्वोपगमेऽपि 'वह्निमान् पर्वतः, पर्वतो घटवान् स्यादि'त्याद्याकारकापत्तौ वह्न्यादेस्तथात्वापत्तेर्दुर्वारत्वात् । अथ स्वव्यतिरेकनिर्णयजन्यतदापत्तिविषयत्वमेव स्वस्य तदापत्तिनिरूपितमापाद्यत्वमस्तु, किमतिरिक्तविषयतास्वीकारेण ? उक्तसमूहालम्बनापत्तौ घटव्यतिरेकनिर्णयस्यैव हेतुतया वह्न्यादेस्तदापाद्यत्वाऽसंभवादिति चेत् ? न, तादृशव्यतिरेकनिर्णयजन्यत्वाद्यनुपस्थितावपि वह्न्यादिनिष्ठापाद्यत्वावगाहिनो 'वह्निमापादयामी'त्याद्यनुव्यवसायस्यानुभवसिद्धतयाऽऽपाद्यत्वस्य स्वव्यतिरेकनिर्णय—जन्यतदापत्तिविषयरूपत्वाऽसंभवात् ।

अथ वह्न्यादिप्रकारकापत्तित्वमेव-तादृशानुव्यवसायविषयः, तादृशधर्म[1]प्रकारतात्वावच्छिन्नविषयतासंबंधेन तादृ-

१ 'प्रकारतानिरूपितवि०' इति दे०।

ज्ञानुव्यवसायं प्रति वह्न्यभाववत्तानिर्णयजन्यतायाः हेतुत्वा-न्नोपदर्शितसमूहालम्बनानन्तरं तादृशानुव्यवसायप्रसंगः। आप-त्तित्वं च मानसत्वव्याप्यजातिविशेषः।

न च 'वह्निमापादयामीत्याद्यनुव्यवसायसाक्षिक'[1]पर्व-तादिविषयतानभ्युपगमे वह्न्यादिव्याप्यवत्तादिनिर्णयजन्यताव-च्छेदकं वह्न्यादिप्रकारकापत्तित्वमेव वाच्यम्, तथा च तादृशसमूहालंबनाऽऽपत्त्यादौ व्यभिचार इति वाच्यम्, अनु-मितिस्थलीयकार्यकारणभाव इव कारणवैशिष्ट्यं निवेश्यैव व्यभिचारस्य वारणीयत्वात्। भवन्मतेऽप्यन्यापादकापत्तौ व्यभिचारवारणाय वैशिष्ट्यनिवेशस्यावश्यकत्वात्। एवं वह्न्यभाववत्तानिर्णयजन्यतावच्छेदककोटावपि तद्वैशिष्ट्यस्य निवेशनीयतया न तस्य समूहालंबनापत्त्यादौ व्यभिचारः। भवन्मतेऽपि वह्निमद्भेदादिनिर्णयजन्यवह्न्याद्यापादकाऽऽपत्तौ व्यभिचारवारणाय तद्वैशिष्ट्यनिवेशस्यावश्यकत्वात्।

न च पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्यादिविशिष्टबुद्धौ पर्वत-त्वाद्यवच्छिन्नविशेष्यकवह्न्यभावादिमत्तानिर्णयाभावहेतुतायां 'पर्वतो वह्निमान् स्यादि'त्यापत्तौ व्यभिचारवारणाय पर्वतत्वा-द्यवच्छिन्नविशेष्यकवह्न्याद्यापादकापत्त्यन्यत्वं जन्यतावच्छेदक-कोटौ निवेश्यमिति तज्जन्यतावच्छेदककोटिप्रविष्टतया विशे-ष्यताविशेषसिद्धिः, वह्नि[2]प्रकारकान्यत्वस्य तत्र निवेशे 'वह्नि-

---

१ 'पर्वतातिरिक्तवि.' इति दे.। २-'प्रकारकापत्त्यन्य०" इति दे०।

मान् पर्वतः, पर्वतो घटवान् स्यादि'त्यादिसमूहालंबनानां तादृशबोधदशायामापत्तेरिति **वाच्यम्**; जन्यतासंबंधेन वह्न्यभाववत्तानिर्णयवदन्यत्वस्यैव तत्र निवेशनीयतया व्यभिचारापत्तेर्वारणसंभवात् । **न च** जन्यत्वनिवेशनापेक्षया विषयताविशेषनिवेशे लाघवात्तत्सिद्धिरिति **वाच्यम्**, कार्यतावच्छेदकलाघवेनातिरिक्तविषयतासिद्धौ [1]तत्तदापाद्यव्यतिरेकज्ञानजन्यतावच्छेदकतया विषयताविशेषाणां सिद्धिप्रसंगात्।

**वस्तुतस्तु** बाधाभावजन्यतावच्छेदककोटौ जन्यतासंबंधेन बाधवदन्यत्वस्य निवेशनमेवोचितम् । अन्यथा बाधकालीनेच्छाजन्यज्ञाने व्यभिचारवारणायेच्छाया उत्तेजकत्वे गौरवात्। [2]मन्मते—आहार्यज्ञानस्यापि बाधजन्यतया तस्य तादृशकार्यतावच्छेदकानाक्रान्ततयैव व्यभिचारसंभवेनेच्छाया उत्तेजकत्वानभ्युपगमात् ।

**न च** बाधकालीनेच्छाधीनज्ञाने बाधहेतुताया अप्रमाणिकतया एतदनुरोधेन तत्कल्पने च गौरवादिच्छाया उत्तेजकत्वमावश्यकमिति **वाच्यम्**; आपत्तिस्थले बाधहेतुताया आवश्यकत्वात्तत्रापत्तित्वमनिवेश्येच्छाकालीनज्ञानसाधारण—तादृशबाधाऽव्यवहितोत्तरज्ञानत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमादतिरिक्तकारणत्वाऽकल्पनात् । **न चैवमापत्त्यन्यज्ञानस्यापि** बाधकाले इच्छां विनापत्तिरिति तत्रेच्छाहेतुत्वकल्पने

१-'तत्तदापादवत्ताज्ञान०' इति दे० । २-'मन्मते' इति नास्ति दे० ।

गौरवमिति **वाच्यम्**, इच्छाया उत्तेजकत्वेऽप्रामाण्यग्रहादिभिः सममिच्छाऽभावस्य विशेषणविशेष्यभावे विनिगमनाविरहेणानुगतत्वादिच्छाया हेतुत्वकल्पनस्यैवोचितत्वादिति **चेत्** ?

**मैवम्**, आपाद्यत्व[1]रूपविशेषानभ्युपगमे ज्ञाननिष्ठो वह्न्यादिप्रकारकापत्तित्वाभाव आत्मनिष्ठस्तादृशापत्तित्वावच्छिन्नाभावो वा 'वह्निमापादयामी' त्यनुव्यवसायविषयो वाच्यः, न तु वह्न्यादिव्यतिरेकनिर्णयजन्यत्वविशिष्टापत्तित्वाद्यभावः, तादृशजन्यत्वाद्यनुपस्थितिदशायामपि तादृशप्रतीतेः सर्वानुभवसिद्धत्वात् । तथा च, पूर्वोपदर्शितसमूहालंबनदशायां 'घटमापादयामि, न वह्निमि'त्याद्यनुव्यवसायानुपपत्तिरिति तादृशविषयतास्वीकार आवश्यक इति । एवं च तादृशविषयतानिरूपकत्वमेवापत्तित्वं न तु जातिविशेषो, मानाभावात् । आपत्त्यन्यज्ञाने तादृशविलक्षणविषयताभावादेवा'ऽऽपादयामी'-त्याद्यनुव्यवसायविरहोपपत्तिरिति **बोध्यम्** ।

**अत्रेदमवधेयम्**–विधेयत्वमेवापत्तिः स्वीक्रियते । तथा चापत्तिनिरूपितविधेयत्वमेवापाद्यत्वम् । 'पर्वतो वह्निमान्, पर्वतो घटवान् स्यादि'त्याद्याकारकापत्तौ घटस्यैव विधेयत्वमुपगम्यते न तु वह्नेरतो न तादृशापत्त्यनंतरं 'घटमापादयामि, न तु वह्निमि'त्याद्याकारकानुव्यवसायानुपपत्तिः । विधेयताया अनुमित्यादिसाधारण्येऽपि तत्रा-

१–'रूपविषयताविο' इति दे० ।

पत्तित्वाख्यजातिविशेषाभावान्न तदनंतरमापादयामी'त्यनुव्यवसायः । आपत्तित्वजातौ मानाभाव'इति तु **न वाच्यम्**, 'आपादयामी'त्यनुव्यवसायस्यैव मानत्वाद् । विषयभेदेनानन्तविषयताकल्पनापेक्षया जातिकल्पने लाघवस्यैव विवादभञ्जकत्वात् ।

**न च** भवन्मते बाधबुद्धिप्रतिबध्यतावच्छेदककोटौ तद्विधेयकविजातीयज्ञानभिन्नत्वं निवेश्यं, तद्विधेयकान्यत्वनिवेशेऽनुमित्याद्यसंग्रहापत्तेः, मम तु तन्निष्ठविलक्षणविषयताकान्यत्वमेव निवेश्यत इति **वाच्यम्**, इच्छाधीनज्ञाने व्यभिचारवारणायोत्तेजकत्वकल्पनापेक्षया लाघवेन जन्यतासंबंधेन बाधवदन्यत्वस्यैव निवेशितत्वात्तेनैवापत्तावपि व्यभिचारवारणात्, तदन्यत्वस्यैवानिवेशात् कार्यतावच्छेदकत्वादिलाघवेनातिरिक्तविषयतासिद्धेः, प्रतिबंधकसहस्रकवलितत्वात् ।

**एतेना**नुमित्यादिसाधारणविलक्षणविषयताया आपत्त्यादिसाधारण्येन तत्स्थलीयप्रतिबंधकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वमापत्त्यन्यत्वंनिवेशनीयमिति गौरवमित्यपि **परास्तमिति कृतं पल्लवितेन** ।।श्रीः।।

## ।। समाप्तो विषयतावादः ।।

---

१–'वादिति' इति खं० प्रतौ ।

महोपाध्याय—न्यायाचार्य—

श्रीमद् यशोविजयगणिप्रणीतम्

# वायूष्मादेः प्रत्यक्षाप्रत्यक्षत्वविवादरहस्यम् ।

। ऐँ नमः ।। वायोश्चाक्षुषसाक्षात्कारवत् स्पार्शनोऽपि न साक्षात्कार इति **नैयायिक**सिद्धान्तो न श्रद्धेयः, वायोरस्पार्शनत्वे शरीरवायुसंयोगानन्तरं 'शीतो वायुर्वाती' त्यादिवायुमुख्यविशेष्यकलौकिकस्पार्शनानुपपत्तेः । **न चासौ न** स्पार्शनोऽपि तु मानस एवेति **वाच्यम्**, 'वायोः शीतस्पर्शं स्पृशामि, 'वातं स्पृशामी'त्याद्यनुव्यवसायानुपपत्तेः । **न** चासौ भ्रमो बाधकाभावात् । **न च** वायूनां विषयविधया तत्तद्व्यक्तित्वेन स्वविषयकलौकिकप्रत्यक्षं प्रति कारणत्वकल्पनागौरवमेव बाधकमिति **वाच्यम्**, विषयस्य तत्तद्व्यक्तित्वेन कारणत्वे मानाभावात्, विषयस्य तत्तद्व्यक्तित्वेन कारणतावृद्धिभियाऽतीन्द्रियत्वाभ्युपगमे घटादेरपि तथात्वापत्तेः ।

**न चोद्भूत**रूपस्य द्रव्यचाक्षुषवत् द्रव्यस्पार्शनेऽपि हेतुत्वात् कारणाभाव एव बाधक इति **वाच्यम्**, मानाभावात् । प्रभायाः स्पार्शनवारणाय उद्भूतस्पर्शस्य द्रव्यत्वस्पार्शनहेतुत्वावश्यकतया तत एव पिशाचादेर्गगनादेश्चाऽस्पार्शनत्वोपपत्तेः । **न च** 'प्रभा हि तेजसो रूपमि'ति नये विनिगमनाविरहादेवोद्भूतरूपस्यापि द्रव्यस्पार्शनहेतुत्वमिति **वाच्यम्**,

तथाऽप्युक्तप्रतीतेर्भ्रमत्वकल्पनाया एव विनिगमकत्वात् । उद्भूतरूपस्य हेतुत्वेऽपि त्रसरेणुस्पार्शनवारणाय द्रव्यस्पार्शनं प्रति उद्भूतस्पर्शस्य हेतुत्वावश्यकताया विनिगमकत्वाच्च । **न चैवमूष्मणो** भर्जनकपालस्थवह्न्यादेश्च स्पार्शनापत्तिः स्पार्शनं प्रति रूपस्याऽहेतुत्वादिति **वाच्यम्**, इष्टत्वात् । **न च** वायूष्मणोस्त्वाचाभ्युपगमे वृत्तिसंख्यादेरपि त्वाचापत्तिरिति **वाच्यम्**, इष्टत्वादिति **मीमांसकाः** ।

तत्र **प्राञ्चो नैयायिकाः**, सामान्यतो मानसेतरद्रव्यलौकिकप्रत्यक्षत्वाद्यवच्छेदेनैव द्रव्यलौकिकचाक्षुषं प्रत्युद्भूतरूपस्य हेतुत्वान्न वायोः स्पार्शनसाक्षात्कारसंभवः, सामान्यसामग्र्या सहिताया एव विशेषसामग्र्याः कार्योपधायकत्वात् । **न च** तादृशकार्यकारणभावे मानाभाव इति **वाच्यम्**, वाय्वादेः पिशाचादेरात्मनश्च लौकिकचाक्षुषवारणाय द्रव्यलौकिकचाक्षुषं प्रत्युद्भूतरूपस्य हेतुत्वावश्यकतया तस्यैव सामान्यतो मानसेतरद्रव्यलौकिकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वात्, असति बाधके सामान्यधर्मावच्छेदेनैव कार्यतादिग्राहकप्रमाणप्रवृत्तेरित्याहुः । **तदसत्** । मानसेतरद्रव्यप्रत्यक्षत्वस्याऽऽत्मेतरद्रव्यप्रत्यक्षत्वमादाय विनिगमनाविरहग्रस्ततया द्रव्यचाक्षुषत्वमपेक्ष्य शरीरगुरुतया च द्रव्यचाक्षुषत्वस्यैवोद्भूत(रूप)कार्यतावच्छेदकत्वौचित्यात् । बाधकसत्त्वे सामान्यस्याऽकिञ्चित्करत्वात् ।

नैयायिकैकदेशिनस्तु मूर्त्तलौकिकप्रत्यक्षत्वद्रव्यलौकिकचाक्षुषत्वयोः समशरीरतया विनिगमकाभावादुभयमेवोद्भूतरूपकार्यतावच्छेदकम्, अतो न वायूष्मादेः स्पार्शनसाक्षात्कारसम्भवः। न च मूर्तलौकिकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वेऽपि द्रव्यलौकिकचाक्षुषत्वं कार्यतावच्छेदकमावश्य(क)म्, अन्यथा आत्मन्युद्भूतरूपाभावान्मूर्तप्रत्यक्षोत्पत्त्यसंभवेऽपि चक्षुःसंयोगलक्षणसन्निकर्षसत्त्वेन द्रव्यलौकिकचाक्षुषोत्पत्तिप्रसङ्गस्य दुर्वारत्वात्, तथा चेदमेव विनिगमकमिति वाच्यम्, मूर्त्तलौकिकप्रत्यक्षत्वमात्रस्य कार्यतावच्छेदकत्वेऽपि मूर्त्तलौकिकप्रत्यक्षातिरिक्तस्य द्रव्यलौकिकचाक्षुषस्याऽलीकतया सामान्यसामग्रीविरहादेवाऽऽत्मनि द्रव्यलौकिकचाक्षुषोत्पत्तेर्वारणसम्भवात्। न च द्रव्यान्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तत्वाचवृत्तसमवायत्वेन सन्निकर्षस्य करणता, न तु त्वक्संयुक्तप्रकृष्टमहत्त्वोद्भूतस्पर्शवत्समवायत्वेन, महत्त्वोद्भूतस्पर्शयोः उभयोः प्रवेशे गौरवात्। त्वाचवत्त्वं चोपलक्षणं न च विशेषणं, तेन सर्वत्र पूर्वमाश्रयत्वाचत्विरहेऽपि न क्षतिः। तथा च वाय्वादेरस्पार्शनत्वे तद्वृत्तिस्पर्शस्पार्शनानुपपत्तिरेव मूर्त्तलौकिकप्रत्यक्षत्वस्योद्भूतरूपकार्यतावच्छेदकत्वाभावे विनिगमकमिति वाच्यम्, एकस्यामेव व्यक्तौ कालभेदेन त्वाचानामनन्ततया त्वक्संयुक्तत्वतत्समवेतत्वमपेक्ष्य त्वक्संयुक्तमहत्त्वोद्भूतस्पर्शवत्समवायसमवायत्वस्यैव लघुत्वात्। ननु

**तथापि** विनिगमनाविरहेण मूर्त्तलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपस्य हेतुतया माऽस्तु वायूष्मादेः त्वाचसाक्षात्कारः, माऽस्तु च संख्यापरिमाणादिसाधारणव्यासज्यवृत्तिगुण(त्वाच)त्वाचत्वावच्छिन्नं प्रति आश्रयत्वाचाभावस्य प्रतिबन्धकतया वाय्वादिवृत्तिसंख्यागुणस्यापि त्वाचादिसाक्षात्कारः, वाय्वादिवृत्तिक्रियायाः वाय्वादिघटितसन्निकर्षेण वाय्वादिवृत्तिवायुत्वोष्मत्वद्रव्यत्वादिजातेश्च त्वाचसाक्षात्कारस्तु **मीमांसका**भिमतो दुर्वार एव, द्रव्यान्यद्रव्यसमवेतत्वाचत्वावच्छिन्नं प्रति त्वक्संयुक्तप्रकृष्टमहत्त्वोद्भूतस्पर्शवत्समवायत्वेनैव प्रत्यासत्तित्वात्, त्वक्संयुक्तप्रकृष्टमहत्त्वोद्भूतरूपस्पर्शवत्समवायत्वेन प्रत्यासत्तित्वे गौरवात्, वायूष्मादिस्पर्शत्वाचे व्यभिचाराच्च। **न च** त्वक्संयुक्तप्रकृष्टमहत्त्वोद्भूतरूपसमवायस्य स्पर्शेतरमूर्त्तसमवेतप्रत्यक्षत्वावच्छिन्नं प्रति सन्निकर्षतया न वाय्वादिवृत्तिक्रियादेः स्पार्शनम्। स्पर्शप्रत्यक्षं प्रति तु त्वक्संयुक्तप्रकृष्टमहत्त्वोद्भूतस्पर्शवत्समवाय एव सन्निकर्ष इति **वाच्यम्**, गुरुतरकार्यकारणभावद्वयकल्पने गौरवान्मानाभावाच्च। वाय्वादिवृत्तिक्रियायाः वाय्वादिघटितसन्निकर्षेण वाय्वादिवृत्तिवायुत्वोष्मत्वादिजातेश्च त्वाचप्रत्यक्षत्वस्येष्टत्वात्, प्राचामनभ्युपगममात्रस्याऽकिञ्चित्करत्वादिति **नैयायिकसिद्धान्तं परिष्कुर्वन्ति**।

तदप्यसत् । यथा त्रसरेणुव्यावृत्तविजातीयमहत्त्वस्य सामान्यतो द्रव्यलौकिकप्रत्यक्षत्वमेव कार्यतावच्छेदकं लाघवात्, द्रव्यस्पार्शनस्य तु कार्यतावच्छेदकत्वे द्रव्यचाक्षुषं प्रति पृथग्महत्त्वसामान्यस्य कारणत्वकल्पनापत्तेरतस्त्रसरेणुर्न चाक्षुषः किन्तु तद्वृत्तिरूपादिकमेव चाक्षुषमित्यस्य सुवचत्वेऽपि 'त्रसरेणुश्चलतीति' प्रत्ययानन्तरं 'त्रसरेणुं पश्यामी'त्यबाधितानुव्यवसायबलात् द्रव्यस्पार्शनस्यैव विजातीयमहत्त्वकार्यतावच्छेदकत्वस्वीकारस्तथा 'शीतो वायुर्वाती'त्यादिप्रत्ययानन्तरं 'वायुं स्पृशामि' इत्यबाधितानुव्यवसायानुपपत्तेरेव मूर्त्तलौकिकप्रत्यक्षस्योद्भूतरूपकार्यतावच्छेदकत्वाभावे विनिगमकत्वात् । मूर्त्तलौकिकप्रत्यक्षत्वस्य नित्यसाधारणतया कार्यतावच्छेदकत्वायोगाच्च । नित्यव्यावृत्तेधर्म(र्मे)कार्यतावच्छेदके संभवति असति लाघवे तत्साधारणधर्मेण कार्यत्वकल्पनानुदयात् ।

न वै मूर्त्तलौकिकप्रत्यक्षं लौकिकविषयतासम्बन्धेन मूर्त्तत्ववत्त्वम् । मूर्त्तलौकिकप्रत्यक्षे मूर्त्तत्वजातेरपि भाननियमात् । तच्च न नित्यसाधारणं, भगवत्साक्षात्कारे लौकिकविषयताविरहात्, मूर्त्तनिष्ठाया लौकिकविषयतायाः कार्यतावच्छेदकसम्बन्धत्वाभ्युपगमाच्च न समूहालम्बनप्रत्यक्षमादाय मूर्त्तवृत्तिगुणादौ व्यभिचार इति (च न) वाच्यम्, भगवत्साक्षात्कारसाधारणसाक्षात्कारत्वावच्छिन्नविषयतातिरिक्तलौकिकविषयतायां

मानाभावात् । त्वाचीयलौकिकविषयित्वमूर्त्तत्वयोः प्रवेशेन शरीरगौरवत्वेन च द्रव्यलौकिकचाक्षुषत्वमपि लौकिकविषयतासम्बन्धेन द्रव्यत्वव(त्त्वा)च्चाक्षुषत्वं, द्रव्यलौकिकचाक्षुषे द्रव्यत्वभानानियमात् । द्रव्यनिष्ठलौकिकविषयतायां मानाभावात् । त्वाचीयलौकिकविषयित्वः कार्यतावच्छेदकप्रत्यासत्तिस्तेन समूहालम्बनचाक्षुषमादाय गुणादौ न व्यभिचारः । तथा च चाक्षुषत्वप्रवेशात् मूर्त्तत्ववच्चाक्षुषत्वमादाय विनिगमकाभावेन च क्षुषत्वद्रव्यत्वादिमत्त्वयोर्विशेषणविशेष्यभावेन च कार्यकारणभावचतुष्टयप्रसङ्गाच्च इदमेव गुर्विति **वाच्यम्** । चाक्षुषत्वमात्रस्य कारितावच्छेदकत्वात् । तद्द्रव्यनिष्ठलौकिकविषयतायाः कार्यतावच्छेदकसम्बन्धत्वावश्यकत्वादेव व्यभिचारविरहात् । प्रत्यक्षत्वस्य नित्यसाधारणतया तन्मात्रस्य कार्यतावच्छेदकत्वाऽसम्भवात् ।

**किञ्च** वायूष्मादेः प्रत्यक्षत्वसन्देहेन मूर्त्तलौकिकप्रत्यक्षत्वस्य प्रत्यक्षत्वस्य वा सन्दिग्धव्यभिचारकत्वात् चाक्षुषत्वव्यापकत्वाच्च न तयोः कार्यतावच्छेदकत्वसंभवः । सम्भवति निश्चिताऽव्यभिचारके रूपे इक्ष्यमाणव्यभिचाररूपेण कारणत्ववत्कार्यत्वस्यापि विना लाघवमकल्पनात् । सम्भवति क्लृप्ताऽगुरुविशेषधर्मेऽवच्छेदके व्यापकरूपेण कारणत्ववत् कार्यस्यापि विना लाघवमकल्पनाच्च । व्याप्तिग्रहोपाये तदुपादानमेव शङ्काप्रतिबन्धकमिति व्याख्यानानन्तरमनुगताऽगुरुविशेषानु-

परिस्थितावेव सामान्यधर्मावच्छेदेन कार्यकारणभावग्रह इति भट्टाचार्यैरभिहितत्वात् । न च कारणताग्रहमात्रपरं, कार्यकारणभावग्रह इत्यभिधानादविशेषेणोभयपरत्वात्, धूमत्वावच्छेदेन च कार्यताग्रहस्यैव तत्र प्रकृतत्वेन कारणताग्रहमात्रपरत्वस्याऽयुक्तत्वाच्च ।

न च प्रत्यक्षस्य नित्यसाधारणत्वेन व्यापकधर्मे वे सन्दिग्धव्यभिचारकत्वेऽपि तदेवोद्भूतरूपस्य कार्यतावच्छेदकम्, मूर्त्तत्वविशिष्टे लौकिकविषयता च कार्यतादिशि प्रत्यासत्तिर्लाघवात्, चाक्षुषत्वस्य कार्यतावच्छेदकत्वे द्रव्यत्वविशिष्टलौकिकविषयत्वं कार्यतादिशि प्रत्यासत्तिमूर्त्तत्वविशिष्टलौकिकविषयत्वं वेत्यत्र विनिगमकाभावेन कार्यकारणभावद्वयापत्तेः, प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे आत्मप्रत्यक्षे व्यभिचारापत्त्या द्रव्यत्वविशिष्टलौकिकविषयत्वस्य कार्यदिशि सम्बन्धत्वाऽसद्भावादिति वाच्यम्, मूर्त्तत्वविशिष्टलौकिकविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नस्य कार्यत्वेऽपि द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं मूर्त्तत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं च प्रत्येकमादाय विनिगमनाविरहेण कार्यकारणभावत्रयापत्तेदुर्वारत्वात् । वस्तुगत्या द्रव्यनिष्ठस्य लौकिकविषयत्वस्य कार्यतावच्छेदकसम्बन्धत्वेन द्रव्यत्वविशिष्टत्वस्य सम्बन्धाऽघटकतया विनिगमनाविरहाच्च । द्रव्यनिष्ठचाक्षुषविषयत्वमूर्त्तनिष्ठचाक्षुषविषयत्वयोर्भेदाभावात् ।

**न च** चाक्षुषत्वस्य कार्यतावच्छेदकत्वे स्पार्शनप्रत्यक्षं प्रति उद्भूतरूपस्याऽजनकतया रसनस्य स्पार्शनवारणाय द्रव्यस्पार्शनं प्रति उद्भूतस्पर्शजनकतायां जलस्पर्शनिष्ठशीतत्वव्याप्यानुद्भूतत्वाभावस्याप्यवच्छेदककोटौ प्रवेशावश्यकत्वे गौरवापत्तेः, प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे स्पार्शनप्रत्यक्षं प्रति उद्भूतरूपस्य जनकतया तदभावादेव रसनस्पार्शनासम्भवान्न तत्प्रवेशः, उद्भूतरूपानुद्भूतस्पर्शवतो जलस्याभावादिति **वाच्यम्**, प्रत्यक्षस्य कार्यतावच्छेदकत्वे त्वाचीयलौकिकविषयत्वानामपि कार्यतावच्छेदकसम्बन्धकोटौ प्रवेशेन महद्गौरवात् ।

**ननु** तथापि प्रत्यक्षत्वस्योद्भूतरूपकार्यतावच्छेदकत्वे स्पर्शनिष्ठानुद्भूतत्वावच्छिन्नप्रतियोगिताकानुद्भूतकाभावकूटत्वेन द्रव्यस्पार्शनं प्रति हेतुत्वं, गगनादावपि तादृशाभावकूटसत्त्वेऽप्युद्भूतरूपात्मककारणान्तरविरहादेवास्पार्शनत्वोपपत्तः । चाक्षुषत्वस्य कार्यतावच्छेदकत्वे तु स्पर्शनिष्ठ नुद्भूतत्वाभावकूटवत्स्पर्शत्वेनैव द्रव्यस्पार्शनं प्रति हेतुत्वमुपेयमन्यथा गगनादेरपि स्पार्शनापत्तेः, उद्भूतरूपस्य स्पार्शनाऽहेतुत्वात् । तथा च स्पर्शत्वस्य प्रवेशात्स्पर्शत्वानुद्भूतत्वाभावकूटयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कार्यकारणभावद्वयप्रसंगाच्च महद्गौरवमतः सन्दिग्धव्यभिचारकत्वादिदमपि प्रत्यक्षत्वमुद्भूतरूपकार्यतावच्छेदकं लाघवादिति **चेत्** ? **न**, अपे-

क्षाबुद्धिभेदेन कूटत्वस्य नानाविधतया तादृशानुद्भूतत्वाभावकूटत्वेन हेतुत्वेऽनन्तकार्यकारणभावापत्तेः । अनुद्भूतत्वाभावकूटवत्स्पर्शत्वेन हेतुत्वे तु स्वरूपतोऽनुद्भूतत्वाभावकूटानां स्पर्शत्वस्य चैकत्र द्वयमिति न्यायेन व्यासज्यवृत्त्यवच्छेदकतया कूटत्वस्य कारणतावच्छेदककोटौ प्रवेशात् ।

**वस्तुतस्तु** अनुद्भूतस्पर्शे मानाभावात्, सामान्यतः स्पर्शत्वेनैव द्रव्यस्पार्शनं प्रति हेतुत्वम् । न त्वनुद्भूतत्वाभावप्रवेशोऽपीति क्व गौरवसम्भावना । न च तथापि मूर्त्तलौकिकप्रत्यक्षत्वस्य वा उद्भूतरूपकार्यतावच्छेदकत्वे द्रव्यस्पार्शनं प्रति स्पर्शस्य न हेतुत्वमुद्भूतरूपाभावादेवाऽस्पार्शनत्वोपपत्तेः, चाक्षुषत्वस्य कार्यतावच्छेदकत्वे तु गगनादेस्त्वाचवारणाय द्रव्यत्वाचं प्रति स्पर्शस्यापि पृथग्हेतुत्वमाव(व)श्यकमतो गौरवमिति **वाच्यम्**, मूर्त्तलौकिकप्रत्यक्षत्वस्याऽप्रत्यक्षत्वस्य वा कार्यतावच्छेदकत्वेऽपि प्रभाया वायोश्च स्पार्शनवारणाय द्रव्यत्वाचं प्रति स्पर्शस्य पृथग्हेतुताया आवश्यकत्वात् ।

**स्वतन्त्रास्तु** चक्षुरयोग्यद्रव्यस्यापि वायूष्मादेः स्पार्शनत्वे स्पार्शनजनकतावच्छेदकैकत्वनिष्ठजातिमादाय चाक्षु(ष)जनकतावच्छेदकैकत्वनिष्ठजात्याऽनभ्युपगमे द्रव्यस्पार्शनं प्रति स्पर्शविजातीयमहत्त्वयोः कारणत्वकल्पनाप्रसङ्गात्, चाक्षुषजनकतावच्छेदकैकत्वनिष्ठजात्यनभ्युपगमे द्रव्यचाक्षुषं प्रति महत्त्व-

सामान्यरूपयोः कारणत्वकल्पनाप्रसङ्गात् , इति चाक्षुषजनकतावच्छेदकैकत्वनिष्ठवैजात्यस्य व्याप्यत्वमेव स्पार्शनजनकतावच्छेदकैकत्वनिष्ठवैजात्यमतः कुतो वाय्वादेः स्पार्शनम् । अथ साङ्कर्यभिया वाय्वादेर्न स्पार्शनम् , त्रसरेण्वादेर्वा न चाक्षुषमित्यत्र विनिगमकाभावः । त्रसरेण्वादिरूपादेरेव चाक्षुषं न त्रसरेण्वादेरिति तत्रापि सुवचत्वात् । न च त्रसरेणुः रूपवान् त्रसरेणुश्चलतीत्यादिप्रत्यक्षानन्तरं त्रसरेणुं पश्यामीत्यबाधितानुव्यवसायबलात् त्रसरेण्वादेश्चाक्षुषमावश्यकमिति वाच्यम् , तदा 'शीतो वायुर्वाती'ति प्रत्यक्षानन्तरं 'वायुं स्पृशामी'त्यबाधितानुव्यवसायबलात् द्वयोरपि स्पार्शनत्वस्यावश्यकत्वात् । 'त्रसरेणुं पश्यामी'त्यनुव्यवसायस्य वा बाधितत्वं निश्चितं, 'वायुं स्पृशामी'त्यस्य वा बाधितत्वं सन्दिग्धमित्यस्य(श) पथमात्रनिर्णयत्वादिति चेत्? न, एवंविधविरोधे विषयमात्रासिद्धेः विनिगमनाविरहादुभयोरेव साङ्कर्यवारणाय भ्रमत्वकल्पनेऽपि वाय्वादेः प्रत्यक्षत्वादिसिद्धेश्च । एकत्वनिष्ठैकवैजात्यस्यैव द्रव्यचाक्षुषस्पार्शनोभयजनकतावच्छेदकत्वादिति प्रबलतरयुक्त्या **नैयायिक**सिद्धान्तं **परिष्कुर्वन्ति** ।

**तदपि** न सम्यगिति प्रतिभाति । स्पार्शनजनकतावच्छेदकवैजात्यव्यापकत्रसरेण्वेकत्वसाधारणवैजात्यं हि नित्यैकत्वसाधारणं निखिलतद्व्यावृत्तं वा ? आद्ये यदि नित्यैकत्वेषु मध्ये परमाण्वेकत्वमात्रसाधारणं तदा द्रव्यचाक्षुषं प्रति महत्त्वस्य

कारणत्वमावश्यकम् । यदि च गगनाद्येकत्वमात्रसाधारणं तदा द्रव्यचाक्षुषं प्रति रूपस्य कारणत्वमावश्यकम् । तथा च कार्यकारणद्वयमविशिष्टमेव, एकत्वनिष्ठवैजात्यकल्पनं पुनरधिकम् । अन्त्येऽपि कार्यमात्रवृत्तिजातितया तदवच्छिन्नं प्रति कस्यचित्कारणत्वस्यावश्यकतया द्रव्यचाक्षुषं प्रत्येकत्वस्य कारणत्वमादाय कारणताद्वयकल्पनमविशिष्टमेव, । एकत्वनिष्ठवैजात्यकल्पनं पुनरधिकमेव. कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमस्य सकलप्रामाणिकसिद्धत्वात् ।

**किञ्च** घटाकाशसंयोगद्वित्वादेः स्पार्शनवारणाय व्यासज्यवृत्तिगुणत्वाचं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन लौकिकविषयत्वावच्छिन्नत्वाचाभावस्य प्रतिबन्धकत्वमावश्यकम् । तस्य च प्रतिबध्यतावच्छेदकं न व्यासज्यवृत्तिगुणत्वाचत्वम् । गुणादित्वाचं प्रति प्रकृष्टमहत्त्ववदुद्भूतस्पर्शवत्समवायस्यातिरिक्तकारणत्वकल्पनापत्तेः । अपि तु निखिलगुणकर्मत्वाचसाधारणं द्रव्यान्यसत्त्वाचत्वमेव तत्प्रतिबध्यतावच्छेदकम् । द्रव्यान्यसत्त्वं च प्रतिबध्यतावच्छेदकतया विशेषगुणकर्ममात्रवृत्तिजातिविशेष इति त्वक्संयुक्तसमवायादिसन्निकर्षहेतुत्वनिराकरणावसरे प्रपञ्चितम् । तथा च वायूष्मादेरस्पार्शनत्वे तद्वृत्तिस्पर्शस्याप्यस्पार्शनोपपत्तिः । **न च** स्पर्शेतरद्रव्यान्यसत्त्वाचत्वमेव तत्प्रतिबध्यतावच्छेदकमिति **वाच्यम्**, स्पर्शेतरत्वप्रवेशे गौरवापत्तेः । स्पर्शेतरत्वप्रवेशे घटाकाशसंयोगादौ

स्पार्शनसामान्यापत्तिवारणाय स्पार्शनं प्रति स्पर्शत्वेन परमाण्वादिस्पार्शनवारणाय प्रकृष्टमहत्त्वत्वेन चातिरिक्तका (रणत्वाऽऽ) पत्तेश्चेति **समासः**। स्पर्शाभावस्य विजातीयस्पार्शाभावस्य वा तत्प्रतिबन्धकत्वे तु न किञ्चिदेतत्। वैजात्यं तु फलबलकल्प्यमिति ध्येयम्।

वायूष्मादेः प्रत्यक्षत्वाप्रत्यक्षत्वविवादरहस्यं समाप्तम्॥

महोपाध्याय-न्यायविशारद-न्यायाचार्य

पण्डितशिरोमणि श्रीमद् यशोविजयगणिविरचिता

# ।। वादमाला (३) ।।

ऐं नमः ।।

ऐन्द्रश्रेणिनतं नत्वा जिनं तत्त्वार्थदेशिनम् ।
वादमालां वितनुते यशोविजयपण्डितः ।।१।।

तत्र पूर्वं वस्तुलक्षणं विविच्यते । सामान्यविशेषात्मकं वस्तु । तत्र सामान्यमनुवृत्तिप्रत्ययाऽसाधारणहेतुर्वस्त्वंशः । भवति खलु भिन्नप्रदेशकनानाव्यक्तिविशेष्यकैकत्वप्रकारकप्रतीतौ तादात्म्येन तिर्यक्सामान्यं हेतुः । एकप्रदेशकनानापर्यायव्यक्तिविशेष्यकैकत्वप्रकारकप्रतीतौ च तादात्म्येनोर्ध्वतासामान्यं हेतुरित्येतद्द्विविधमप्यनुवृत्तिप्रत्ययाऽसाधारणकारणमिति ।

विशेषो व्यावृत्तिप्रत्ययाऽसाधारणहेतुर्वस्त्वंशः । भवति खल्वेकविशेष्यकानेकत्वप्रकारकप्रतीतौ तादात्म्येन विशेषो हेतुरिति । न च 'घटा अनेके' इति प्रतीतावनेकविशेष्यकत्वस्यैवानुभवादसंगतमेतदिति वाच्यम्, विशेषग्रहणाभिमुखक्षयोपशमसामर्थ्यादेकविशेष्यकानेकत्वप्रकारकबोधेऽपि तथाभिलापसम्भवादेकसामान्यतादात्म्याऽऽपन्नव्यक्तीनां कथंचिदेकत्वस्याप्यविरोधादिति । तदात्मकत्वं च तदुभयत्वम् । तच्च

भेदाभेदसम्बन्धेनैकविशिष्टाऽपरत्वम् । अतिरिक्तद्वित्वे मानाभावात् ।

यत्त्वविशिष्टयोरपि गोत्वाश्वत्वयोरुभयत्वप्रत्ययादतिरिक्तमेव द्वित्वमिति दीधितिकृताऽपदर्शितं, तन्न, तत्राप्येकज्ञानविषयत्वादिसम्बन्धेन वैशिष्ट्यस्य सम्भवात् । एतेन विरोधभ्रमेऽप्युभयत्वप्रतीतेर्भूतत्वमूर्त्तत्वा(द्यो ?)योरपि न विशिष्टत्वरूपमुभयत्वमिति विश्वोननलिखितमप्यपास्तम् । एकसम्बन्धेन विरोधभ्रमेऽपि सम्बन्धान्तरेण वैशिष्ट्यबुद्धेरप्रत्यूहत्वात् ।

ननु यदि सामान्यविशेषोभयस्य वस्तुत्वं तदा केवले सामान्ये केवले च विशेषे वस्तुत्वं न स्यादिति चेत् ? न, केवलस्य तस्याऽप्रसिद्धेः । तथापि 'एको न द्वावि'तिवत् 'सामान्यं विशेषो वा न वस्त्वि'ति स्यादिति चेत ? स्यादेव, अत एव सामान्यं विशेषो वा न वस्तु नाप्यवस्तु किन्तु वस्त्वेकदेश इति सिद्धान्तः । तत्त्वं च तत्तादात्म्ये सति तत्त्वपर्याप्त्यनधिकरणत्वम्, यथा पटतादात्म्ये सति पटत्वपर्याप्त्यनधिकरणत्वात्तन्तुषु पटैकदेशत्वव्यवहारः । पटसमवायिकारणत्वमात्रेणैव तदुपपादने तु तन्तुसहस्रे सहस्रसंख्यावच्छेदेनापि सहस्रतन्तुकपटैकदेशत्वव्यवहारप्रसङ्ग इति विभावनायम् ।

अत्र च सामान्ये विशेषे वा प्रत्येकं वस्त्वेकदेशत्वमेवोद्भूतम् । नयतात्पर्यभेदेन तु वस्तुत्वाऽवस्तुत्वोभयत्वाऽन-

वचनीयत्वादिप्रकारैः सप्तापि भङ्गाः प्रवर्त्तेरन् । अनन्तधर्मात्मकवस्तुनयप्रवृत्त्यपरिज्ञानवतां त्वेकत्र द्वित्वाभ्युपगमेऽपि व्याकुलीभाव एव, समवायविषयत्वेनैव 'द्वावि' त्यादिप्रतीत्युपपादने 'एको द्वावि' त्यादिप्रतीतिप्रसङ्गात् । न च पर्याप्तिसम्बन्धाभ्युपगमेपि निस्तारस्तस्यैकत्राऽसत्त्वे द्वयोरप्यभावप्रसङ्गात् । प्रत्येकावृत्तेः समुदायाऽवृत्तित्वनियमात् ।

अथ 'एकत्र द्वावि' ति न शाब्दधीरेकत्वाद्यवच्छिन्ने द्वित्वाद्यन्वयस्य निराकांक्षत्वात् । नापि तथा प्रत्यक्षं, तत्र यावदाश्रयसन्निकर्षस्य हेतुत्वात् । नचोभयाश्रयसन्निकर्षकालीनस्याऽय'मेको द्वौ' 'अयं च एको द्वाविति'प्रत्यक्षस्य प्रामाण्यं स्यादिति वाच्यम्, तत्प्रामाण्यस्य यावदाश्रयविशेष्यताकत्वघटितत्वात् । एकघटवति च द्वित्वावच्छिन्नाधिकरणताविरहादेव नोभयघटवत्ताधीरिति द्वित्वस्य पर्याप्त्यनभ्युपगमेपि नानुपपत्तिरिति चेत् ? न, तथापि द्वित्वव्याप्यधर्मेणैकत्र द्वित्वानुमित्याऽऽपत्तेः, 'एको न द्वौ' 'द्वौ नैक' इति प्रयोगाऽयोग्यताऽऽपत्तेश्च ।

अथ पर्याप्तिसम्बन्धेनैकत्वद्वित्वादेर्वृत्ताविदंत्वद्वित्वादिकमवच्छेदकं, नचात्माश्रयः, द्वित्वादिव्यक्तिभेदेनापि तत्संभवात्, तेन 'अयमेक' 'इमौ द्वावि'ति प्रमा, न तु 'द्वावेको' 'अयं द्वावि'त्यादिकम् । 'घटावि'त्यादिशाब्दधीस्त्वव-

च्छेदकाऽविषयैव तथा । पर्याप्त्यवच्छिन्नाऽवच्छेदकताकैक-त्वद्वित्वाद्यवच्छिन्नभेदवृत्तौ तु द्वित्वैकत्वाद्यवच्छेदकम् , तेन 'द्वौ नैक' 'एको न द्वावि'ति प्रमा, न'त्वयं नैको' 'द्वौ न द्वावि'त्यादि । न वा विरोधः,मूलाग्रवदिदंत्वद्वित्वाद्यवच्छेदक-भेदात् । द्वित्वाद्यत्यन्ताभावस्य तु पर्याप्त्यनवच्छिन्नसमवाय-मात्रस्य प्रतियोगितावच्छेदकत्वात् । द्वित्ववति द्वित्वात्यन्ता-भावानङ्गीकाराद्वा 'एकस्मिन् द्वित्वमि'ति न प्रतीतिः । 'एको न द्वावि'त्यादिधियामेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावविष-यत्वमेव; नत्वेकस्मिन् द्वित्वाद्यभावविषयत्वमिति तु न युक्तम् , एवं सति 'मूले वृक्षः कपिसंयोगी'ति प्रत्ययस्यापि मूले कपि-संयोगानवच्छेदकत्वावगाहित्वाऽऽपत्तेरिति **नैयायिकमत-परिष्कारे** को दोष **इति चेत्** ?

**शृणु** । तथापि व्यापकत्वविशिष्टसमवायरूपामति-रिक्तां वा पर्याप्तिं विनाऽपि शुद्धसमवायेन 'अयं द्वौ' 'द्वावेक' इत्यादिप्रतीत्याऽऽपत्तिः, द्वयोरेकैकस्मिन्नपि द्वित्वस्य द्वित्वा-वच्छिन्नाधिकरणतासत्त्वा'देको द्वावि'ति प्रतीत्यापत्तिश्च । स्वाधिकरणतावच्छेदकद्वित्वादिविशिष्ट एव द्वित्वाद्यन्वयस्य साकांक्षत्वे 'घटावि'त्यादिप्रयोगस्यानुपपत्तिः ।

किञ्च, इदंत्वस्यैकत्ववृत्त्यवच्छेदकत्वे'इमौ द्वावि'त्यत्रेदंत्वो-ल्लेखानुपपत्तिः । द्वित्ववृत्तौ द्वित्वावच्छिन्नमेवेदंत्वमवच्छेदकं न तु शुद्धमिति न दोष इति चेत् ? **न**, अवच्छेदकावच्छेदक-

स्यावच्छेदकन्यूनवृत्तित्वनियमात् । तत्रेदन्ताद्वयत्वमेव बुद्धिविशेषविषयत्वरूपमवच्छेदकमिति चेत् ? तथापि घटपटोभयवृत्त्येकत्वस्यैव घटपटोभयभेदवृत्त्यवच्छेदकत्वे 'घटौ न घटपटावि'त्यस्या(:) प्रसङ्गः । घटपटोभयत्वान्यसंख्याव्यक्तीनां विशिष्य तदवच्छेदकत्वोपगमे च 'इमे घटा इमे च पटा न घटपटावि'ति व्यक्त्यपेक्षबहुत्वावच्छेदेन जात्यपेक्षद्वित्वावच्छिन्नभेदप्रतीतिप्रसङ्गः ।

किञ्च, 'द्वौ नैक' इत्यत्रानुभवबलाद्व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकभेदसिद्धौ तत एवान्यत्राऽपि तेन व्यधिकरणधर्मावच्छिन्नाधिकरणताकाभावेन च स्वपररूपविधिनिषेधाऽविरोधसिद्धौ **स्याद्वाद**नीत्यैव सर्वसामञ्जस्ये किं क्लिष्टकल्पनाकष्टशतेन ! अत एव सामान्यविशेषागुण्ठित**स्याद्वा**दाऽविरोधेनैकत्रापि धर्मभेदोपरागेणैकत्वद्वित्वयोरविरोधमभिप्रेत्य 'एगे भवं दुवे भवमि'ति **सोमिल**प्रश्ने 'दव्वट्ठयाए एगे अहं नाणदंसणट्ठयाए दुवे अहमि'ति(भग.सू. ६४८)प्रत्युवाच **परमेश्वरः** । तत्र संग्रहनयाभिप्रायेण प्रथममुत्तरं, द्वितीयं च व्यवहारनयाभिप्रायेणेति । ततः स्थितमेतत् सर्वनयोपग्रहेण 'सामान्य-विशेषात्मकं वस्त्वि'ति ।

**ननु** 'सामान्य-विशेषात्मकं वस्त्वि'ति न वस्तुनो लक्षणम् । सकलतद्वृत्तित्वे सति तदितराऽवृत्तिधर्मस्य तल्लक्षणत्वात् । इतरव्यावृत्तिनिश्चयार्थं हि लक्षणं प्रयुज्यते न च वस्त्व-

तरत् प्रसिद्धमस्ति यदनेन लक्षणेन व्यावर्त्त्येतेति चेत् ? वस्त्वितरत्केवलसामान्यादिकं शशशृङ्गादिकं वा विकल्पप्रसिद्धं व्यावर्त्तयदिदं वस्तुलक्षणं घटत इति **सम्प्रदायः**। **वस्तुतो** नेतरव्यावृत्तिमात्रं लक्षणप्रयोजनं किन्तु व्यवहारविशेषोऽपि, ततोऽदोषशब्दार्थोभयत्वावच्छेदेन काव्यत्वव्यवहारायाऽदोषशब्दार्थोभयस्य काव्यलक्षणत्ववत्सामान्यविशेषोभयत्वावच्छेदेन वस्तुत्वव्यवहाराय सामान्य-विशेषोभयस्य वस्तुलक्षणत्वमविरुद्धम् ।

**न चात्र** तदितरावृत्तित्वाऽप्रसिद्धिः, त्वन्मतेऽपीतरत्वसामान्ये तत्प्रतियोगिकत्वस्वाधिकरणानुयोगिकत्वोभयाऽभावस्य तत्प्रतियोगिकत्वसामान्ये स्वसमानाधिकरणभेदवृत्तित्वाऽभावस्य वा निवेशात्, तद्वृत्त्यभावाऽप्रतियोगित्वे सति स्वसम्बन्धिवृत्तिभेदाऽप्रतियोगितत्कत्वस्य तल्लक्षणत्वपर्यवसानात्। अत एव 'केवलव्यतिरेकिहेतुविशेष एव लक्षणमि'त्यनादृत्य **शिवादित्योऽपि** 'प्रमितिविषयाः पदार्था' इति पदार्थसामान्यलक्षणं कृतवान् ।

**यत्तु** 'परस्परव्यतिकरे सति येनान्यत्वं लक्ष्यते तल्लक्षणमि'ति वार्त्तिकवचनमनुरुध्याऽसाधारणधर्मवचनं न लक्षणं दण्डादेरतद्धर्मस्यापि देवदत्तलक्षणत्वाद्, अव्याप्तलक्षणाभासातिव्याप्तेश्चेति **धर्मभूषणेन** दूषितं-**तत्र** तु वयं न सम्यक्कौशलमवगच्छामः, 'सजातीयविजातीयव्यावृत्तिफलकत्वेनाऽसाधारण-

धर्मो लक्षणमि'त्यर्थस्याऽऽकरे व्यवस्थितत्वात् । निरुक्ताऽसाधारणधर्मस्याऽव्याप्त्याऽवृत्तित्वात् , दण्डादेस्तु विशेषणत्वमात्रेणैव लक्षणत्वाभिधानात् । इत्थमेव भाष्योक्तपूर्वपदव्यमिचार्यादिलक्षणव्यवस्थोपपत्तेः, । 'परस्परव्यतिकरे सती'ति विशेषणमहिम्ना रूपान्तरेण स्वेतरभेदाभावसमावेशाय सिद्धस्य स्वेतरभेदवृत्त्यवच्छेदकधर्मस्य लक्षणत्वलाभेऽपि दण्डादेरतिप्रसक्तस्याऽतथात्वात् । किञ्चैवं केवलान्वयिलक्षणमपि न सुष्ठु घटत इति प्रसिद्धनीत्यैव सर्वमवदातम् ॥१॥

[ वस्तुलक्षणवादः समाप्तः ]

## [२] सामान्यवादः ।

द्रव्यगुणकर्मवृत्तिपदार्थान्तरमेव सामान्यमिति **नैयायिकाः** । अपोहरूपमेव तदिति **सौगताः** । वस्तुन एव समानः परिणामस्तदिति **परमपुरुषवचनानुसारिणः** ।

तत्र नैयायिकास्तावदित्थं प्रमाणयन्ति—सर्वत्रानुगताकारप्रतीतीनामेकविषयत्वौचित्यात् 'सत्सदि'ति 'द्रव्यं द्रव्यमि'ति 'घटोयं घटोयमि'त्यादिप्रतीतिभिः सत्त्व-द्रव्यत्व-घटत्वादिसामान्यसिद्धिः । तच्च सामान्यं द्रव्यादित्रयवृत्त्येव । सामान्यस्य सामान्यवृत्तित्वेऽनवस्थाप्रसङ्गात् । क्लृप्तजातिषु जातित्वस्वीकारे स्वस्वसहितास्वपि तासु जातित्वांतरकल्पने तत्साम्राज्यात् । सामान्यस्य सामान्यसमवायित्वे द्रव्याश्रि-

तत्वे सति समवायित्वेन गुणाद्यन्यतरत्वप्रसङ्गादवस्थाभावोऽनवस्थेत्यन्ये ।

विशेषे तत्स्वीकारे च रूपहानिप्रसङ्गो, न हि जात्या समानतापन्नानां विशेषाणां व्यावर्त्तकत्वं सम्भवति । सम्भवे वा नित्यद्रव्यगतैरेकत्वादिभिरेव तत्सम्भवे विशेषस्यैव वैयर्थ्यप्रसङ्गः । समवायाऽभावयोश्च समवायरूपसम्बन्धाऽभावान्न जातिमत्त्वमिति । सामान्यादौ 'सामान्यं सामान्यमि'त्याद्यनुगतधीस्तूपाधिनैव । असावपि परंपरासम्बद्धजातिस्वरूप एव, तत्र 'सत्सदि'तिधीस्तु सत्तैकार्थसम्बन्धात् । अभावे तु विरोधग्रहादेव न सत्ताधीरभावावृत्तिसत्तैकार्थसम्बन्धेनैव सत्ताग्रहे वा 'सदि'त्यभिलापान्न तत्र सत्ताभिलाप इति ।

**तदेतदखिलमिन्द्रजालकल्पम्** । पदार्थान्तरभूतस्य सामान्यस्य तत्सम्बन्धस्य च समवायरूपस्य सर्वगतत्वेन पटादावपि घटत्वादिवत्ताधीप्रसङ्गात् ।

**अथ** पटादौ घटत्वादिसमवायसत्त्वेऽपि समवायेन न घटत्वादिवत्ता, तदाधारताया घटादिस्वरूपत्वादतो नोक्तदोषः **न च** तदीयसम्बन्धवत्त्वं तद्वत्त्व**नियतम्**, गगनीयसंयोगे व्यभिचारात् । वृत्तिनियामकत्वविशेषणान्नैवमिति **चेत्** ? न, करवृत्तितानियामककपालसंयोगवत्कपालस्य स्वाऽभाववत्त्वेन व्यभिचारात् । **तत्र** तद्वृत्तितानियामकः सम्बन्धस्तत्र तद्वत्तानियत इति **चेत्** ? अनुमतमेतत् , अत एव घटत्वादिसम-

वायस्य पटादिवृत्तिताऽनियामकत्वेन तत्र तद्वृत्ताऽभावाभ्युपगमात् । सन्नपि तत्र तत्समवायः कथं न तद्वृत्तिनियामक इति चेत् ? तदिदमनुभवं प्रति प्रष्टव्यम्, यो घट एव घटत्वमिति नैयत्येन समुन्मीलतीति ।

एतेन सामान्यस्य सर्वगतत्वं यदुच्यते-तत् किं सर्वसर्वगतत्वं व्यक्तिसर्वगतत्वं वा ? आद्ये अंतराले पटादिव्यक्तावपि तदुपलब्धिप्रसङ्गः । अव्यक्तत्वात्तत्र तस्यानुपलम्भे च व्यक्तेरपि तत एव तदुपपत्तौ सर्वगतत्वं किं न स्यात् ? असत्त्वादन्तरानुपलम्भस्तूभयत्र तुल्यः । न च घटादिव्यक्तीनां घटत्वादिव्यंजकत्वादन्यत्रानुपलम्भः, तासामेव तदभिव्यक्तिहेतुत्वे तत्कल्पनानर्थक्यप्रसङ्गात् । कार्याऽसहभावेन सन्निकर्षस्य हेतुत्वे घटनाशकाले घटचक्षुःसंयोगसत्त्वात्तदुत्तरं घटप्रत्यक्षवारणाय लौकिकविषयतया घटप्रत्यक्षे तादात्म्येन घटस्य हेतुत्वेन त्वन्मतेऽपि तस्य घटत्वाभिव्यञ्जकत्वानुपपत्तेश्च । न च तादात्म्यसमवेतत्वान्यतरसम्बन्धेनैव तद्धेतुता, सत्येवाश्रये रूपादिनाशकाले रूपादिप्रत्यक्षवारणाय रूपादीनां पृथक्कारणत्वावश्यकत्वे तथा हेतुत्वे मानाभावात् । एवमपि घटे पटत्वप्रत्यक्षापत्तेरनुद्धाराच्च । इत्थं च घटतद्वृत्तिजात्यन्यतरप्रत्यक्षे तादात्म्यानवच्छिन्नसमवेतत्वान्यतरसंबन्धेन घटहेतुत्वेऽपि न निस्तारः । न च घटत्वादिसन्निकर्षे घटादिविषयान्तर्भाव एव तद्व्यञ्जकत्वं, द्रव्यसमवेतचाक्षुषत्वावच्छिन्ने चक्षुःसंयु-

क्तसमवेतत्वेन सामान्यत एव प्रत्यासत्तित्वाद्, घटाद्यन्तर्भावेन विशिष्य नानासंनिकर्षहेतुत्वकल्पने महागौरवात् । **द्वितीय** पक्षेपि चोत्पद्यमानव्यक्तौ सामान्यस्य व्यक्त्या सहैवोत्पादे व्यक्त्यन्तराद्वा समागते स्वीक्रियमाणे तस्य नित्यत्व-क्रियावत्त्व-व्यक्त्यन्तरनिःसामान्यत्वाद्यापत्तिरिति **प्रत्याख्यानम्**, घटादिस्वरूपापाया एव घटत्वाद्याधारतायाः स्वीकारेण तस्य व्यक्तिसर्वगतत्वव्यवस्थानादिति **चेत्** ?

**न**, घटादिस्वरूपाया घटत्वाद्याधारताया भूतलघटादिवृत्तित्वाऽवृत्तित्वाभ्यां तेषु तत्प्रतीत्यप्रतीतिप्रसङ्गात् । **घटादिस्व**रूपमप्याधारतात्वेन घटादिवृत्त्येवेति न दोष इति **चेत्** ?, **न** आधारतात्वाऽनिरुक्तेः । एकत्र स्ववृत्तित्वस्वावृत्तित्वयोः शबलत्वस्त्वभ्युपगमं विनाऽसम्भवात् । अत एव घटत्वसमवाये घटपटाद्याश्रयभेदेन वृत्तिनियामकत्वाऽनियामकत्वभेदोऽपि दुरुपपादः ।

**अथा**ऽऽधारता नाधाररूपा नाऽप्यतिरिक्ता, किन्तु कुण्डादौ बदरादेर्बदरादिप्रतियोगिकत्वविशिष्टसंयोगरूपैव, घटादौ च घटत्वादेः समवायरूपैव, **नवीनैः** समवायनानाऽभ्युपगमे दोषाऽभावदिति **चेत्** ? **न** तथापि पीतघटे नीलत्वविशिष्टघटत्ववत्ताधीप्रसङ्गात् । **विशिष्ट**समवायस्याप्यतिरिक्तत्वान्न दोष इति **चेत्** ? **न**, तथा सति विशिष्टस्यैवातिरिक्तत्वकल्पनौचित्यात् । अत एव 'नीलत्वविशिष्टघटत्वं न पीतघटवृत्ति' इति

प्रत्ययः तत्तद्वृत्तीत्यप्रत्ययश्च सर्वसिद्धः। इत्थं च 'प्रतिव्यक्ति विशिष्टरूपेण भिन्नं, शुद्धरूपेण चाऽभिन्नं सामान्यमनुभूयत इति कथं सर्वथैकं सामान्यं ? विशिष्टाऽविशिष्टयोर्भेद' एवेति-सार्वभौममतं तु भेदे निराकरिष्यामः ॥

अतिरिक्तं सामान्यं व्यक्तिष्वेकदेशेन समवेयात्कार्त्स्न्येन वा ? आद्ये सावयवत्वप्रसङ्गः अन्त्ये च प्रतिव्यक्ति नानात्वापत्तिः। न च व्यक्तिवृत्तित्वं सामान्यस्योपगम्यत एव, देशकार्त्स्न्ययोस्तनुपगमादापादकाऽभाव इति वाच्यम्, उक्ताऽन्यतर-प्रकारव्यतिरेकेणान्यत्र वृत्त्यदर्शनात्। अत्रान्यतरप्रकारा-श्रयणेऽन्यतरदोषाऽऽपत्तेः उभयाऽसिद्धौ च वृत्तित्वविशेषाभाव-समुदायेन वृत्तित्वसामान्याभावापत्तेर्वज्रलेपत्वादिति **सम्मति-टीकाकृतामाशयः**।

ननु देशकार्त्स्न्यवृत्तित्वे किञ्चित्सर्वावयवावच्छिन्न-संयुक्तत्वलक्षणे द्रव्यवृत्तित्वस्यैव विशेषौ, न तु वृत्तित्व-सामान्यस्येति नेयमापत्तिर्घटत इति चेत् ? न, अवच्छिन्नाऽन-वच्छिन्नवृत्तित्वविशेषाभावाभ्यां तदवृत्तित्वाऽऽपत्तेराद्येऽव्या-प्यवृत्तित्वस्य द्वितीये च प्रतिव्यक्ति भेदस्याऽऽपत्तेरित्या-शयात्। अत एवैतद्घटवृत्तिघटत्वमपरघटावृत्ति एतद्-घटपर्याप्तत्वादेतद्घटैकत्ववदित्यप्यापादितं न्यायालोकेऽ-स्माभिः। किञ्च, समानानां स्वभाव एव सामान्यं, तत्व-

रिक्तम्, अत एव स्वस्वातिरिक्तपदार्थेषु प्रमेयत्वस्वभावेन 'प्रमेयमि'ति बुद्धिवद्भावत्वस्वभावेनैव 'सदि'ति धीः। सत्सत्तयोर्विलक्षणसम्बन्धावगाहिनी सत्ताधीः पुनरसिद्धा। यथा च भावत्वस्य नियतानुगतव्यावृत्तव्यपदेशनियामकत्वं तथा सिद्धान्तपक्षे निरूपयिष्यामः।

द्रव्यजन्यतावच्छेदकतया सिद्धं सत्त्वं गगनादौ द्रव्यत्वादिना सांकर्यभियैव स्वीक्रियते, न तु सामान्यादौ मानाभावात्, अतस्तत्रैकार्थसमवायेनैव सत्ताधीरिति **पदार्थमाला**लिखनं तु न **ज्यायः**, अवच्छिन्नसमवेतत्वेनैव द्रव्यजन्यतावच्छेदकत्वसम्भवात्। उपाधिसांकर्यस्येव जातिसांकर्यस्याप्यदोषत्वात्। परस्पराभावसमानाधिकरणजातित्वेन परस्पराभावव्याप्यत्वे मानाभावाच्चेति दिक्।

**सौगतास्तु** संगिरन्ते पदार्थान्तरभूतं सामान्यं ताव**दार्हतैरेव** निराकृतम्। अत्यन्तविलक्षणस्वलक्षणस्वरूपं च विरोधादेव तन्न सम्भवति, व्यक्त्यंतरात्मजात्यात्मताया व्यक्त्यंतरानुगमे स्वलक्षणत्वव्याघातात्। ततो गौर्गौरित्याद्यनुगताकारप्रतितेरन्यव्यावृत्तिमात्रेणैव व्यक्तिषु प्रसिद्धेरप्रामाणिक एव सामान्यस्वीकार इति। **तदप्यसत्**। अन्यव्यावृत्तेर्बहिर्गवादिव्यक्तिवृत्तित्वे सामान्यरूपताया दुर्निवारत्वात्। सकलव्यक्तिगतस्यानुगतस्य रूपस्याऽस्मन्मते भावाभावरूपत्वात्।

आन्तरत्वे तु तस्या बहिरर्थाभिमुख्येनोल्लेखो न स्यात्। नान्तर्बहिर्वा सेति तु स्वाभिप्रायमात्रं, तादृश्यास्तस्या अलीकत्वेन तथाभूतप्रत्ययजनकत्वाऽयोगात्। अनादिवासनानिर्मित एवायमिति चेत्? तर्हि तत्र कथं बाह्यार्थविशेषापेक्षा?

अथ दृष्ट एवार्थे वासना सामान्यविकल्पजननी दर्शन एव च बाह्यार्थविशेषापेक्षा, न तु विकल्पे, तच्च स्वविषयसामान्यव्यवसायिविकल्पोत्पादनद्वारा वस्तूपदर्शयदर्थप्रापकं सत् प्रमाणं स्यादित्यस्माकं प्रणालीति चेत्?, न, अपोहरूपस्य सामान्यस्याऽवस्तुत्वे तद्विषय(क)व्यवसायजनकस्य वस्तूपदर्शकत्वविरोधात् संशयविपर्ययकारणदर्शनवत्। अथ दृश्यविकल्प्ययोरेकीकरणाद्वस्तूपदर्शक एव विकल्पोऽत एव विकल्पितस्य सामान्यस्य बहिरर्थाभिमुख्येनोल्लेख इति चेत्? किमिदमेकीकरणम्—एकरूपतापादनमेकत्वाध्यवसायो वा? नाद्योऽन्यतरपर्यवसानप्रसङ्गात्। नापि द्वितीयः, उपचारितेन दृश्यविकल्प्यैक्येन वस्तूपदर्शकत्वाऽयोगात्।

किञ्च, तदेकत्वाध्यवसायो दर्शनेन विकल्पेन ज्ञानान्तरेण वा भवेत्? नाद्यः पक्षो, दर्शनस्य विकल्प्याऽविषयत्वात्। न द्वितीयो, विकल्पस्य दृश्याऽविषयत्वात्। न तृतीयो, ज्ञानान्तरस्य निर्विकल्पसविकल्पकविकल्पयुगलानतिक्रमेण दृश्यविकल्प्यविषयद्वयविरोधात्। न च तदुभयाऽगोचरं ज्ञानं तदुभयैक्यमाकलयितुमलमिति।

**अथ** दृश्याऽगृहीताऽसंसर्गकविकल्प्यविषयत्वमेव विकल्पस्य दृश्यविकल्प्यैकीकरणं, तेनैव सामान्यस्य बहिरर्थनिष्ठतोल्लेखः । न चैवमवस्तुभूतसामान्यविषयस्य व्यवसायस्य वस्त्वनुपदर्शकत्वात्तज्जनकत्वेन दर्शनस्य प्रामाण्यं दुर्घटमिति **वाच्यम्**, परमार्थतो वस्त्वनुपदर्शकमपि व्यवसायं द्वारीकृत्यार्थप्रापकत्वेन दर्शने व्यावहारिकप्रामाण्यस्यैवोपगमात् । 'यत्रैव जनयेदेनाम् , तत्रैवास्य प्रमाणते'ति ग्रन्थस्य व्यावहारिकप्रामाण्यप्रयोजकरूपप्रदर्शनपरतयैव व्यवस्थितत्वात् । क्षणक्षयस्वर्गप्रापणशक्त्यादावपि दर्शनस्यानुरूपविकल्पानुत्पादनेन व्यवहारत एव न प्रामाण्यं, परमार्थतस्तु क्षणक्षयादेरपि वस्तुस्वरूपत्वात्तत्रापि सन्मात्रविषयत्वरूपं प्रामाण्यं स्वग्राह्यमेवेति न स्वोत्पत्तौ स्वज्ञप्तौ वा विकल्पमपेक्षते । नचाऽसद्विषयत्वाऽभावव्याप्यसद्विषयत्वादिना सन्मात्रविषयत्वादि ग्राह्यमिति कथं तत्र स्वग्राह्यतेति **वाच्यम्**, असद्विषयत्वाऽभावादेरपि स्वरूपानतिरेकात्स्वरूपतः स्वग्राह्यतायास्तत्राप्यऽप्रत्यूहत्वात् । तत्तद्रूपेण तु विकल्पविषयतैव । न चैवं तेषामसत्त्वाऽऽपत्तिः, स्वरूपातिरिक्तत्वेन तदसत्त्वस्येष्टत्वात् । न हि निर्विकल्पकं सन्मात्रावलम्बनमित्यादिबुद्धिर्ना बौद्धाः प्रमाणत्वमुपयन्ति, तथा सत्ययं घट इत्यादिबुद्धेरपि प्रामाण्याऽऽपत्तेः । न चैवं ज्ञानप्रामाण्यस्य स्वतोग्रहे प्रामाण्यसंशयाऽनुपपत्तिः, निर्विकल्पके तदसिद्धेः, तदुत्तरोत्पन्नज्ञाने च समु-

ल्लिखिताऽनुगताकारे प्रमाणाभावेन स्वतःप्रामाण्याऽग्रहाऽयोगादेव तत्संशयोपपत्तेः । न चानुगताकारविषयत्वेनैव प्रामाण्याभावनिश्चयात्तत्संशयो दुर्घटस्तस्य तद्व्याप्यत्वाऽनिश्चयदशायां सन्देहसाम्राज्यात् । सन्दिह्यतां वा दर्शनेऽपि विशेषाऽनाकलनदशायामर्थप्रापकत्वरूपं व्यावहारिकं प्रामाण्यमिति चेत् ?

न, सामान्यस्याऽवस्तुत्वे गवादिदर्शनेऽपि गवादिविषयत्वस्य नियन्तुमशक्यत्वात् । तत्तद्व्यक्तिविषयत्वमेव गवादिविषयत्वमिति चेत् ? तत्रापि गवादिरूपत्वं नत्वश्वादिरूपत्वमिति नियतसामान्यसम्बन्धं विना कथं नियन्तुं शक्यम् ? कथं वाऽवस्तुभूतसामान्यविषयत्वेऽनुमानस्याऽपि प्रामाणत्वं सूपपादम् ? कथं च सामान्यास्याऽवस्तुत्वेऽयं गौरित्यादिविकल्पानां शश-शृङ्गादिविकल्पतुल्यत्वेनाऽप्रमाणत्वान्निष्क्रमतः प्रवर्त्तकत्वम् ? अध्यक्षविषयविषयकत्वरूपसंवादाभिमानेन तत्र प्रामाण्याभिमानादेव तथात्वमिति चेत् ? न, क्रमिकाध्यक्षव्यक्त्योरप्येकपरमार्थसद्विषयकत्वाऽभावेन तत्र प्रामाण्यसहचाराऽज्ञानात् ।

इत्थं च चानुमानप्रमाणमप्यनभ्युपगच्छतः सर्वत्र सम्भावनयैव व्यवहारमुपपादयतः सामान्यापलापिनश्चार्वाकस्यापि मतमपास्तम्, सामान्याभावे विकल्पे सम्भावनायां वा संवादप्रामाण्ययोरक्रमानुपपत्तेः । अथ विकल्पेऽध्यक्षमूलक-

त्वमेव संवादः, सम्भावनायां त्वध्यक्षमूलकविकल्पविषयविषयकत्वमेव, तस्य च यद्यपि न वास्तवप्रामाण्येन सहचारस्तथापि ततः पराभिप्रेतप्रामाण्याभिमानाद्व्यवहारोपपत्तिरिति वाच्यम्, (? चेन्न) गोदर्शनोत्तरभावितुरगविकल्पस्याप्यध्यक्षमूलकत्वेन प्रामाण्यप्रसङ्गात्। अथ तत्र गोदर्शने गोरूपस्य तुरगत्वाऽसंसर्गस्य ग्रहाद् दृश्याऽगृहीताऽसंसर्गकविकल्प्यविषयत्वरूपं प्रामाण्यं नास्तीति चेत्? न, गोत्वस्यालीकत्वे तदसंसर्गस्य गोदर्शनेनापि ग्रहात्तत्पृष्ठभाविगोविकल्पस्याप्यप्रामाण्यापत्तेः, दृश्यवृत्तिरसंसर्गत्वप्रकारकग्रहाभावस्त्वसंसर्गग्रहकालेप्यस्ति दृश्यस्य विकल्पाऽविषयत्वात्।

यत्तु–विकल्प्याऽवच्छिन्नत्वेन दृश्यं विकल्पेऽपि भासते, तत्र च कल्पितसामान्यसंसर्गवति कल्पितसामान्यप्रकारकत्वमेवोपचरितं विकल्पस्य प्रामाण्यमबाधम्, मुख्यं सन्मात्रविषयत्वलक्षणं तु निर्विकल्पक एवेति; तत्त मिथ्यैव, यथार्थप्रवृत्त्यादिनिर्वाहार्थं विकल्पे परमार्थतो यथार्थत्वव्यवस्थितेः। स्वेच्छामात्रकृतायाः परिभाषाया अन्याय्यत्वात्। तस्मात्सामान्योल्लेखी विकल्प एव प्रमाणत्वेनानुभूयमानः सामान्यस्य वस्तुत्वसाधकः, इत्यधिकं लतायाम्॥

**तदेवं नैयायिकसौगतमत**सामान्यानुपपत्त्याः वस्तुनः समानपरिणाम एव सामान्यमित्यार्हतमतमेवादरणीयं निपुण-

बुद्धिभिः। विशेषात्मना व्यावृत्तस्यैव तस्य स्वरूपेणानुवृत्तस्योपलम्भात्। सत्तात्मनाह्यनुवृत्ता हि सत्ता घटाद्यवच्छिन्ना, तत्तद्देशकालादिव्यावृत्तैवोपलभ्यते—'इह देशे घटः सन्नान्यत्र, 'इदानीं घटः सन्न पूर्वेद्यु'रिति देशकालादिव्यावृत्तसत्ताप्रत्ययादेव सत्तासामान्यं नास्तीत्यस्तु दोधितिकृन्मतमेव सम्यगिति चेत्? न, एवं सति घटत्वादिसामान्यस्याप्यनुगतस्यापलापापत्तेः, 'अस्यां मृदि घटत्वं नान्यस्याम्' 'इदानीं मृदि घटत्वं नान्यदे'ति तस्यापि देशकालादिव्यावृत्तस्यैवानुभवात्। कार्यतावच्छेदकत्वादिना घटत्वादेरेकस्य सिद्धिं पुरस्कृत्य तन्नानात्वप्रत्ययापलापे च घटाभावप्रकारकज्ञानप्रतिबद्ध्यतावच्छेदकत्वादिना घटादेरप्येकस्य सिद्धिं पुरस्कृत्य तन्नानात्वप्रत्ययस्याप्यलापप्रसङ्गात्। घटत्वविशिष्टघटादेर्दण्डादिकार्यता घटादिविशिष्टमृदादेर्वेति विनिगन्तुमशक्यत्वात्।

व्यावृत्तत्वे कथमनुवृत्तत्वं सामान्यस्येति तु द्रव्यत्वादिकं सामान्यविशेषमभ्युपगच्छता न वक्तुं शक्यम्। यथा हि द्रव्यत्वादिकमद्रव्यादिव्यावृत्तिरूपं सदपि परेषां मते भावतां न जहाति तथा कथंचिद्व्यक्तिरूपं सदपि सामान्यमस्मन्मते सामान्यरूपतां न हास्यतीति। अथात्यन्ताभावाऽत्यन्ताभावः प्रतियोग्येवान्योन्याऽभावात्यन्ताऽभावस्तु प्रतियोगितावच्छेदकमिति प्राचीनप्रवादो न युक्तोऽभावत्वप्रतीतेरतिरिक्ताऽभावविषयत्वात्, अभावाभावादेरतिरिक्तत्वस्वीकारात्तृतीयाऽभावादेः

प्रथमाभाववादिरूपत्वेन नाऽनवस्थेति नवीनसिद्धान्तात् । सामान्यविशेषत्वं च न सामान्यत्वे सति विशेषत्वं किन्तु सत्ताव्याप्यत्वे सति तद्व्याप्यव्यापकत्वमिति सामान्यत्वविशेषत्वयोर्विरोध एवेति चेत् ? न, तयोः प्रत्यक्षेणैवाऽविरोधसिद्धेः, घटत्वाभावाभावादेर्घटत्वाद्यतिरिक्तत्वे मानाभावादभिलापमात्रभेदेनार्थभेदेऽतिप्रसङ्गात् । घटत्वाभावादिज्ञाने घटत्वज्ञानत्वादिना पृथक्प्रतिबन्धकत्वकल्पने गौरवाच्चेति । न च घटत्वस्याऽघटव्यावृत्तित्वे 'घटोयमि'तिज्ञानकाले न'अघटोयमि' ति ज्ञानाऽऽपत्तिरघटव्यावृत्तित्वस्य प्रतियोगिज्ञानव्यंग्यत्वात् ।

नचाऽतद्व्यावृत्त्यात्मकविशेषरूपत्वं सामान्येस्त्वनुगतत्वाऽव्याघातात्तत्तद्व्यक्तिविशेषात्मकत्वं तु न सम्भवत्यनुगतत्वव्याघातादिति वाच्यम् . सामान्यविशेषत्वक्लृप्तद्वित्वेनेव तत्तद्व्यक्त्यात्मकत्वकृतानेकत्वेनाप्येकत्वस्याऽविरोधाद्वस्तुन एकानेकस्वभावत्वस्य प्रामाणिकत्वात् । केवलं घटत्वाऽतद्व्यावृत्त्योरनवच्छिन्न एवाभेदः । घटत्वे तत्तद्व्यक्त्यभेदस्तु तत्तद्व्यक्तित्वाद्यवच्छेदेनैव । तद्भेदस्तु स्वरूपत एवेति कथंचिदनुगमव्यावृत्तिमत्सामान्यम् , स्वरूपतः सामान्यस्यैकत्वाच्च सामान्यमेकमिति मुख्यो व्यवहारः । सामान्यमनेकमिति व्यवहारस्त्वनेकत्वाऽवच्छेदकधर्मवाचकपदसमभिव्याहारमपेक्षते । युगपद्विरुद्धधर्मप्रतीत्योश्चावच्छेदकभेदविषयत्वं नियतं यथा पूर्वमयं घटः श्यामो न त्विदानीम् । 'मूले वृक्षः कपि-

संयोगी न तु शाखायामि'ति । ततः स्यात्सामान्यमेकं स्यादनेकमित्यनेकान्त एव कान्तः ।

[सामान्यवादः समाप्तः]

## ३–विशेषवादः

विशेषो नित्यो नित्यद्रव्यवृत्तिः पदार्थान्तरमिति नैयायिकाःतदसत्, तत्र प्रमाणाभावात् । नचात्यन्तसजातीयानां नित्यद्रव्याणां परस्परभेदग्रहो न विशेषं विनेति तत्सिद्धिः, योगिनां तद्भेदग्रहे व्यावर्त्तकधर्मदर्शनस्याऽहेतुत्वात् ।

न च 'समवायित्वे सति समवायियद्‌व्यक्तेर्यद्व्यावृत्तं तत्तदसमवेतसमवेतशून्यधर्मसमवायी' ति व्याप्तेर्घटपटादाववधारणात् सजातीयनित्यद्रव्यद्वये परस्पराऽसमवेतसमवेतशून्यधर्मसिद्धावर्थाद्विशेषसिद्धिः । अत्र द्रव्यत्वादिभिः सिद्धसाधनवारणाय 'तदऽसमवेति' ति, एकत्वादिभिस्तद्वारणाय 'समवेतशून्ये' ति । अभावव्यक्तिभिस्तद्वारणाय समवायी' ति । अभावे व्यभिचारवारणाय हेतौ 'समवायित्वे सती' ति । घटादावभावव्यावृत्तिसत्त्वेनाभावसमवेतत्वाऽप्रसिद्ध्या व्याप्यत्वाऽसिद्धिः स्यादिति 'समवायी' ति । नोपादेयमेव वा तत्, साध्ये तदसमवेतत्वं परित्यज्य स्वाऽसमवायितत्कत्वस्य निवेशनीयत्वादिति चेत् ?

न, सजातीयघटद्वये व्यभिचारात्, स्वाश्रयसमवेतसमवेतत्वादिघटितपरंपरासम्बन्धेन साध्यत्वे विशेषमादाय तत्रापि

साध्यसत्त्वाद्व्यभिचारवारणे च पक्षे बाधप्रसङ्गात् , स्वसमवायित्वस्वाश्रयसमवेतत्वादिघटितपरंपरासम्बन्धान्यतरसम्बन्धेन साध्यत्वेऽपि नित्यद्रव्यवृत्तिरूपादौ व्यभिचारात् । स्वाश्रयसमवेतत्वस्यापि सजातीयद्व्यणुकसाधारणस्यान्यतरमध्ये निवेशान्न दोष इति चेत् ? न, इदृशसम्बन्धेन साध्यस्य व्याप्तिग्रहाभावात् । 'समवायित्वे सती' त्यपहाय 'नित्यद्रव्यत्वे सती' ति निवेशने न दोष इति चेत् ? न, दृष्टान्ताऽप्रसिद्धेः ।

किञ्च, विशेषे समवायेन तदवृत्तिधर्ममन्तरेणापि तदवृत्तिधर्ममात्रसत्त्वेन यथा तद्व्यावृत्तिस्तथा प्रकृतेऽपीत्यप्रयोजकत्वादुक्तव्याप्तिरेवाऽसिद्धा यो यद्व्यावृत्तः स तदवृत्तिधर्मवानित्येव व्याप्तेः । किञ्च, नित्यद्रव्यव्यावृत्तये विशेषपदार्थस्वीकारे तद्गतरूपादिव्यावृत्तिः कुतः ? स्वाश्रयसमवेतत्वसम्बन्धेन तत्रापि विशेष एव व्यावर्त्तक इति चेत् ? तर्हि रूपादिगत एवासौ किं न कल्प्यते ?, तस्यापि स्वाश्रयसमवायित्वसम्बधेन नित्यद्रव्यव्यावर्त्तकत्वसम्भवात् । रूपादीनां बहुत्वात्तत्र विशेषपदार्थकल्पने गौरवं, नित्यद्रव्यव्यक्तेश्चैकत्वात्तत्र तत्कल्पने लाघवमिति चेत् ? न,तथापि प्रत्येकं विनिगमकाभावात् । रूपादिनिष्ठत्वे तस्य सजातीयघटद्वयपर्यन्तः परंपरासम्बन्धो बहुघटितः स्यादिति चेत् ? किं ततो ? नानारूपवदवयवारब्धावयविनो नीरूपत्वमते तत्प्रत्यक्षत्वाय परमाणुगतरूपस्य तद्वृत्तितानियामकसम्बन्धविशेषवदिहापि तादृश-

सम्बन्धविशेषकल्पने तव रसनाया अव्याहतप्रसरत्वात् । योगिनो विशेषमीक्षन्त इति चेत्? तर्हि त एव प्रष्टव्याः किं ते विशेषमतिरिक्तमीक्षन्तेऽनतिरिक्तं वेति श्रद्धामात्रगम्य एवायं विशेषपदार्थः ।

अस्माकं तु विशेषपदार्थो वस्तुन एव व्यावृत्त्यंशः । घटादिं गतानां पटादिव्यावर्त्तकधर्माणां पटादिव्यावृत्तीनां च कथंचिदघटादिरूपत्वात् । पटादिव्यावृत्तीनां स्ववृत्तित्वांशेऽभेदस्य नियामकस्य कॢप्तत्वेन घटादिवृत्तित्वांशेऽपि तस्यैव नियामकत्वौचित्यात् । अभेदविशेषणतयोर्द्वयोस्तन्नियामकत्वे गौरवात् । न चैवं शकटादावपि पटव्यावृत्त्यात्मनो घटस्योपलम्भाऽऽपत्तिस्तत्त्वेन तदुपलम्भस्येष्टत्वाद्, घटत्वेन घटोपलम्भे तु घटत्वावच्छिन्नस्य नयनाभिमुख्यं नियामकमिति न दोषः । अस्तु वाऽनन्तपर्यायात्मकत्वाद्वस्तुनो घटत्वावच्छिन्नायास्तस्या घटात्मकत्वेऽपि तदभावावच्छिन्नायास्तस्या अतदात्मकत्वम्, अनेकान्ताऽविरोधात् । प्रतीयते खल्वेकस्यामङ्गुल्यामग्रावच्छिन्नाऽपराङ्गुलिसंयोगवत्तादात्म्येऽपि मूलावच्छिन्नतद्वद्भेदः । नचैवं देशस्कन्धरूपान्तराद्यवच्छिन्नभेदाभेदादिघटितबहुधर्मसमावेशात् प्रतीतिनियमानुपपत्तिः, व्यवहाराद्यभ्यासवशाद्यथाक्षयोपशमभेदं तन्नियमोपपत्तेः, इति दिक् ॥

[३-विशेषवादः समाप्तः]

## ४-वागादीनामिन्द्रियत्वनिराकरणवादः ।

स्पर्शनरसन-घ्राण-चक्षुःश्रोत्रवाक्-पाणि-पाद-पायूपस्थ-मनोलक्षणान्येकादशेन्द्रियाणीति **सांख्याः** । तन्न, वागादीनामिन्द्रियत्वे प्रमाणाभावात् । **न च तेषामपि वचनादान**-विहरणोत्सर्गानन्द-संकल्प-व्यापारकाणामात्मनः क्रियाजनने करणत्वेनोपकारकत्वात् स्पर्शनादिवदिन्द्रियत्वमव्याहतमिति वाच्यम्, आत्मनो विज्ञानोत्पत्तौ प्रकृष्टोपकारकस्यैवेन्द्रियत्वात् । यां काञ्चनक्रियामुपादाय करणत्वेनेन्द्रियत्वाभ्युपगमे च भ्रूदरादेरप्युत्क्षेपादिकरणत्वेनेन्द्रियत्वप्रसङ्गात् । किञ्च, इन्द्रियाणां स्वविषयनियतत्वान्नान्येन्द्रियकार्यमन्यदिन्द्रियं कर्तुमलम् । श्रोत्रादीनां चक्षुरूपलभ्यरूपावलोकनाद्यसमर्थत्वात् । यस्तु रसाद्युपलम्भे शीतस्पर्शादेरप्युपलम्भः, स सर्वव्यापित्वात्स्पर्शनेन्द्रियजनित एवेति न दोषः । पाण्यादीनां तु तच्छेदेऽपि तत्कार्यस्याऽऽदानादिलक्षणस्य दशनादिनापि निवर्त्यमानत्वान्नेन्द्रियत्वम् । मनसस्तु सर्वेन्द्रियोपकारकत्वादन्तःकरणत्वमिष्यत एवेति **सम्प्रदायः** ।

**नन्वेवं** ज्ञानं प्रति प्रकृष्टकारणत्वमिन्द्रियत्वमिति पर्यवसन्नम् । अत्र च कः प्रकर्षः ? व्यापारवत्त्वमिति चेत् ? न, आत्मनोप्यात्ममनोयोगरूपव्यापारसत्त्वात् । अविलम्बेन क्रियोत्पादकत्वमिति चेत् ? न, चक्षुरादेरपि व्यासङ्गदशायां ज्ञानानु-

त्पत्तेः ज्ञानत्वव्याप्यधर्मावच्छिन्नकारणत्वमिति चेत्? न, स्मृतित्वावच्छिन्नहेतावनुभवेऽतिव्याप्तेः। अनुभवत्वव्याप्यधर्मावच्छिन्नहेतुत्वमिति चेत्? न, अनुमितित्वाद्यवच्छिन्नहेतावनुमानादावतिव्याप्तेः। प्रत्यक्षत्वव्याप्यधर्मावच्छिन्नहेतुत्वमिति चेत्? न, अन्धकारेतरविषयकाञ्जनाद्यसंस्कृतनयननरचाक्षुषसाक्षात्कारत्वावच्छिन्नहेतावालोकेऽतिव्याप्तेरिति चेत्?

अत्र ब्रूमः। मतिज्ञानप्रत्यक्षत्वसाक्षाद्व्याप्यधर्मावच्छिन्नहेतुत्वमेवेन्द्रियलक्षणम्। अस्ति हि चक्षुरादीनां चक्षुराद्यवग्रहादिसाधारणमतिज्ञानप्रत्यक्षत्वसाक्षाद्व्याप्यचाक्षुषत्वाद्यवच्छिन्नहेतुत्वम्। मनसस्तु यद्यपि मनोऽवग्रहादिसाधारणमतिज्ञानप्रत्यक्षत्वसाक्षाद्व्याप्यमानसत्वावच्छिन्नं प्रति हेतुत्वमस्ति तथापि व्यक्तानुमानादिसाधारणदीर्घकालिकसंज्ञात्वावच्छिन्नं प्रत्यपि हेतुत्वात्तत्र नोइन्द्रियत्वप्रवादः। तथा च स्पर्शनादीनि पञ्चैवेन्द्रियाणीति **जैनी परिभाषा।**

**नैयायिकास्तु** मनःसहितानि तानि षडिन्द्रियाण्याहुः। इन्द्रियत्वं च तेषां स्मृत्यजनकज्ञानजनकमनःसंयोगाश्रयत्वम्। स्मृत्यजनकत्वमत्र स्मृतिस्वरूपाऽयोग्यत्वम्। मनःसंयोगश्च मनोवृत्तिः संयोगो, नातः स्मृत्यनुपधायकप्रत्यक्षाद्युपधायकमनोयोगवत्यात्मादावतिप्रसङ्गः, न च मनःप्रतियोगिकसंयोगविरहिणि मनस्यव्याप्तिः। **ननु** "त्वगिन्द्रियाऽव्याप्तिः, त्वङ्मनोयोगस्य जन्यज्ञानमात्रहेतुत्वेन स्मृतिस्व-

रूपयोग्यत्वात् , अन्यथा सुषुप्तिकाले ज्ञानोत्पत्त्यापत्तेः । अथ तत्काले चाक्षुषादिज्ञानानुत्पादश्चक्षुरादेर्विषयेण मनसा च संयोगाऽभावात् , अनुमित्याद्यनुत्पत्तिश्च व्याप्तिज्ञानाद्यभावात् । न च सुषुप्त्यनुकूलमनःक्रियया मनःसंयोगनाशकाले उत्पन्नेन परामर्शेन सुषुप्तिसमकालोत्पत्तिकमनोयोगसहकृतेन सुषुप्तिद्वितीयक्षणेऽनुमितिरुत्पद्यतामिति वाच्यम् , असमवायिनः कार्यसहभावेन हेतुत्वान्मनोयोगनाशकाले परामर्शोत्पादाऽसम्भवादन्यथा सुषुप्तिकाले प्राक्तनत्वङ्मनोयोगात्तत्रापि मसृणतूलिकादिसन्निकर्षेण त्वाचप्रसङ्गात् । तत्सामग्रीभूतव्याप्तिस्मृत्यादेः फलैककल्प्यत्वेन तत्काले परामर्शोत्पत्तौ मानाभावाद्वेति चेत् ? न, तत्काले आत्मादिमानसोत्पत्तेर्विना त्वङ्मनोयोगहेतुत्वं दुर्वारत्वादिति" । मैवं, आत्मनो विशेषगुणोपधानेनैव भानेन तदा विशेषगुणाभावेन तत्प्रत्यक्षाभावात्तत्तद्गुणानां विषयतया तद्भानहेतुत्वात् । सविषयकप्रकारकात्ममानसत्वस्यैव मनोयोगादिकार्यतावच्छेदकत्वाद्वा । यदि चैवमतिगौरवम् , तदा चर्ममनोयोग एव जन्यज्ञानमात्रहेतुरस्तु, त्वङ्मनोयोगस्य रासनादिकालेऽनुपगमात् ।

चर्मत्वं तैजसचर्मत्वादिसाधारणं न जातिरिति चेत् ? तथापि मानसत्वावच्छिन्न एव त्वङ्मनोयोगो हेतुर्न तु जन्यज्ञानत्वावच्छिन्ने । न चैवं त्वाचत्वावच्छिन्नं प्रति पृथक्कारणत्वे गौरवं, प्रामाणिकत्वेन तस्याऽदोषत्वात् । अन्यथा रास-

नाद्युत्पत्तिकाले ज्ञानमात्रहेतोस्त्वङ्मनोयोगस्य सत्त्वे कथं न त्वाचोत्पत्तिः, आयुष्मता रसनमनोयोगादेस्त्वाचप्रतिबन्धकत्वकल्पने महागौरवात्त्वाचत्वावच्छिन्ने विजातीयत्वङ्मनोयोगत्वेन पृथक्कारणत्वावश्यकत्वात् । न च त्वाचत्वावच्छिन्नं प्रति त्वाचेतरसामग्रीत्वेनैव प्रतिबन्धकत्वादनतिप्रसङ्गः, त्वाचेतरसामग्र्या विशिष्य विश्रामात् । न च रसनाद्यवच्छेदेन त्वचो विषयेण समं विलक्षणसंयोगस्यैवाऽनुपगमात्त्वङ्मनोयोगस्य त्वाचं प्रति विशिष्य हेतुत्वाऽकल्पनमिति वाच्यम्, रसनाद्यवच्छेदेनापि शीतलजलस्पर्शानुभवाद्दीर्घशष्कुल्यादौ रासनकालेऽपि त्वग्विषयसम्बन्धाऽबाधाच्च ।

अस्तु वा परात्मादेः पराप्रत्यक्षत्वाय विजातीयात्ममनोयोगत्वेनाऽऽत्ममानसे हेतुताया अवश्यवक्तव्यत्वात्तदेव वैजात्यं जन्यज्ञानसामान्याऽसमवायिकारणताऽवच्छेदकमिति तादृशसंयोगाऽभावादेव सुषुप्तौ ज्ञानानुत्पादः । तदा तादृशसंयोगे मानाभावाददृष्टादेव श्वास-प्रश्वासादिसन्तानोपपत्तौ जीवनयत्नाऽनुपगमात्तदनुरोधेनाऽपि तदऽकल्पनात् । न च यत्र त्वक्क्रियया त्वङ्मनःसंयोगनाशे पुरीतत्क्रियया पुरीतन्मनःसंयोगरूपा सुषुप्तिः सम्पद्यते, तत्र प्राक्तनात्ममनोयोगोऽस्तीति वाच्यम्, सर्वत्र मनःक्रिययैव सुषुप्तिस्वीकारान्नाडीतदवयवादिक्रियाकल्पने गौरवादिति ।

त्वङ्मनोयोगस्य ज्ञानमात्राहेतुत्वेऽपि ज्ञानाऽसमानाधिकरणज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं, त्वक्त्वस्य जातित्वात्त्वङ्मनोयोग एव ज्ञानहेतुर्न तु शरीरमनोयोगः, शरीरत्वस्योपाधित्वादिति शरीरे नाऽतिव्याप्तिः। यदि च समवायेन चैत्रीयमनोयोगस्य शरीरनिष्ठस्यावच्छेदकतया चैत्रीयज्ञानहेतुत्वं तदा ज्ञानसमानाधिकरणज्ञानकारणसंयोगाऽनाश्रयवृत्तिमनोवृत्तिज्ञानकारणसंयोगाश्रयत्वं तत्। आत्मशरीरयोर्वारणाय प्राथमिकं वृत्त्यंतं संयोगविशेषणम्। शरीरात्ममनसां ज्ञानसमानाधिकरणज्ञानकरणसंयोगाश्रयत्वात् शरीरमनोयोगात्ममनोयोगयोर्न तदाश्रयवृत्तित्वमित्याऽऽत्मशरीरयोर्व्युदासः। शरीरतदवयवनाड्यादिनाऽऽत्मसंयोग एव चेष्टावदात्मसंयोगत्वेन हेतुरतो न स्वप्नवहनाडीमनोयोगमादाय तन्नाड्यामतिव्याप्तिः। चक्षुर्घटादिसंयोगमादाय घटादावतिव्याप्तेर्वारणाय 'मनोवृत्ती' ति। मनोघटसंयोगादिकमादायातिव्याप्तिवारणार्थं 'ज्ञानकारणे'ति। शरीरावच्छेदेन प्राणमनःसंयोगत्वेन न हेतुत्वं, किन्तु शरीरप्राणसंयोगत्वेनैवेति न प्राणेऽतिव्याप्तिरिति।

**तदेतन्निजगृहपरिभाषामात्रम्**। इन्द्रियवर्गणादिजन्यतावच्छेदकत्वेन सिद्धस्य प्रकृष्टज्ञानकारणत्वाऽभिव्यंग्यस्य द्रव्यनिष्ठस्येन्द्रियत्वस्य प्राणादाविव मनस्यवृत्तित्वादन्यथा द्वीन्द्रियादिवधे त्रीन्द्रियादिवधजन्यदोषप्रसङ्गात्। न चैकेन्द्रियादि-

जीवभेदव्यवस्था परं प्रत्यसिद्धेति द्वीन्द्रियादेस्त्रीन्द्रियादित्वोपगमेपि न क्षतिरिति **वाच्यम्**, ज्ञानापकर्षस्येन्द्रियनियम्यतया एकेन्द्रियपर्यन्तविश्रान्तत्वेनैकेन्द्रियादिव्यवस्थायाः सिद्धान्तसिद्धायाः स्वेच्छामात्रेणाऽन्यथाकर्त्तुमशक्यत्वात् । **न च** शरीरभेदादेव ज्ञानापकर्षभेदो नत्विन्द्रियभेदादिति **वाच्यम्**, ज्ञानापकर्षस्येन्द्रियापकर्षान्वयव्यतिरेकानुविधायित्वात् ।

**किञ्च** मनसः कालत्रयावच्छिन्नार्थग्राहिणोऽनुमानावधिज्ञानादिवद्वर्त्तमानार्थग्राहिश्रोत्रादिसाधारणं नेन्द्रियत्वम्, किन्तु श्रोत्रेन्द्रियादपि पटुतरज्ञानजनकत्वेन नो(इ)न्द्रियत्वमेवेति 'पञ्चैवेन्द्रियाणी'ति **समीचीनः पन्थाः** ।

तानि च द्रव्यभावभेदाद् द्विधा । तत्र द्रव्येन्द्रियाणि निर्वृत्त्युपकरणभेदाद्द्विधा । तत्र **निर्वृत्तिः** संस्थानरूपा बाह्याभ्यन्तरभेदेन द्विधा । तत्र बाह्या निर्वृत्तिर्मनुष्यशशकादेर्नानारूपा, अन्तर्निर्वृत्तिस्तूत्सेधाङ्गुलाऽसंख्येयभागप्रमितशुद्धात्मप्रदेशावच्छिन्नकदम्बपुष्पाद्याकारमांसगोलकरूपा । **उपकरणं** च श्रोत्राद्यन्तर्निवृत्तेर्विषयग्रहणशक्तिः, खड्गस्येव च्छेदशक्तिर्वह्नेरिव च दाहशक्तिः ।

अतिरिच्यते चेयमन्तर्निर्वृत्तीन्द्रियात्; तत्सत्त्वेऽपि वातपित्तादिना विषयपरिच्छेदशक्तिविनाशे शब्दादिविषयाऽग्रहणोपपत्तेः । न च तदुपग्राहकाऽदृष्टविशेषविनाशादेव तदुपपत्तिः,

मण्यादिना वह्न्यादिनिष्टदाहशक्तेरिव वातपित्तादिनेन्द्रियनिष्ट-परिच्छेदकशक्तेरेव विनाशस्वीकारौचित्यादन्यथौषधपानविशेषेण तदननुग्रहप्रसङ्गात् । तेन विहितनिषिद्धान्येनाऽदृष्टान्तरोत्पादनाऽयोगात् । इन्द्रियनिष्टपरिच्छेदकशक्तेश्चोत्तेजकेन वह्निनिष्टदाहशक्तेरिव तेनोत्पादनस्य तस्य वक्तुं युक्तत्वात् । किञ्चैवमदृष्टोपग्रहस्य नियामकत्वे इन्द्रियस्यैवाऽसिद्धिप्रसङ्गः, तदुपगृहीतकर्णशष्कुल्यादिनैव तत्कार्यसम्भवात् । एतेन कर्णशष्कुल्यवच्छिन्नाकाशमेव श्रोत्रमदृष्टविशेषोपग्रहाच्च नातिप्रसङ्ग इत्यादि **नैयायिकमतमपास्तम्** ।

भावेन्द्रियाण्यपि लब्ध्युपयोगभेदाद् द्विधा । तत्र लब्धिस्तदावरणकर्मक्षयोपशमः, प्रमाणं च तत्र तुल्येपि द्रव्येन्द्रियविषयसम्बन्धे पुरुषभेदेन बहुबहुविधादिविषयपरिच्छेदभेद एव, तत्सन्निधानादेव चात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियत इति । उपयोगश्च लब्धिनिमित्तो मनःसाचिव्यादात्मनोऽर्थग्रहणं प्रति व्यापारः, प्रमाणं च तत्र सुषुप्तौ ज्ञानाभावान्यथानुपपत्तिः । संयोगादौ क्रियाया इवार्थग्रहण आत्मनोप्याभिमुख्यस्य नियामकस्य स्वीकारात्, तस्यैवोपयोगरूपत्वात्सुषुप्तौ तदभावादेव ज्ञानानुत्पादसम्भवाद्व्यासङ्गोप्यर्थान्त(न्त)रानुपयोगादेव सम्भवति, नत्विन्द्रियान्तरेणाणोर्मनसोऽसम्बन्धादन्यथा रूपादिकं पश्यतो जातायां गीतादिबुभुत्सायां सद्य एव गीतादिश्रवणानुपपत्तेः । बुभुत्सया मनो

वहनाडीप्रयत्नद्वारा श्रोत्रमनोयोगस्योत्पादनाऽयोगादसर्वज्ञै-रस्यां नाड्यां मनो विद्यते संयोक्ष्यते चानेनेन्द्रियेणेति प्रत्येतुमशक्यत्वात् । कथं चैवमादरेण रूपादिकं पश्यतो वेगवत्तरमहामेघसङ्घट्टजन्मनो झनझनाशब्दस्य झटित्येव साक्षात्कारः ? उपयोगस्य नियामकत्वे तु न किञ्चिदनुपपन्नं, बलवति विषये उपयोगस्य सद्य एव सम्भवात् ।

अत्रोपयोगमाश्रित्य सर्वेऽपि जीवा एकेन्द्रिया, एकस्मिन् काले एकोपयोगवत्त्वात् , शेषेन्द्रियापेक्षया चैकेन्द्रियादिभेदः । अथवा लब्धीन्द्रियापेक्षयापि सर्वेषां पञ्चेन्द्रियत्वमेव, बकुलादीनामपि कामिनीवदनार्पितमदिरागण्डूषादिना पुष्पपल्लवादिदर्शनात् । तस्य ज्ञानविशेषाऽऽहितप्रीतिविशेषाऽऽहतेष्टपुद्गलनिमित्तकत्वात् । सुप्तेऽपि कुम्भकारे कुम्भनिर्वृत्तिशक्त्या कुम्भकारत्ववद् बकुलादौ लब्ध्येन्द्रियपञ्चकसद्भावेऽपि पञ्चेन्द्रियत्वव्यपदेशो निर्वृत्त्यादिद्रव्येन्द्रियसम्बन्धाऽभावान्न भवतीति **भाष्यसम्प्रदायः** । अत्र च निर्वृत्त्युपकरणेन्द्रियसमुदायो न पञ्चेन्द्रियत्वव्यपदेशनिबन्धनमुपहतनयनादीनामपि तद्व्यपदेशात् , किन्तु पञ्चेन्द्रियजातिनामकर्मविपाकोदय एवेत्यत्र तात्पर्यमत एव जातिनाम्नो नेन्द्रियपर्याप्त्याऽन्यथासिद्धिः । निर्माणाङ्गोपाङ्गनामारचितनिष्पादितबाह्यनिर्वृत्त्युपग्रहेण तस्याः प्रतिनियतपूर्णेन्द्रियनिष्पादकत्वेऽप्येकेन्द्रियादिव्यपदेशभेदस्य जातिनामभेदनिमित्तकत्वादित्यन्यत्र

विस्तरः । नचैवं हिंसादिदोषभेदेऽपीन्द्रियभेदनियामकत्वं विलीनमिति वाच्यम्, इन्द्रियघटितप्राणवियोगरूपायां हिंसायामिन्द्रियस्यापिप्रवेशादितिदिक् ॥४ । [इन्द्रियवादः समाप्तः]

## ५ अतिरिक्तशक्तिपदार्थवादः ।

द्रव्यादयः षडेव पदार्था इति वैशेषिकाणां पदार्थविभागोऽनुपपन्नः, शक्तेरप्येवं पदार्थान्तरत्वात् । तथा हि, यादृशादेव करतलानलसंयोगाद्दाहो जायते, सति मण्यादौ प्रतिबन्धके तादृशादेव न जायत इति मण्यादिनाश्यं वह्निनिष्ठं किञ्चिदतीन्द्रियं दाहानुकूलं स्वीकर्त्तव्यं, सैव शक्तिः ।

न च मण्याद्यभावानामपि दाहहेतुत्वादेव तदा दाहानुत्पत्तिः, नचाऽभावस्य न कारणत्वं, कार्यत्वस्येव कारणत्वस्यापि भावत्वाऽव्याप्यत्वादिति वाच्यम्, उत्तेजके सत्यपि तत्र दाहाऽनाऽऽपत्तेः । नचोत्तेजकाभावविशिष्टमण्याद्यभावानां हेतुत्वाददोषः, एकोत्तेजकसत्त्वेप्यपरोत्तेजकाऽभावसत्त्वेन तद्दोषाऽनुद्धारात्, उत्तेजकत्वस्य च शक्त्यनभ्युपगमे एकस्य दुर्वचत्वेन तदवच्छिन्नाऽभावस्य निवेशयितुमशक्यत्वात् । तत्तदुत्तेजकाभावकूटनिवेशे च परस्परं विशेषणविशेष्यभावे विनिगमनाविरहान्नानाकार्यकारणभावकल्पने गौरवात् । दाहत्वावच्छिन्ने विलक्षणशक्तिमत्त्वेन हेतुत्वकल्पनाया एवोचितत्वात् ।

न च भवतामपि शक्तिनाशे उत्तेजकाऽभावविशिष्ट-मण्यादीनां तावत्कार्यकारणभावकल्पनाद्गौरवतौल्यमेव, अधिकं च नानाशक्तितत्कार्यकारणभावादिकल्पनागौरवमिति वाच्यम्, अस्माकं विलक्षणशक्तिमत्त्वेनानुगतीकृतोत्तेजकानां प्रतिबन्धकशक्तिनाशकत्वमेकं कल्पनीयमपरं च दाहशक्तिनाशत्वावच्छिन्ने विलक्षणशक्तिमत्त्वेन मण्यादीनां कारणत्वम्, अन्यच्च दाहशक्तौ तदनुकूलशक्तिमत्त्वेन वह्नेरेव, भवतां तूक्तरीत्याऽनन्तकार्यकारणभावाः कल्पनीया इति लेशतोपि साम्याऽभावात्। नानाशक्तिनाशोत्पादादिकल्पनागौरवस्य फलमुखत्वेनाऽदोषत्वात्।

ननु भवतां प्रतिबन्धकदशायां कृशानौ दाहशक्त्यनुकूलशक्तिरस्ति न वा? नास्ति चेत्? कुतः पुनरुत्पद्यते शक्त्यंतरसहकृतादग्नेरेवेति चेत्? तर्हि सापि शक्त्यंरसहकृतात्तस्मादेवेत्यनवस्था। वस्तुतस्तद्वह्नेरेकत्वात्तच्छक्तेः स्वकारणप्रभवत्वे 'प्राक् सा नास्ती'ति वचनस्यैव व्याघातः। कारणान्तरप्रभवत्वे च किं तया? कारणान्तराद्दाहशक्त्युत्पत्तेरेव वक्तुं युक्तत्वात्। अथाऽस्ति, तदा तदानीमपि दाहोत्पादिकां शक्तिं सम्पादयेत्, ततोऽपि दाहः स्यादेवेति चेत्? अत्रोच्यते-प्रतिबन्धकावस्थायामप्यस्त्येव दाहशक्तिसम्पादकं शक्त्यंतरं, तदुत्पन्नोत्पन्नदाहशक्तेः प्रतिबन्धकेन च नाशाच्च

न तदा दाहोत्पत्तिः। प्रतिबन्धकापगमे तु दाहव्यक्तिः स्फुटैवेति व्यक्तं स्याद्वादरत्नाकरे ।

नन्वेवं विनश्यदवस्थयाऽपि दाहशक्त्या प्रतिबन्धकदशायां दाहजननाऽऽपत्तिः, कारणस्य कार्यप्राक्कालसत्ताया एवाऽपेक्षितत्वादिति चेत्? न, कार्यसहभावेनैव तस्या हेतुत्वात्। न च तथापि क्षणिकत्वाऽऽपत्तिः, पर्यायार्थतः क्वचित् क्षणिकताया अपीष्टत्वात्। न च शक्तिधाराऽऽपत्तिरेकशक्तिनाश एवाऽपरशक्तिजननादिति बोध्यम् ।

अन्ये त्वाहुः—प्रथमं वह्न्यादिकारणजन्या वह्न्यादिनिष्ठा शक्तिः प्रतिबन्धकेन च तस्या विनाशः, उत्तेजकेन पुनस्तदुत्पत्तिः। न च शक्तिहेत्वननुगमः, शक्त्यनुकूलशक्तिमत्त्वेनाऽनुगमादिति। अस्मिन् मते उत्तेजकेन मण्यादेः शक्त्यनाशे उत्तेजकजनितदाहशक्तेर्मण्यादिना नाशादुत्तेजकसत्त्वेपि दाहाऽनापत्तिः। उत्तेजकजनितदाहशक्तेर्मण्याद्यनाश्यत्वे चोत्तेजकापसारणदशायामपि दाहापत्तिः। उत्तेजकेन मण्यादेः शक्तिनाशेऽप्येतद्दोषतादवस्थ्यमेवोत्तेजकनाशिताया मण्यादिशक्तेः पुनरनुत्पादादुत्तेजकाऽभावस्य तद्धेतुत्वे चाभावकारणत्वप्रसङ्गो, मण्यादेरेव तदुत्पादकत्वे च वह्न्यादेरेव दाहशक्तिहेतुत्वमुचितमित्याकरपक्ष एव ज्यायानिति बहुतरमूहनीयम् ।

अपि च तृणारणिमणिषु वह्निजनकतावच्छेदकतया शक्तिसिद्धिर्दुर्वारा। तृणत्वादिना वह्नित्वावच्छिन्नहेतुत्वाऽ-

योगात् । तृणादिकं विनाऽरण्यादितोऽपि वह्नेरुत्पादात् । न च वह्निनिष्ठजातित्रयकल्पनाददोषः, तदपेक्षया तृणफूत्कारारणि-निर्मथन-मणितरणिकिरणसंयोगेष्वेकशक्तिकल्पनायां लाघवात् । सम्बन्धत्रयनिष्ठैकजात्यङ्गीकारे च नोदनात्वादिना सङ्करप्रसङ्गः । यदि चान्वय-व्यतिरेकाभ्यां तृणादेरपि कारणत्वमिष्यते तदा तेषामप्येकशक्तिमत्त्वेन तदस्तु. तथापि जातित्रयकल्पना-पेक्षया शक्तिद्वयकल्पनाया लघुत्वात् । तेष्वपि जात्यङ्गीकारे च मणित्वादीना सङ्करप्रसङ्ग इति ।

अथ तृणादौ वह्निकारणताऽनवच्छिन्नैवाऽस्तु किं शक्तिकल्पनया ? नहि 'कारणता किञ्चिद्धर्मावच्छिन्नैवे' ति व्याप्तिरस्ति प्रमाणाऽभावात् । 'तन्तुत्वेन तन्तुः पटकारणं,' 'पटत्वेन पटस्तन्तुकार्यमि'ति प्रतीत्या तत्राऽवच्छेदकसिद्धा-वपि प्रकृते तदभावात् । 'शक्तिविशेषेण तृणं वह्निहेतुरि'-ति प्रतीतेरसिद्धेः, शक्तेरतीन्द्रियत्वोपगमात् । अस्तु वा सर्वत्राऽपि कार्यता कारणता च निरवच्छिन्नैव । तन्तुः पट-कारणमित्यादिको हि लोकानामनुभवो, न तु तन्तुत्वादिनापि । 'द्रव्यत्वेन न तन्तोः पटकारणत्वं किन्तु तन्तुत्वेने' त्यादिकाः प्रतीतयस्तु केवलं तान्त्रिकाणामेवेति चेत् ? न, लोकैरपि सामान्यविशेषोपयोगपरैर्वस्तुमात्रस्येव कारणत्वस्य कार्यत्वस्य चावच्छिन्नानवच्छिन्नस्यैवाऽनुभवात् । सप्तभङ्ग्या तत्सङ्कलन-मात्रस्यैव शास्त्रार्थत्वात् । वह्निनिरूपितकारणतायास्तृणत्वेन

तृणनिरूपितकार्यतायाश्च वह्नित्वेन प्रथमतोग्रहेऽपि वह्नि-सामान्यतृणसामान्यकार्यकारणभावोपयोगे तृणत्वेन व्यभिचार-स्फूर्तौ शक्तिविशेषेणैव तृणे वह्निसामान्यहेतुताया ऊहाख्य-प्रमाणेन परिच्छेदात् । न चेदेवं, दण्डघटाद्योरपि कार्यकारण-भावो दुरुपपादः स्यात्, घटत्वस्य मृत्त्वस्वर्णत्वादिसंकीर्ण-तया जातित्वाऽसिद्धेः, तस्यैकत्ववृत्तित्वाभ्युपगमेऽपि दोषा-देकत्वाऽग्रहे तदग्रहापत्तेः, नव्यमते एकत्वस्याप्येकत्वाच्च ।

**न च** कुलालस्वर्णकारादिजन्यतावच्छेदकमृत्त्वस्वर्ण-त्वादिव्याप्यनानाघटत्वाऽभ्युपगमेऽपि निस्तारो, दण्डत्वस्या-ऽपि तद्वदेव नानात्वेन व्यभिचारात् । यावद्दण्डभिन्नाऽवृत्ति-जातित्वेनानुगतीकृत्य तन्निवेशे गौरवात् । विजातीयसंयोग-व्यापारकत्वस्य च कारणान्तरघटितत्वेन तेन रूपेणाप्यहेतु-त्वात् । **न च** भ्रमिप्रयोजकावयवसंयोगविशेषवत्त्वेनैव हेतुत्व-मस्त्विति **वाच्यम्**, तद्विशेषस्यापि जातिरूपस्याऽसिद्धेर्नोद-नात्वादिना साङ्कर्यादिति शक्तिविशेषेणैव दण्डादेर्घटादिसा-मान्यहेतुत्वमुचितमिति दिक् ।

**उत्तानास्तु** तत्तत्सम्बन्धान्यतमत्वेन सम्बन्धानां तृणाद्यन्यतमत्वेन च तृणादीनां हेतुत्वान्न शक्तिसिद्धिः । **न च** तत्तदन्यतमत्वं तत्तदन्यत्वविशिष्टैतदन्यत्वाऽवच्छिन्नप्रतियो-गिताको भेदस्तथा च विशेषणविशेष्यभावे नानाकार्यकार-

णभावप्रसङ्ग इति **वाच्यम्**, एकस्यैव भेदस्य तादृशनाना-
प्रतियोगिताकत्वेन परिचितस्याऽखण्डस्य स्वरूपतो निवेशा-
दित्याहुः । **तदसत्** इत्थं सति सर्वत्राऽपि भेदविशेषेणैव कार्य-
कारणभावसम्भवे कुत्राऽपि तदवच्छेदकतया जात्यसिद्धिप्रस-
ङ्गाद् भेदविशेषेण बुद्धिविशेषेण वा हेतुत्वमित्यविनिगमाच्छ-
क्तिविशेषस्यैवाऽवच्छेदकत्वेन कल्पनौचित्याच्च ।

**किञ्च**, व्रीह्यादिजननियामकोऽपि व्यापारविशेषः शक्त्याख्योऽवश्यं कल्पनीयः । अन्यथा व्रीह्यादिवापे व्रीह्यादीनामाऽपरमाण्वन्तभङ्गे व्रीह्यारम्भकपरमाणुभिर्व्रीहय एव जन्यन्त इति नियमो न स्यात्तैरपि कदाचिद्यवाद्यारम्भात् । न **च** पाकजविलक्षणरूपरसादिविशिष्टपरमाणूनामेव यवाद्यारम्भकत्वान्नेयमाऽऽपत्तिरिति **वाच्यम्**, पाकजविलक्षणरूपरसादीनां बहूनां जनकतावच्छेदकत्वादिकल्पनापेक्षयैकशक्तिकल्पनस्यैव न्याय्यत्वात् ।

**किञ्च**, तव मते यत्र पाकजा न विशेषास्तत्र जलादौ क्वचिदुद्भूतरूपादिकं क्वचिन्नेत्यत्र शक्तिं विना किं नियामकम् ? तव शक्तिविशेषप्रयोजकोऽदृष्टविशेष एव, ममोद्भूतरूपादिनियामक इति **चेत्** ? न, मम शक्तिविशेषानुकूलशक्तेरेव शक्तिविशेषप्रयोजकत्वात् । कारणपरंपरानवस्थावच्छक्तिपरंपराऽनवस्थाया अदोषत्वात्, अदृष्टे पापपुण्यरूपे साङ्कर्यादनुगतविशेषाऽसम्भवाच्च ।

किञ्च, नानापरमाणुनिष्पादितस्य बादरस्कन्धस्य नानारूपरसगन्धस्पर्शममन्वितत्वात् क्वचिदेव कस्यचिदुद्भवानुद्भवार्थमवश्यं शक्तिविशेषः स्वीकर्त्तव्यो, नीलाद्यवयवैरेव निलाद्यवयवी जन्यत इत्यत्र प्रमाणाऽभावात्। नीलादिपरमाणुभिरेव कदाचित्पीतादिजननात्। तत्र पाकादिना नियमतो रूपादिपरावृत्तेरवयविनीलादाववयवगतनीलाभावादेः प्रतिबन्धकत्वस्य पाकाऽजन्यावयविनीलादाववयवनीलादेर्विलक्षणनीलादौ विजातीयतेजःसंयोगादेर्हेतुत्वस्य च कल्पनामपेक्ष्योद्भूतनीलादौ शक्तिविशेषस्यैव हेतुत्वौचित्यात्।

एतेनेदं परेषां कल्पनाशतमपास्तम्। तथाहि, 'अवयवोद्भूतरूपादिकमेवावयव्युद्भूतरूपादौ तन्त्रम्, रसनाद्यारम्भकाः परमाणवो योग्यजलारम्भकाद्भिन्ना एवे' त्येके। 'अनुद्भूतत्वस्यैव जातित्वाज्जन्यानुद्भूतरूपेऽनुद्भूतेतररूपाभावोऽवयविशुक्लादौ चावयवशुक्लादिकं हेतुः, इत्थं च न परमाणुभेदस्वीकारो न वा भर्जनकपालस्थवह्नावनुद्भूतरूपतेजःप्रवेशादुद्भूतरूपानुपपत्तिरि' त्यन्ये। 'पृथिवीत्वादे रूपनिश्चयेऽपि नीलत्वादिना निश्चयाऽभावान्नीलादिविजातीयमेवानुद्भूतम्, इत्थं चैकमेवाऽनुद्भूतत्वं नीलत्वादिव्यापकमुद्भूतत्वमेव वैकं, अनुद्भूतत्वं तु तदभावः। उद्भूतान्यसमवेतत्वादेव हि घटादिना चक्षुराकाशसंयोगादिकं न चाक्षुषं, अवयव्यनुद्भूताऽसमवायिहेतुतावच्छेदिका जातिर्वास्तु, रसना-

द्यारम्भकास्तु योग्यजलानारम्भकाः । शुक्लेतररूपवता शुक्ल-रूपवदनारम्भादि’त्यपरे । पृथिवीत्वादिना क्लृप्तकार्यकारणभावकनीलाद्यन्यतमसिद्धेर्घ्राणादौ नीलाद्येकतरनिश्चयस्यानुद्देश्यत्वान्नानैवानुद्भूतत्वमि’त्यन्ये ।‘शुक्लत्वव्याप्यमेकमेवाऽनुद्भूतत्वं, चक्षुरादिरूपे भास्वरत्वादिजातौ मानाभावाद्, वाय्वाद्याऽऽकृष्टचम्पकादिभागास्तु चम्पकानारम्भकाः शुक्ला एव रूपवैषम्येऽपि गन्धसम्भवादि’त्यपरे । ‘एकत्वनिष्ठमेवोद्भूतत्वं विषयविशेषत्वमेव वा प्रत्यक्षप्रयोजकं, रूपं तु सर्वं समानमेवे’त्यन्ये इति ।

अपि चाभिमन्त्रितपयःपल्लवादौ विषचालनादिनियमार्थमपि शक्तिरावश्यकी । न च तत्र मन्त्रपाठतः पुरुष एवाऽऽदृष्टस्वीकारान्निर्वाहः, किञ्चिदशौचाऽभावस्य क्वचित् प्रयोजकत्वादशौचेऽपि क्वचिदधिकारादशुचिपुरुषेऽपि ततोऽदृष्टोपपत्तेरिति वाच्यम्, पुरुषनिष्ठस्याऽदृष्टस्य सम्बन्धविशेषेण जलादिनिष्ठव्यापारस्यैव कल्पनौचित्यात् । किञ्च मन्त्रपाठादिना पुरुषनिष्ठस्याऽदृष्टस्य स्वीकारे मन्त्रितजलस्याऽशुचिस्थानमोचनादिनाऽपि तत्फलाऽऽपत्तिः । न च ततस्तददृष्टनाशः कल्पनीयो, व्यधिकरणस्य तस्य तदनाशकत्वात् ।

किञ्च नानापुरुषोद्देशेन मन्त्रितस्य साधारणजलस्य नानापुरुषेभ्यो विभज्य दत्तस्यैकेनाऽशुचिस्थाननिवेशेऽदृष्ट-

नाशात्सर्वस्याप्यसंस्कृतत्वेन्येषामपि फलं न स्यात्, तदनाशे चाऽशुचिस्थानसंसृष्टतज्जलपानादपि फल स्यात् । एतेनाऽनेक-जलादिनिष्ठव्यापारकल्पने गौरवादेकात्मनिष्ठव्यापारकल्पनमेवोचितमित्यपास्तम् । अनन्यगत्या जलादिगतनानाव्यापार-कल्पनावश्यकत्वात् । 'अशुचिस्थानसंसर्गाद्यनवच्छिन्नसम्बन्ध-विशेषेणाऽदृष्टस्य नियामकत्वान्नानन्यगतिकत्वमि' ति चेत् ? न, तथाप्येकपुरुषीयविषचालनप्रतिबन्धोद्देश्यकप्रतिबन्धकम-न्त्रेण साधारणविषचालकमन्त्रपाठजनिताऽदृष्टनाशाऽनाशाभ्यां सर्वेषामेकस्य चाधिकृतस्य फलाऽनापत्त्यापत्तिभ्यां व्यापारना-नात्वकल्पनध्रौव्यात् । तत्तत्पुरुषोद्देश्यकप्रतिबन्धकमन्त्राभाव-विशिष्टविलक्षणमन्त्रत्वेन तत्तत्पुरुषीयविषचालनादौ पृथक्कार णत्वकल्पने च गौरवात् ।

किञ्च यत्र मणिविशेषस्पृष्टजलपानाद्विषचालनं तत्र शक्तिं विना का गतिः ? न हि तत्रापि मणिविशेषाददृष्टमुत्पद्यते, सम्बन्धविशेषेण जलगतप्रयोक्तृनिष्ठतदुत्पादाभ्युपगमे दाहप्रति-बन्धकस्याऽपि मण्यादिसमवधानजन्यस्य सम्बन्धविशेषेण काष्टादिगतस्याऽदृष्टस्यैव कल्पनापत्तेः । किञ्च यत्र योगीन्द्र-पदरजःस्पर्शविशेषाद्दुष्टकुष्टादिनाशकं तीर्थजलमुत्पन्नं तत्र शक्तिविशेषाभ्युपगमं विना न निर्वाहः । तत्स्पर्शध्वंसस्य तज्जलोपादानकजलान्तरेऽसंक्रमाद् ध्वंसेन भावव्यापारान्यथा-सिद्धावदृष्टसंस्कारादेरपि विलयाऽऽपत्तेश्च । अपि च सिद्धरस-

स्पर्शाल्लोहादौ तपनीयपरिणामः शक्तिविशेषनिर्वाह्य एव, सिद्ध-रसस्पर्शध्वंसविशिष्टलोहे तपनीयारम्भस्य त्वया वक्तुमशक्यत्वात् । लोहस्यांत्यावयवित्वात्तत्र लोहनाशतपनीयावयवाऽऽगमनकल्पनं तु नानुभवयुक्त्यनुरोधि ।

अस्माकं तु शक्तिवैचित्र्यान्न काप्यनुपपत्तिः सुवर्णाऽभिन्नद्रव्यशक्त्या स्थितस्यैव लोहस्य सिद्धरसस्पर्शाहितशक्त्या गुरुत्वरूपविशेषाद्यात्मकतपनीयपरिणामोत्पादकत्वाऽविरोधात् । न चैवं कृतस्यैव करणापत्तिः, कथंचित्तस्य इष्टत्वात् । अत एव घटोपि रूपितया पूर्वंकृत एव, संस्थान–जलाहरणशक्तिभ्यां च पूर्वमकृतः, रूपित्वसंस्थानशक्तिसमुदायेन च कृताऽकृतः । आद्यसमयावच्छेदेन च क्रियमाणः क्रियते । घटत्वेन पूर्वं कृतः, पटत्वेन पूर्वमकृतो, घटत्वपटत्वाभ्यां पूर्वं कृताकृतः । क्रियमाणश्चोत्पत्तिसमये पटतया न क्रियत इत्यस्माकं कृताऽकृतत्वसिद्धान्तस्तथा च भाष्यम् [१] ''रूवित्ति कीरइ कओ, कुम्भो संठाणसत्तिओ अकओ । दोहिवि कयाकओ सो । तस्समयं कज्जमाणो अ ।। पुव्वकओ उ घडतया । परपज्जाएहिं तदुभयेहिं च । कज्जंतो य पडतया ण कीरए सव्वहा कुम्भो । त्ति ।। [विशेषावश्यके-४०९८-४०९९]

१–रूपीति क्रियते कृतः कुम्भःसंस्थानशक्तितः अकृतः । द्वाभ्यामपि कृताकृतः स तत्समयं क्रियमाण इति।। पूर्वकृतस्तु घटतया परपर्यायैः तदुभयैश्च । क्रियमाणश्च पटतया नक्रियते सर्वथा कुम्भः ।[इति सं०]

यत्तु ''अकृतप्रतिष्ठे प्रतिमादौ पूजाफलाऽभावात्प्रतिष्ठादेः क्षणिकत्वात्तदाऽऽहिता शक्तिश्चाण्डालादिस्पर्शनाश्या पूजाफलप्रयोजिका स्वीकार्या। न च यजमानगताऽदृष्टं तदाहितं तथा, चाण्डालादिस्पर्शेन व्यधिकरणेन तन्नाशाऽयोगात्, यजमानस्य तददृष्टक्षये पूज्यताऽनापत्तेश्चेति **मीमांसका नैयायिका**नाक्षिपन्ति तत्र पुनरस्माकमाचार्याणां न स्वारस्यम्। प्रतिष्ठाविधिना मुख्यदेवतास्वरूपालम्बनस्य निजभावस्य स्वात्मन्येव व्यवस्थापनात्प्रतिमायां 'स एवायमि'त्यभेदोपचारस्यैव पूज्यताप्रयोजकत्वात्। प्रतिमायां वर्द्धमानत्वाद्याहार्याऽऽरोपजनकेष्टसाधनताज्ञानविषयताऽवच्छेदकत्वेनैव प्रतिष्ठाया उपयोगात्।

अनादिमत्यां हि प्रतिमायां सर्वस्यामेव भगवदभेदाऽध्यारोप इष्टसाधनम्, आदिमत्यां तु प्रतिष्ठितायामेवेति ततः प्रतिष्ठाऽऽहितशक्तिकल्पनमनतिप्रयोजनमित्यापातदर्शिनः। अत्रेदमवधेयम्, यद्यपि प्रतिमायां प्रतिष्ठितत्वज्ञानं प्रतिष्ठाविधिप्रतिसन्धानोत्थापितवचनादरभगवद्बहुमानाऽऽहितसमापत्तिद्वारा विशिष्टफलप्रयोजकम्। अत एव मूलोत्तरगुणसहस्रसमेतसाधुकृतप्रतिष्ठैवोत्सर्गतः प्रमाणम्, प्रतिष्ठोत्कर्षस्य समापत्त्युत्कर्षकत्वात्। तथापि वस्तुतः प्रतिष्ठितायां प्रतिमायां भगवदारोपस्तत्पूजनं वा सामान्यफलं नातिक्रामतीति तन्नियामकशक्तिसिद्धिः। विषयभेदात्फलभेद इति व्यवहारनयसाम्राज्यात्।

अत एव साधुत्वासाधुत्वविवेचनाभावेऽपि पात्रभेदाद्दानफलभेदस्तत्र व्यवतिष्ठते। आलम्बनमतन्त्रं भावभेद एव फलभेदहेतुरिति तु नयान्तरमतमिति गुरुतत्त्वविनिश्चये विवेचितमस्माभिः॥

यत्तु प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते, विशेषदर्शनेऽपि स्वसादृश्यदर्शिनश्चित्रादाविवाऽऽहार्याऽऽरोपसम्भवाद्, ज्ञानस्य नाशेऽपि संस्कारसत्त्वाच्च न पूजाफलाऽनुपपत्तिः, अस्पृश्यस्पर्शादिना च तन्नाश इति परेषां मतं तदत्यन्तमसम्बन्धम्। वीतरागदेवस्थले इत्थं वक्तुमशक्यत्वात् सरागे देवताबुद्धेरेव च मिथ्यात्वादसर्वज्ञमरागदेवानां व्यासङ्गदशायां व्यवहितनानादेशेषु प्रतिष्ठाकर्मबाहुल्ये चाहङ्कारममकाराऽनुपपत्तेः संस्कारनाशेऽपूज्यत्वापत्तेः, तज्ज्ञानसंस्कारयोरननुगतयोः पूजाफलप्रयोजकत्वे गौरवाच्चेति। न च भवतामपि व्यासङ्गवशात् प्रतिष्ठितत्वज्ञानाभावे पूजाफलानुपपत्तिरिति वाच्यम्, विशेषफलाभावेऽपि प्रीत्यादिना तदा सामान्यफलानपायस्योक्तत्वाद्। यैस्तु यथार्थप्रतिष्ठितत्वप्रत्यभिज्ञानं पूजाफलसामान्य एव प्रयोजकमिष्यते; तेषामयमपि दोष एव।

यत्पुनरुच्यते चिन्तामणिकृता—'प्रतिष्ठितं पूजयेदि'ति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते, किन्तु भूतार्थेक्तानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते, तथा च

प्रतिष्ठाध्वंसः प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिसंसर्गाभावविशिष्टः पूज्यत्वप्रयोजक इति तदप्यविचारि(त) रमणीयम् । प्रतिष्ठायाः क्रियेच्छारूपत्वेन तद्ध्वंसस्य प्रतिमानिष्ठत्वाभावात् । क्तप्रत्ययस्थलेऽपि 'प्रोक्षिता व्रीहय' इत्यादौ ध्वंसव्यापारकत्वाऽकल्पनात्, कालान्तरभाविनि फले चिरनष्टस्य कारणस्य भावव्यापारकत्वनियमाच्च । अन्यथाऽपूर्वोच्छेदापत्तेः ।

किञ्च किञ्चिदवयवनाशेन प्रतिमान्तरोत्पत्तौ तत्र प्रतिष्ठाध्वंसानभ्युपगमात् पूज्यतानापत्तिरुक्तसंसर्गाभावानां बहूनामवच्छेदकत्वनिवेशे गौरवात् , प्रतिष्ठायाः शक्तिविशेषे तन्नाशेऽस्पृश्यस्पर्शादीनां चैकशक्तिमत्त्वेन हेतुत्वे लाघवात् । एतेन प्रागभावाऽसत्त्वे क्वचित् तत्प्रतिष्ठाध्वंसमात्रं क्वचित्तत्चाण्डालस्पर्शध्वंसविरहविशिष्टं तत्पूजाफलप्रयोजकमि' ति नव्यमतमप्यपास्तमिति दिक् ॥५॥

[शक्तिवादः समाप्तः]

# ६ अदृष्टसिद्धिवादः ।

'कालान्तरभाविफलानुकूलविहितनिषिद्धक्रियाजन्यभावव्यापाररूपमदृष्टमप्रामाणिकमि'ति बाह्याः । तन्न, दानदयाब्रह्मचर्यादिक्रियाणां वैफल्यप्रसङ्गात् । 'दृष्टधान्याद्यव्या(वा)प्तिफलककृष्यादिक्रियावद्दानादिक्रियाणामपि दृष्टमनःप्रसादादिफलकत्वमेवे'ति चेत्? न, मनःप्रसादादेरपि फलवत्त्वान्यथाऽनुपपत्त्याऽदृष्टस्यैव सिद्धेः । अथ 'दानादिक्रियाणां श्लाघादियत्किञ्चिद्दृष्टफलेनैव पर्यवसितत्वान्न शुभाऽदृष्टजनकत्वम्, यथा मांसभक्षणादिदृष्टप्रयोजनपर्यवसितानां पशुहिंसादिक्रियाणां प्रमाणाभावान्नाऽशुभाऽदृष्टजनकत्वम् । न चाऽदृष्टफलोद्देशने लोकप्रवृत्तिरेवाऽदृष्टे प्रमाणम्, दृष्टफलोद्देशेनैव बहूनां प्रवृत्तेः तदसंख्येयभागस्याप्यदृष्टफलोद्देशेनाऽप्रवर्त्तमानत्वादि'ति चेत्? न, दृष्टफलोद्देशेन बहूनां प्रवृत्तेरेवाऽनन्तसंसारिजीवान्यथानुपपत्तेरदृष्टसिद्ध्याऽऽवश्यकत्वात् । दृष्टफलमुद्दिश्य कृष्यादिप्रवृत्तानामपि पापलक्षणमदृष्टमनभिलषितं बद्ध्वाऽनन्तसंसारपरिभ्रमणादनन्तावस्थानोपपत्तेः । अदृष्टफलोद्देश्यकदानादिक्रियाप्रवृत्तानां धर्मरूपमदृष्टमासाद्य स्वल्पानामेव क्रमेण मुक्तेः ।

'कृष्याद्यर्थप्रवृत्तानामभिलषिताऽशुभाऽदृष्टस्य लाभः कुत?' इति चेत्? अविकलकारणस्य फलजनने आशंसाया

अप्रयोजकत्वात् । वप्त्राऽज्ञातस्यापि कोद्रवादिबीजस्य कोद्रवाद्यंकुरजनकत्वदर्शनात् । कृष्यादिक्रियाणां च हिंसादिमयीनां क्वचिद् दृष्टफलव्यभिचारिणीनामप्यऽशुभाऽदृष्टजननेऽव्यभिचारित्वात् । न चेदेवं, तदा कृष्यादिक्रियाकर्तृणामनभिलषिताऽशुभाऽदृष्टानुत्पादाज्जन्मान्तरीयशरीरप्रतिग्रहाऽभावादयत्नेन मुक्तेरुच्छिन्नप्रायः संसारः स्यात् । स्याच्च हिंसादिक्रियाणामेवेत्थमक्लेशफलत्वं, दानादिक्रियाणां चाभिलषिताऽदृष्टफलानां जन्मान्तरीयशरीरपरिग्रहबीजत्वात् क्लेशबहुलत्वमिति महदसमञ्जसमिदमापद्येत ।

तस्माददृष्टफलं प्रति सर्वा अपि क्रिया अव्यभिचारिण्य एव, दृष्टफलं प्रति तु क्वचिद्व्यभिचारिण्योऽपीति प्रतिपत्तव्यम् । दृष्टफलविघातोऽपि च तासामदृष्टहेतुक एव । न हि समानसाधनारब्धतुल्यक्रियाणामेकस्य दृष्टफलविघातोऽन्यस्य तु नेत्येतददृष्टहेतुमन्तरेणोपपद्यते । 'तत्रापि दृष्टकारणवैगुण्यमेव कल्पनीय'मिति चेत्? न, आपेक्षिकवैगुण्यस्य प्रयोजकत्वात्तात्त्विकवैगुण्यस्य चाऽदर्शनात् । न हि यादृश एव क्षेत्रे एकस्य शस्योत्पत्तिस्तादृश एवाऽपरस्य तदनुत्पत्तावतत्कालीनत्वादिकं विनाऽन्यत्क्षेत्रवैगुण्यमस्ति ।

किञ्च दृष्टकारणविघातोऽपि तत्राऽदृष्टहेतुक एव । सत्यां लिप्सायां भोगसाधनलाभाऽभावस्य लाभान्तर(?राय)-

प्रयोज्यत्वात् । एतेन तत्क्षेत्रे तदा तदीयशस्योत्पत्त्यनुकूल-शक्त्यभावादेव न शस्योत्पत्तिरित्यपास्तम् । शक्तिविघात-स्याऽपि तत्राऽदृष्टप्रयोज्यत्वात् ।

किञ्चैकजातीयेष्टाऽनिष्टसाधनसम्प्रयोगेऽपि पुरुषभेदेन सुखदुःखानुभवतारतम्यदर्शनात्तेषामदृष्टप्रयोज्यजातिव्याप्यजा-त्यवच्छिन्नं प्रत्येव हेतुत्वाददृष्टविशेषसिद्धिः । न च भेषजव-द्धातुसात्म्यादिद्वारकमेव तत्तारतम्यमिति वाच्यम्, ततः साक्षात्सुखादि-तौल्याद्धातुवैषम्यादेरुत्तरकालीनत्वात् । न च शरीरविशेषादेव सुखादिविशेषसिद्धिरिति, शरीरविशेषाऽदर्शने-ऽपि सर्वतोनुकूलवेदनीयोदये भोगविशेषदर्शनात् । तदिद-मुक्तं भगवता भाष्यकृता

जो तुल्लसाहणाणं फले विसेसो ण सो विणा हेउं ।
कज्जत्तणओ गोयम ! घडोव्व हेऊ अ से कम्मं ॥ [१]
(वि० आ० भा० २०६८)

ननु यदि क्रियामात्रजन्यमदृष्टं भवद्भिरभ्युपगम्यते तदा चरमशरीरिणामपि गृहस्थावस्थार्जितबहुभवभोग्यानामव-स्थानध्रौव्यात्संसारानुपरमः स्यादिति चेत् ? स्यादयं तेषां दोषो ये एकान्तत एकरूपं भोगैकनाश्यं च कर्माभ्युपगच्छेयुः । वयं तु सर्वं कर्म प्रदेशतो नियतभोगमनुभागतश्च भज-

---

१-यः तुल्यसाधनानां फले विशेषः न स विना हेतुम् ।
कार्यत्वाद् गौतम ! घट इव हेतुश्च तत्कर्म ॥ इति छाया ।

नीयभोगं वदाम इति न कोपि दोषः । चारित्रवीर्येण बहू नामव्यवस्थितकर्मणां प्रक्षयेण मोक्षोपपत्तेः ।

एतेन यदुच्छृंखलैरुच्यते दानादीनामागमबोधितनियतस्वर्गादिफले स्वध्वंस एव व्यापारोऽस्तु, किमदृष्टकल्पनया ! न चैवं दानादेः प्रतिबन्धकत्वव्यवहारापत्तिः, संसर्गाभावत्वादिना कारणीभूताभावप्रतियोगित्वेनैव तद्व्यवहारात् । न चैवं प्रायश्चित्तकीर्त्तनादिविशिष्टकर्मणोऽपि फलापत्तिस्तद्ध्वंसातिरिक्तध्वंसस्यैव व्यापारत्वात् । अस्तु वा प्रायश्चित्ताद्यभाववत्कर्मत्वेन हेतुत्वम् । इत्थं च प्रायश्चित्तादौ प्रवृत्त्यादिकं सूपपादम् । द्विष्टाभावोद्देशेन द्वेषयोनिप्रवृत्तेरविरोधात् । न चैवं दत्तादत्तफलोद्देश्यकप्रायश्चित्ते कृतेऽदत्तफलादपि फलं न स्यात्, स्याद्वा दत्तफलादपि फलमिति वाच्यम्, तत्तत्प्रायश्चित्तविशिष्टाऽदत्तफलध्वंसातिरिक्तध्वंसस्याऽदत्तफलनिष्ठोद्देश्यतया तदभावस्य वा निवेशात् । एतेन 'प्रायश्चित्तं न नरकादिप्रतिबन्धकम्, आशुविनाशित्वेन तदुत्पत्त्यवारकत्वात्, नापि तद्ध्वंसः, प्रायश्चित्तानन्तरकृतगोवधादितोऽपि नरकानुत्पत्त्यापत्तेः, तत्तत्प्रायश्चित्तप्राग्वर्त्तिगोवधादिजन्यनरके तत्तत्प्रायश्चित्तध्वंसस्य प्रतिबन्धकत्वे च प्राग्जन्मकृतगोवधादितोऽपि नरकानुत्पत्त्यापत्तिः, तज्जन्मकृतत्वस्य प्राग्वर्त्तिगोवधविशेषणत्वे त्वप्रसिद्धिरि'त्यपास्तम् । अथ 'मिथ्याज्ञानवासनाया अदृष्टहेतुत्वं सम्भवति न तु दानादिध्वंसहेतुत्वं भोग-

हेतुत्वं वा, तत्त्वज्ञानिनां दानादेरनंतत्वाऽऽपत्तेर्भोगानापत्तेश्च, तथा च तत्त्वज्ञानिनां मुक्तिदुर्लभे' ति चेत् ? न, तद्ध्वंसातिरिक्तध्वंसव्यापारत्वात्तत्र स्वर्गानुत्पत्तेः। तस्माद्दानादिकं स्वर्गजनकजनकमित्याद्यनुमितौ क्लृप्तध्वंसविषयत्वादतिरिक्ता-(ऽदृष्टाऽ)सिद्धिरिति'—

**तत्सर्वमपास्तम्** । तत्त्वज्ञानप्राक्कालीनकर्मणां बहूनामवस्थितिध्रौव्येन तेषां ध्वंसव्यापाराऽप्रच्यवादविकलफलत्वे मोक्षानुत्पादप्रसङ्गात् । **अथ** 'तत्त्वज्ञानविशिष्टध्वंसातिरिक्तध्वंसस्य व्यापारत्वान्न दोषो, अत एव 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'ति संगच्छते, इदमेव हि सर्वकर्मभस्मसात्कारित्वं यत्सर्वकर्मफलविघटकत्वमि'ति चेत् ? न, एवं सति तत्त्वज्ञानिनां प्रारब्धफलस्याप्यनापत्तेः। 'तत्त्वज्ञानविशिष्टाऽदत्तफलध्वंसातिरिक्तध्वंसस्य व्यापारत्वात्तद्भवभोग्यकर्मणश्च दत्तफलत्वान्न दोष' इति चेत् ? नैहिकामुष्मिकनानाफलजनककर्मणां तद्भवानुभूतकिञ्चित्फलानां तथाप्यनाशे मोक्षानुपपत्तितादवस्थ्यात् । किञ्च क्रियाजन्याऽदृष्टानभ्युपगमे मोक्षार्थिनां प्रवृत्तिरपि दुर्घटा स्यात्, कर्मक्षयार्थमेव तस्या उपपत्तेः। दुःखध्वंसस्य स्वत एव सम्भवेन तदर्थं तदनुपपत्तेः । चरमदुःखध्वंसत्वेन च न काम्यता, चरमदुःखमुत्पाद्य तद्ध्वंसस्य तत्त्वज्ञानेनोत्पादने दुःखहेतौ प्रवृत्त्याऽऽपत्तेः। सिद्धोपरागेण सिद्धासिद्धविषयकेच्छाभ्युपगमे कृत्स्नकर्मक्षय-

त्वेनेतरथा तु विशिष्टकर्मक्षयत्वेन काम्यता तु नाऽनुपपन्नेत्यवसेयम् ।

**किञ्च** महाप्रायश्चित्त-धर्मसंन्यासादीनामन्ततस्तत्त्वेनैककालोत्पत्तिकानन्ताऽदृष्टध्वंसे हेतुत्वमेवोचितम् । तत्तद्ध्वंसातिरिक्तत्वेन व्यापारविशेषणे तत्तत्प्रायश्चित्ताद्यभावविशिष्टत्वेन कारणत्वे चाऽतिगौरवम् । **न च** समूहालम्बनदुःप्रणिधानाद्यनुरोधेन तत्तत्प्रायश्चित्ताद्यभावोऽवश्यं निवेश्य इति **वाच्यम्**, समूहालम्बनदुःप्रणिधानजन्यस्य समानविषयकप्रायश्चित्तनाश्यस्यातिरिक्तस्यैवाऽदृष्टस्य स्वीकारात् । अपि च न यथाबद्धमेव कर्म सर्वैर्वेद्यते, बन्धोत्तरमुत्कृष्टस्याऽपकृष्टस्य परिणामविशेषवशात्प्रकृत्यन्तरसङ्क्रमेणाऽन्यादृशस्य च वेदनात् । अत एव हिंसादिफलेऽपि मिथो महदन्तरं तत्र तत्र प्रसिद्धम् । न चायं प्रकारो ध्वंसे सम्भवतीत्यवश्यं विचित्रमदृष्टमङ्गीकर्त्तव्यम् ।

[अदृष्टस्यात्मविशेषगुणत्वनिरासः]

**एतेन** आत्मनो विशेषगुणरूपमप्यदृष्टं यत्परैरुपगम्यते, तदपि **निरस्तं** भवति, धर्मविशेषात् प्राक्तनपापकर्माऽपकर्षस्य प्राचीनपुण्योत्कर्षस्य सङ्क्रमजनितवैलक्षण्यस्य चाऽदृष्टगुणत्वेऽसम्भवात्सूक्ष्मकर्मपुद्गलरूपाऽदृष्टपक्ष एव सर्वस्याऽस्यार्थस्य घटमानत्वात् । अथ 'भवतां तत्र क्रियायाः फलव्यभिचारवदस्माकमदृष्टव्यभिचारोऽपि न दोषाये' ति चेत् ? न,

अस्माकं तत्र साक्षात्फलस्याऽदृष्टरूपस्याऽव्यभिचारात्परम्परा-फलभेदस्य चाऽर्थसिद्धस्योपपत्तेः । किञ्चाऽदृष्टस्य गुणरूपत्वे तत्र पक्वाऽपक्वादिभेदाऽभावाद्दानादिजन्याऽदृष्टात्तदानीमेव स्वर्गाद्यापत्तिः । न च स्वर्गीयशरीरादिविशेषकारणाभावान्न तदापत्तिः, तस्याप्यदृष्टहेतुकत्वेनाऽऽपत्तितादवस्थ्यात्, तत्कालविशेषादनतिप्रसङ्गे च तस्यैव सर्वत्र कार्यनियामकत्वे एककारणपरिशेषाऽऽपत्तेः ।

एतेन लब्धवृत्तिकत्वमपि निरस्तम् । तस्यापि सहकारिविशिष्टत्वकालविशेषविशिष्टत्वरूपविकल्पद्वयाऽनतिक्रमात् । न च तददृष्टजन्यफले तददृष्टप्राग्वर्त्त्यदृष्टत्वाऽवच्छिन्नाऽभावस्य हेतुत्वादनतिप्रसङ्ग इति वाच्यम्, एकभवेऽपि दानहिंसादिजन्यानां बहूनामदृष्टानामर्जनात् । वस्तुतः सयोगजीवव्यापारत्वेनैव कर्मबन्धत्वाऽवच्छिन्नहेतुत्वात्सयोगिजीवव्यापारक्षणत्वस्य कर्मबन्धव्याप्यत्वात्तददृष्टप्राग्वर्त्त्यदृष्टाऽभावस्य क्वाप्यसिद्धेः । फलावच्छिन्नप्राग्वर्त्त्यदृष्टाभावस्य हेतुत्वे न दोष इति चेत् ? न, ऐहिकाऽदृष्टभोगकालेऽप्यत्युग्रपुण्यपापफलदर्शनादायुःशरीरसुखदुखलाभाऽलाभकामक्रोधादितारतम्यनियामकनानाऽदृष्टानां युगपत्फलदर्शनेन तेषां मिथोऽविरोधाच्च । तथापि मनुष्यस्य स्वर्गसुखादिजनकाऽदृष्टानां विरोधित्वान्मनुजाऽदृष्टसत्त्वे न स्वर्गाऽऽपत्तिरिति चेत् ? न, अदृष्टस्य

गुणरूपत्वे बन्धोदयादिविरोधीतरादिभेदस्याप्यनुपपत्तेः प्रकृतिरसादिभेदेन तद्व्यवस्थानात् ।

किञ्च स्वर्गादिजनकादृष्टस्य फलनाश्यत्वे प्रथमफललाभानन्तरमेव तद्विलयाऽपत्तिरन्यथा च तदनन्तत्वापत्तिः । न च प्रतियोगितयाऽदृष्टनाशे जनकतया चरमफलस्य नाशहेतुत्वाद्यमदोषश्चरमत्वस्य जातित्वे तदवच्छिन्ननियामकस्य गवेषणीयत्वापत्तेः । फलान्तरप्रागभावासमानाधिकरणत्वरूपत्वे च प्रागभावस्य विशिष्याऽहेतुत्वे तेन तदनन्तत्वाऽपत्त्यवारणात्तत्त्वे च तत एवाऽनतिप्रसङ्गे फलस्याऽदृष्टनाशकत्वे मानाभावाददृष्टाऽनन्तत्वाऽऽपत्तेः । तस्माद् योगानुभावोपात्तविचित्रप्रकृतिप्रदेशकं कषायाऽध्यवसायविशेषोपनीतविचित्रस्थित्यनुभवं च कर्म पुद्गलरूपमेव प्रतिपत्तव्यम् । अत एव कर्मणः प्रकृत्याद्यात्मकत्वे मोदकदृष्टान्तं वर्णयन्ति **समयविदः** ।

अथ 'चैत्रशरीरं चैत्रविशेषगुणपूर्वकम् , चैत्रभोग्यत्वाच्चन्दनादिवदित्यनुमानाददृष्टस्य गुणत्वसिद्धि'रिति चेत् ? न, चैत्रभोग्यत्वे मैत्रविशेषगुणपूर्वकत्वस्येव चैत्रविशेषगुणपूर्वकत्वस्याऽपि व्याप्तौ प्रमाणाभावाददृष्टद्वारकजन्मान्तरीयप्रयत्नेनाऽर्थान्तरप्रसङ्गाच्च । चैत्रभोग्यत्वावच्छिन्ने चैत्रविशेषगुणत्वेन साक्षाद्धेतुत्वं चाऽसिद्धमिति दिक् ।

किञ्चाऽदृष्टस्य गुणत्वे तदप्रत्यक्षत्वाय मानसलौकिकप्रत्यक्षं प्रति तस्य तादात्म्येन प्रतिबन्धकत्वं कल्पनीयमिति

तव मते गौरवम् । न चाऽयोग्यत्वादेव तदप्रत्यक्षत्वमिति न तत्कल्पनम्, अयोग्यत्वस्य प्रतिबन्धकत्वे विश्रामात् । न च गुणलौकिकमानसत्वावच्छिन्नं प्रति जनकतावच्छेदकतया ज्ञानेच्छादिगतजातिविशेषस्यैव कल्पनान्न तत्कल्पनमिति वाच्यम्, निर्विकल्पादिगतज्ञानत्वादिना साङ्कर्यात् । तथा सुखदुःखादिवैचित्र्यनियामकस्याऽऽहाराऽनलादिवद्धर्मिग्राहक-प्रमाणादेव पुद्गलरूपत्वं सिध्यति। आत्मतद्धर्मव्यतिरिक्तत्वे सति बाह्यकारणाधीयमानोपचयत्वात्परिणामित्वाच्च स्नेहाद्याहि-तबलघटवत् क्षीरादिवच्च पुद्गलरूपत्वमेवाऽदृष्टस्येत्यप्याहुः।

परिणामित्वं च कर्मणः कर्मपरिमाणावच्छिन्नावगा-हनाया नियतशरीरोपादानावच्छेदकत्वेन सिद्ध्यति । अत एवाऽऽद्यबालशरीरं शरीरान्तरपूर्वकं, शरीरत्वादिन्द्रियादिम-त्त्वाद्वा युवशरीरवदित्यनुमानादपि शरीररूपस्य कर्मणः सिद्धेस्त-स्य पौद्गलिकत्वम् । न च जन्मान्तरीयशरीरेणाऽर्थान्तरं, परि-णामिशरीरान्तरपूर्वकत्वस्य साध्यत्वात्परिणामिनश्च व्यवधाना-(त्यो)त् । अत एवौदारिकादिशरीरपरिणामिनः कर्मण औप-श्लेषिकमुपादानत्वं गीयते । अथ शरीरत्वं न शरीरान्तरपूर्वक-त्वव्याप्यमनवस्थाप्रसङ्गादि'ति चेत् ? न, बीजाङ्कुरस्थानी याया एतस्याअनवस्थाया अदोषत्वात् । न च वृद्धिमच्छरीरत्व-स्योपाधेः सत्त्वादुक्तव्याप्त्यसिद्धिरिति शङ्कनीयम्, प्रत्या-त्म कर्मशरीरयोर्बीजाङ्कुरन्यायेन हेतुत्ववादेऽवस्थितस्यैव परि-

माणभेदरूपाया वृद्धेः पक्षेऽपि सत्त्वेन तस्य साधनव्यापकत्वात् ।

अथ 'स्वभाव एवाऽऽदिविकारवच्छरीरादिवैचित्र्यनियामकोऽस्तु,किमदृष्टकल्पनेने'ति चेत्? स किं वस्तुविशेषो वा अकारणता(वा)वस्तुधर्मो वा? आद्ये तस्य मूर्त्तत्वे नामान्तरेण कर्मण एवाभ्युपगमप्रसङ्गोऽमूर्त्तत्वे चाऽऽकाशादिवत्तस्य शरीरादिपरिणामित्वानुपपत्तिः । द्वितीये चाऽकारणता यद्यहेतुकत्वं तदा तस्य नियामकत्वे युगपदेवाऽशेषदेहोत्पादप्रसङ्गः, कारणाभावस्य समानत्वात् । यदि च तलः स्वार्थकत्वात्कारणपदस्य नियत्यन्यकारणपरत्वादकारणता नियतिकारणमात्रमुच्यते, तदा तन्मात्रजन्यत्वे शरीरादेरादिविकारवदाऽऽदिमत्प्रतिनियताऽऽकारत्वं न स्यात् । आदिमत्प्रतिनियताऽऽकारत्वादेव घटादिवच्छरीरादेरुपकरणसहितकर्तृनिवर्त्त्यत्वेन कर्मजन्यत्वस्यैव सिद्धेः । तृतीयपक्षेऽपि वस्तुधर्मो यद्यमूर्त्त इष्यते तदा तस्य शरीरादिपरिणामनियामकत्वविरोधो, यदि च मूर्त्त इष्यते तदा कर्मणोऽपि पुद्गलास्तिकायपर्यायविशेषत्वेन वस्तुधर्मत्वात्सिद्धसाध्यतैवेति सर्वमवदातम् ॥ ६

अदृष्टसिद्धिवादः समाप्तः

तत्समाप्तौ च समाप्ता तृतीया वादमाला ।

# परिशिष्ट—ग्रन्थसङ्ग्रहगत-विशेषनामसूचिः



| नाम | पृष्ठ |
| --- | --- |
| अभयदेवसूरि | २, ५. |
| अर्जुन | १३७ |
| अष्टकवृत्ति | ५ |
| आकर | ९७, १२२ |
| आर्हत | १०२ |
| उच्छृंखल | १३६ |
| उत्तान | १२४ |
| उपदेशपद | ६ |
| उपायकृत् | ७० |
| कर्मप्रकृतिवृत्ति | २३ |
| गुरुतत्त्वविनिश्चय | १३१ |
| चिन्तामणिकृत् | १३१, ४१ |
| जैनीपरिभाषा | ११३ |
| तत्त्वविवेक | १ |
| दीधितिकृत् | ९२, १०७ |
| दुर्गतनारी | ९, १० |
| धर्मभूषण | ९६ |
| नव्य | ३०, ४२, ४४, १२४; १३२ |
| निर्युक्ति | २३ |
| नैयायिक | ३०, ७९, ८०, ८१, ८२, ८८, ९४, ९७, १०६, १०९, ११८, १३०, |
| न्यायालोक | १०१ |
| पञ्चाशकवृत्ति | २, ५, १५, |
| पदार्थमाला | १०२ |
| पदार्थतत्त्वविवेककृत | १३ |
| भगवती (सूत्र) | १५ |
| भगवतीवृत्ति | १६, १७ |
| बाह्य | १३२ |
| महावीर | १ |
| मथुरानाथ | ४४, ४५ |
| महानिशिथ | ७ |
| महाभाष्य | १३ |
| मीमांसक | १३० |
| यशोविजय | १, ९१ |
| रामभद्रसार्वभौम | ३२ |
| लता | १०६ |
| प्रकाशकृत् | ४७ |
| भट्टाचार्य | ८५ |
| भरत | १८ |
| भाष्य | ९७, १२९ |
| भाष्यकृत् | १३५ |
| भाष्यसम्प्रदाय | ११९ |
| लीलावती | ३१ |
| विद्योतन | ९२ |
| वादमाला | २९, ९१ |
| शिवादित्य | ९६ |
| षोडशक | २३ |
| सप्तभंगी | १२३ |
| सम्मतिटीकाकृत् | १०१ |
| समयविद् | १४० |

परिशिष्टानिः


| नाम | पृष्ठांकः |
|---|---|
| सांख्य | ११२ |
| सार्वभौम | १०१ |
| सोमिल | ६५ |
| सौगत | ६७, १०२ |
| स्कन्दकाचार्य | १८ |
| स्याद्वाद | ९५ |
| स्याद्वादरत्नाकर | ११२ |
| स्वतन्त्र | ५४, ८७ |
| हरिभद्रसूरि | ५, १० |


## ❀ शुद्धिपत्रक ❀

| पृष्ठ/पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|
| ७/१३ | द्रष्टव्यम् | दृष्टव्यम् |
| ७/२१ | त्येत० | इत्येत० |
| १४/११ | =विधि० | =(अ)विधि० |
| १६/१३ | ०व्याद्य(?धा)० | ६व्या(?धा) द्य० |
| २७/४ | अपूर्विच० | अपूर्वचि० |
| ३२/१२ | ०स्वतघस्त्रा० | ०स्वतन्त्रत्वा० |
| ३४/२ | ०दानदि० | ०दानादि० |
| ४०/१७ | ०व्याहृत० | ०व्याहृत० |
| ४५/१४ | ०च्छिन्नलोक० | च्छिन्नालोक० |
| ४७/८ | विज तीय० | विजातीय० |
| ५७/९ | ०चाक्षुक्त्वा० | ०चाक्षुषत्वा |
| ६१/२० | ०वनि० | ०यनि० |
| ६२/६ | वैशिष्ट० | विशिष्ट० |
| ६३/१ | भूतल० | [1]भूतल० |
| ६३/६ | ०बासा० | ०बोधसा० |
| ७२/१६ | [1]तादृश० | [2]तादृश० |
| ८१/१७ | तद्वृत्त० | तद्वृत्ति० |
| ८२/१६ | ०कल्पते | ०कल्पने |
| ९६/२१ | ०व्या०वृत्ति० | ०व्यावृत्ति |
| १०५/१८ | इत्थं च | इत्थं |
| १०७/१२ | ०प्यला० | प्यपला० |
| १११/६ | ०दि ग० | ०दिग० |
| ११२/२ | प्राण | घ्राण |
| ११२/१८ | ०त्त्वत्व० | ०रवत्त्व० |




नमो नमः श्री गुरुप्रेमसूरये

प्रकाशिका :–

श्री भारतीय प्राच्यतत्त्व प्रकाशन समिति

पिंडवाडा स्टे. सिरोहीरोड (राजस्थान)

दीपक प्रिन्टरी • अहमदाबाद-३८०००१